तीर्थमृत्तिकाग्रहणम्—ॐ अश्वक्रान्तेरथक्रान्ते विष्णुक्रान्ते वसुन्धरे। मृत्तिके हर मे पापं यन्मयाकायसंचितम्। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिकेहरमे पापं यन्मयादुष्कृतंकृतम्। त्वया हतेन पापेन सर्वपापैः प्रमुच्यते।

सर्वाङ्गेषुमृत्तिका—ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाँसुरे।

शुद्धोदकस्नानम्—ॐ देवस्यत्वा सवितु प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम्।

गोमूत्रस्नानम्—ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियो योनः प्रचोदयात्।

गोमयस्नानम्—ॐ गन्धद्वारांदुराधर्षांनित्यपुष्टां करीषणीं
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।

पयःस्नानम्—ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्यम्। भवावाजस्यसंगथे।

दधिस्नानम्—ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः।
सुरभिनो मुखाकरत् प्रणऽआयुँषितारिषत्॥

घृतस्नानम्—ॐ तेजोसि शुक्रमस्यमृतमसिधामनामासि। प्रियंदेवानामनाधृष्टं देवयजनमसि॥

कुशोदकस्नानम्—ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ एवं पञ्चगव्य स्नानं कृत्वा शुद्धोदकेन स्नात्वा।

जलेऽघमर्षणम्—ॐ द्रुपदादिव मुमुचानः स्विन्न स्नातो मलादिव।
पूतंपवित्रेणेवाज्यमापः शुद्धन्तु मैनसः॥ त्रिरावृत्य॥

स्नानांगतर्पणम्—सव्येन प्राङ्मुखः ॐ भूर्देवांस्तर्पयामि। ॐ भुवर्देवांस्तर्पयामि। ॐ स्वर्देवांस्तर्पयामि। ॐ भूर्भुवस्वर्देवांस्तर्पयामि।

कण्ठीकृत्य (निवीतिना)—ॐ भूः ऋषींस्तर्पयामि ॐ भुवः ऋषींस्तर्पयामि ॐ स्वः ऋषींस्तर्पयामि ॐ भूर्भुवःस्वऋर्षींस्तर्पयामि।

अपसव्येन—ॐ भूःपितॄंस्तर्पयामि ॐ भुवः पितॄंस्तर्पयामि। ॐ स्वः पितॄंस्तर्पयामि। ॐ भूर्भुवः स्वः पितॄंस्तर्पयामि।

सव्येन—ॐ ब्रह्मादयो देवास्तृप्यन्ताम् ॐ गौतमादयऋषयस्तृप्यन्ताम्। इति एकैकमञ्जलिं देवतीर्थेन जले क्षिपेत्। ततधदङ्मुखी भूय।

यज्ञोपवीतंकंठीकृत्य—ॐ सनकादयो मनुष्यास्तृप्यन्ताम्। इति प्रजापति तीर्थेन अञ्जलिद्वयं दद्यात्। ततः दक्षिणमुखः कृष्णतिलोदकैः पितृतीर्थेन।

अपसव्यंकृत्वा—कव्यवाडनलादयो देवपितरस्तृप्यन्ताम्। ॐ अस्मत्पितृपितामहाः प्रपितामाहास्तृप्यन्ताम्। ॐ अस्मन्मातृपितामही प्रपितामह्यस्तृप्यन्ताम् ॐ अस्मन्मातामह प्रमातामहवृद्धप्रमातामहास्तृप्यन्ताम्। ॐ अस्मन्मातामहीप्रमातामहीवृद्धमाताप्रमह्यस्तृप्यन्ताम्। ॐ आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यताम्।

राजयक्ष्मतर्पणम्—ॐ यन्मया दूषित्तं तोयं मलैः शारीरसम्भवैः।
तस्य पापस्य शुद्धचर्थं यक्ष्मैतत्ते तिलोदकम्॥ ततस्तीरमागत्य।

तटे जल अञ्जलिनिक्षेपः—ॐ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परांगतिम्।
स्नानाङ्गतर्पणान्ते स्थले स्नानवस्त्रं निष्पीडच सव्येनाचम्य।

सूर्यार्घः—ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पयमांदेवगृहाणार्घ्यं नमोऽस्तुते।

यजमानः—जलाद्बहिर्निष्क्रम्य अहतं श्वेतं सदशं धौतवस्त्रं परिधाय उपवस्त्रं गृहीत्वाद्विराचमेत्। ततो यथाचारं भस्म चन्दनादिना तिलकं कृत्वा सन्ध्यावन्दनं कुर्यात्।

त्रिकालसन्ध्योपासनम्

आत्माभिषेक:—ॐ अपवित्र: पवित्रो वा सर्वावस्थाङ्गतोऽपिवा ।
य: स्मरेत्पुण्डरीकाक्षं सा बाह्याभ्यन्तर: शुचि: ।।

संकल्प:—ॐ तत्सदद्यैतस्य ब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतावाराहकल्पे वैवस्वतमन्वन्तरे जम्बुद्वीपे भारतखण्डे आर्यावर्तैकदेशान्तर्गते अमुकक्षेत्रे कलियुगे कलिप्रथमचरणे अमुकसंवत्सरे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोत्पन्नोऽमुक शर्माहं प्रात: (सायं) सन्ध्योपासन कर्मकरिष्ये ।

विनियोग:—पृथ्वीतिमन्त्रस्य मेरुपृष्ठ ऋषि: सुतलं छन्द: कूर्मो देवता मेरोरारोहणे (आसनशोधने) विनियोग: ।

पृथ्वी प्रार्थना—ॐ पृथ्वित्वयाधृतालोकादेवित्वं विष्णुना धृता ।
त्वञ्च धारय मां देविपवित्रं कुरु चासनम् ।।

शिखाबन्धनम्—ॐ भूर्भुव: स्व: । तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि ।
धियोयोन: प्रचोदयात् ।

आचमनम्—ॐ ऋतंञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ततोराञ्यजायत । तत: समुद्रोअर्णव: समुद्रादर्णवादधिसंवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्यमिषतो वशी । सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्व: ।

विनियोग:—ॐ कारस्य ब्रह्माऋषिर्गायत्री छन्दोऽग्निर्देवता शुक्लोवर्ण: सर्वकर्मारम्भेविनियोग: । ॐ सप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाज गौतमात्रिवशिष्ठकश्यपा ऋषयो गायत्र्युष्णिगनुष्टुब्बृहतो पंक्ति त्रिष्टुबजगत्यश्छन्दांस्यग्नि वाय्वादित्य बृहस्पतिवरुणेन्द्र विश्वेदेवा देवता अनादिष्ट प्रायश्चित्ते प्राणायामे विनियोग: । ॐ गायत्र्याविश्वामित्रऋषिर्गायत्री छन्द: सविता देवताग्निर्मुखमुपनयने प्राणायामे विनियोग: । ॐ शिरस: प्रजापतिऋषिस्त्रिपदागायत्री छन्दो ब्रह्माग्निवायुसूर्या देवता यजु: प्राणायामे विनियोग: ।

प्राणायाम:—ॐ भू: ॐ भुव: ॐ स्व: ॐ मह: ॐ जन: ॐ तप: ॐ सत्यम्

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियोयोन: प्रचोदयात् ॐ आपोज्योतिरसोऽमृतंब्रह्म भूर्भुव: स्वरोम् ।

विनियोग:—ॐ सूर्यश्चमेति ब्रह्माऋषि: प्रकृतिच्छन्द: सूर्यो देवता अपामुपस्पर्शने विनियोग: ।

प्रात:आचमनम्—ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्य: पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यांपद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पन्तु यत्किञ्चिद् दुरितं मयि इदमहमामृत योनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ।

विनियोग:—ॐ आप: पुनन्त्विति विष्णुऋषिरनुष्टुप्छन्द: आपो देवता अपामुपस्पर्शने विनियोग: ।

मध्याह्नाचमनम्—ॐ आप: पुनन्तु पृथिवी पृथिवी पूता पुनातुमाम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातुमाम् ।
यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितंमम ।
सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं स्वाहा ।

विनियोग:—ॐ अग्निश्चमेति रुद्रऋषि: प्रकृतिश्छन्दोऽग्निर्देवता अपामुपस्पर्शने विनियोग: ।

सायमाचमनम्—ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्य: पापेभ्यो रक्षन्ताम् । यदह्नापापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदलुम्पतु यत्किञ्चिद दुरितं मयि इदमहमाममृत योनौ सत्ये ज्योतिषि जुहोमि स्वाहा ।

विनियोग:—ॐ आपोहिष्ठेत्यादि तृचस्य सिन्धुद्वीप ऋषिर्गायत्रीछन्द: आपो देवता राजसूयावभृथे (मार्जने) विनियोग: ।

मार्जनम्—ॐ आपोहिष्ठा मयोभुव: ॐ तान ऊर्जे दधातन । ॐ महेरणाय चक्षसे ॐ योव: शिवतमोरस: ॐ तस्य भाजयते हन: ॐ उशतीरिवमातर: ॐ तस्माऽअरङ्गमामव: ॐ यस्य क्षयायजिन्वथ ॐ आपोजन यथा च न: ।

विनियोग:—ॐ द्रुपदादिवेत्यस्य प्रजापति ऋषिरनुष्टुप्छन्द: आपोदेवता सौत्रामण्यवभृथे विनियोग: ।

करस्थजलैर्नासिकायोग:—ॐ द्रुपदादिवमुमुचान: स्विन्न: स्नातो मलादिव

पूतंपवित्रेणेवाज्यमाप: शुन्धन्तुमेनस: ॥

विनियोग:—ॐ अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो: भाववृतो देवता अश्वमेधावभृथे विनियोग: ।

अघमर्षणं जपेत्—ॐ ऋतञ्च सत्यञ्चाभीद्ध्वात्तपसोऽध्य जायत । ततो रात्र्य जायत । तत: समुद्रो अर्णव: । समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणिविदध द्विश्वस्यमिषतोवशी । सूर्या चन्द्रमसौ धाता यथा पूर्वमकल्पयत् । दिवंच पृथिवीं चान्तरिक्षमथो स्व: ।

विनियोग:—ॐ अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप छन्द: आपो देवता अपामुपस्पर्शने विनियोग: ।

आचमनम्—ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतो मुख: । त्वं यज्ञस्त्वं वषट्कार आपोज्योति रसोमृतम् ।

सूर्यार्घ्यम्—ॐ भूर्भुव: स्व: तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोन: प्रचोदयात् ।

विनियोग—ॐ उद्वयमित्यस्य प्रस्कण्व ऋषि: । सूर्योदेवता अनुष्टुछन्द: सूर्योपस्थाने विनियोग: ।

सूर्योपस्थानम्—मध्याह्ने उर्ध्वबाहु: सूर्यमुपतिष्ठेत् ।

ॐ उद्वयं तम सस्परि स्व: पश्यंत उत्तरं । देवं देवत्रा सूर्यमगन्मज्योतरुत्तिमम् । ॐ उदुत्यं जातवेदसं देवं वहंति केतव: । दृशे विश्वायसूर्यम् ।

ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने: आप्राद्यावापृथिवी अन्तरिक्ष ँ सूर्यऽआत्मा जगतस्तस्थुषश्च ।

ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत । पश्येमशरद: शतं जीवेमशरद: शत ँ श्रृणुयामशरद: शतं प्रब्रवामशरद: शतमदीना: स्यामशरद: शतंभूयश्चशरद: शतात् ।

अङ्गन्यास:—ॐ हृदयायनम: ॐ भू: शिरसे स्वाहा । ॐ भुव: शिखायै वौषट् ॐ स्व: कवचायहुम् ।

ॐ भूर्भुव: स्व: नेत्रात्रयाय वौषट् ॐ भूर्भुव स्व: अस्त्राय फट् ।

विनियोग:—ॐ कारस्य ब्रह्मा ऋषिर्गायत्री छन्दोऽग्निर्देवता । शुक्लो वर्णो गायत्री जपे विनियोग: ।

ॐ त्रिव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छंदांस्यग्नि वाय्वादित्यादेवताजपे विनियोग: ।

ॐ गायत्र्याविश्वामित्रऋषिर्गायत्रीछंद: सविता देवता जपे विनियोग: ।

गायत्र्या ध्यानम्—ॐ श्वेतवर्णा समुद्दिष्टा कौशेय वसना तथा ।
श्वेतैर्विलेपनै: पुष्पैरलंकारैश्चभूषिता ॥
आदित्यमण्डलास्था च ब्रह्मलोकगथायवा ।
अक्षसूत्रधरा देवी पद्मासनागताशुभा ॥

विनियोग:—ॐ तेजोसीति देवा ऋषयो गायत्री छंद: शुक्रं दैवतं गायत्र्या वाहनविनियोग: ।

आवाहनम्—ॐ ते जोसि शुक्रमस्यमृतमसि धामनामासि । प्रियं देवानामनाधृष्टं देव यजनयसि ॥

विनियोग:—तुरीय पदस्य विमलऋषि: परमात्मा देवता । गायत्री छंद: गायत्री उपस्थाने विनियोग: ।

गायत्र्युपस्थानम्—ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपद्यसि ।
नहि पद्यसे नमस्ते तुरीयायदर्शताय पदाय परोरजसेसावदोम् ॥

विसर्जनम्—ॐ उत्तमे शिखरे जाते भूम्यां पर्वत मूर्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥

अथ प्रायश्चित्ताङ्ग विष्णुपूजाप्रयोग:

संकल्प:—देशकालौ संकीर्त्याऽमुकशर्माहं मम सर्वपापक्षयार्थं श्री विष्णु: प्रीत्यर्थं विष्णुयागादिकर्मण: निर्विघ्नतयासिद्धयर्थं प्राश्चित्ताङ्गत्वेन गणमातृका ग्रहपूजापूर्वकं पुरुषसूक्तेन श्रीमहाविष्णु पूजां करिष्ये ।

विप्राज्ञया—हस्तमात्रं चतुरस्र स्थण्डिल त्रयं कृत्वा प्रथमस्थण्डिलोपरिगणमातृका: सम्पूज्य द्वितीयोपरि ग्रहान् तृतीयोपरि ।

यजमानः—तण्डुलैः अष्टदलं कृत्वा तन्मध्ये कलशस्थापनविधिना ताम्रकलशं स्थापयेत् कलशोपरि पट्टवस्त्रं प्रसार्य तत्र गन्धेन अष्टदलयंत्रं विलिख्य तन्मध्ये तुलसीदलोपरि शालिग्रामप्रतिमां स्वर्णमयीं विष्णुमूर्ति वा अग्न्युत्तारणपूर्विकां स्थापयेत् । तत्र स्वर्णमूर्तिश्चेत्तर्हि मूर्ति पात्रे निधाय प्राणप्रतिष्ठापन विधिना प्राणान् प्रतिष्ठाप्य पुष्पाणि विकीर्य स्वशरीरे विष्णुप्रतिमाङ्गे च पुरुषसूक्तन्यासं कुर्यात् "देवो भूत्वा देवं यजेत्" इति वाक्यात् । ततः न्यासान्ते कलशं शंख घंटे च सम्पूज्य देवं ध्यायन् घंटानादं कृत्वा षोडशोपचारविधिना महाविष्णोः पूजां कुर्यात् । ततः ॐ महाविष्णवे नमः । स्तुतिपाठं समर्प्य ॐ अनेन षोडशोपचार पूजनेन पापहा श्री महाविष्णुः प्रीयताम् । इति परमेश्वरार्पणं कुर्यात् । ततः पुरुषसूक्तेन प्रतिऋचं सन्तर्प्य मन्त्रान्ते सर्वत्र भगवान् पापहा महाविष्णुस्तृप्यताम् । इति तर्पणम् ।

अथ विष्णु श्राद्धम् ।

संकल्पः—देशकालौ संकीर्त्य प्रायश्चित्ताङ्गतया विष्णु श्राद्ध सम्पत्तये श्री विष्णूद्देशेन त्र्यधिक युग्म ब्राह्मणभोजन पर्याप्तंमामान्नं तन्निष्क्रयद्रव्यदानं करिष्ये ।

यजमानः—विष्णु स्वरूपं ब्राह्मणं गन्धादिना सम्पूज्य पापापहश्रीविष्णुप्रीतये विष्णुश्राद्धस्य सम्पूर्णतासिद्ध्यर्थं युग्मब्राह्मणभोजनपर्याप्तमामान्नं तन्निष्क्रय द्रव्यं वा अमुकशर्मणे ब्राह्मणाय तुभ्यमहंसम्प्रददे । एवं चतुर्भ्यो ब्राह्मणेभ्योदत्वा प्रायश्चित्ताङ्गमादौ गोदानं तन्निष्क्रयद्रव्यं वा दद्यात् ।

प्रत्यक्ष गोदानम्—देश कालौ संकीर्त्य प्रारीप्सित प्रायश्चित्तस्य पूर्वाङ्गतया विहितं गोदानं करिष्ये । इति संकल्प्य । ब्राह्मणं वृत्वा यथा विधि ब्राह्मण पूजनं धेनु पूजनं च कुर्यात् । ततो गोपुच्छे देवर्षि पितृ तर्पणं कृत्वा कांस्य पात्रे गो पुच्छं निधाय दुग्धतिल कुश सुवर्ण युतं कृत्वा दक्षिण हस्तेन गृहीत्वा देशकालौ संकीर्त्य मम समस्त पापक्षयार्थं पापहा श्री महाविष्णु प्रीत्यर्थंमिमां गां सवत्सां सोपस्करां यथाशक्ति विभूषितां रुद्रदैवतां तुभ्यमहंसम्प्रददे । इत्युच्चार्य संकल्पजलयुतं गोपुच्छं विप्रहस्ते दद्यात् ।

प्रार्थना—यज्ञसाधनभूता या विश्वस्याघौघनाशिनी । विश्वरूपधरो देवः प्रीयतामनया गवा ॥

यजमानः—गोदानसाङ्गता सिद्ध्यर्थं विप्राय दक्षिणां दत्वा अनेन गोदान कर्मणा पापापहः श्री महाविष्णुः प्रीयताम् । इति जलमुत्सृजेत् । गोदानासम्भवे यथाशक्ति तन्मूल्यंदेयम् ।

संकल्पः—देशकालौ संकीर्त्य प्रायश्चित्त पूर्वाङ्गतया विहितं यथाशक्ति गोनिष्क्रयी भूतं द्रव्यदानमहं करिष्ये । ब्राह्मणं सम्पूज्य देय द्रव्यं गृहीत्वा देशकालौ सकीर्त्य प्रायश्चित्तपूर्वाङ्गतया विहितमिदं गौनिष्क्रयीभूतंयथाशक्ति रजतद्रव्यं तुभ्यमहं सम्प्रददे ।

प्रायश्चित्तहोमः—तत्रादौ शुद्धमृत्तिकया चतुरस्रं स्थण्डिलंकृत्वा पञ्चभूसंस्कारपूर्वकमग्नि स्थापनं कृत्वा ॐ हुं फट् इतिमन्त्रेणक्रव्यादांशं नैऋत्यां दिशिकिंचित्परित्यज्य । ॐ अग्निन्दूतंम्पुरो दधे हव्यवाहमुपब्रुवे । देवां२ आसादयादिह । इतिमंत्रेण आत्माभिमुखमग्निं स्थापयेत् । अग्निपात्रयोः साक्षतोदकं निक्षिप्य अग्निमुखं कृत्वा ॐ चत्वारिश्रृंगा त्रयोऽअस्यपादाः द्वे शीर्षे सप्तहस्तासोऽअस्य । त्रिधाबद्धोवृषभो रोरवीति महो देवो मर्त्यां२ आविवेश । ॐ विट्नाम्ने अग्निपुरुषायनमः । वायव्यकोणे वहिरग्निं षोडशोपचारैः सम्पूज्य प्रार्थयेत् । ततःकुशकण्डिकां कृत्वा प्राजापत्यहोमं कुर्यात् ।

प्राजापत्यहोमः—ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । इतिमनसा । ॐ इन्द्राय स्वाहा । इदं इन्द्राय न मम । इत्याधारौ । ॐ भूः स्वाहा । इदमग्नये न मम । ॐ भुवः स्वाहा । इदं वायवे न मम । ॐ स्वः स्वाहा । इदं सूर्याय । ॐ भूर्भुवः स्वः स्वाहा । इदं प्रजापतये न मम । एवं सप्तवारान् कृत्वा (अष्टोत्तरशताहुतयो भवन्ति) एवं अष्टोत्तरशताहुती हुत्वा पञ्चगव्य होमं कुर्यात् । तत्र सार्ग्रैः सप्तपत्रकुशैः पञ्चगव्यं गृहीत्वा दशाहुतीर्जुहुयात् ।

ब्रह्मकूर्चहोमः—ॐ इरावती धेनुमती हि भूतं सूयवसिनीमनवे दशस्या । व्यस्कभ्नारोदसि विष्णवेतेदाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा । इदं पृथिव्यै न मम । ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् समूढमस्य

पा॰ सुरे स्वाहा। इदं विष्णवे न मम। ॐ मानस्तोके तनये मान आयुषि मानो गोषु मानोऽश्वेषु रीरिषः। मानोवीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे स्वाहा। इदं रुद्राय न मम। अत्र प्रणीतोदकस्पर्शः। ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंय्योरभिस्रवन्तुनः स्वाहा। इदं अद्भ्यो न मम। ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः। स बुध्न्या ऽ उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे न मम। ॐ अग्नये स्वाहा इदमग्नये। ॐ सोमाय स्वाहा। इदं सोमाय न मम। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोनः प्रचोदयात् स्वाहा। इदं सवित्रे न मम। ॐ स्वाहा इदं परमेष्ठिने न मम। ॐ भूर्भुवः स्वः स्वाहा। इदं प्रजापतयेन मम। ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। भूराद्या नवाहुतयः होतव्याः। ततः पूर्णाहुतिं भस्मधारणमेवं प्रायश्चित्त होमं समाप्य। व्रत ग्रहणं करिष्ये इति विप्रान् पृष्ट्वा कुरुष्व इति विप्राज्ञयाऽऽज्ञातः।

पञ्चगव्यप्राशनम्—ॐ यत्त्वगस्थिस्थितं पापं देहे तिष्टति मामके। प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥ प्रणवेन गृहीत्वा प्रणवेनैव सर्वं पञ्चगव्यं पिबेत्।

एतच्च सर्वंग्रामाद्वहिर्नद्यादेस्तीरे नक्षत्रदर्शने कार्यम। व्रतं निशामुखेग्राह्यं वहिस्तारंकदर्शने इति स्मृतिवाक्यात्॥ मुमूर्षोस्तु गृहादावेव कार्यम्। अस्मिन् दिने उपवासः।

अशक्तौ हविष्याशनम्॥ अयं च पञ्चगव्यस्य दशाहुति होमो ब्रह्मकूर्चाख्यपञ्चगव्यपाने सर्वत्र ज्ञेयः। ततो गृहमागत्य प्रायश्चित्तस्य-प्रत्याम्नायानुसारेणानुष्ठीय उत्तराङ्गाणि कुर्यात्।

संकल्पः—अमुक शर्मणो मे जन्मतः अद्यावधि ज्ञाताज्ञात पातकानां निरासार्थं गोनिष्क्रयंरजतदानं प्रत्याम्नायेनाङ्गीकृतस्य षडब्द प्रायश्चित्तस्य संसिध्यर्थमशीत्यधिकशतगोनिष्क्रय भूतं प्रतिकृच्छ्रं निष्कं वा तदर्धं वा तदर्धप्रमाणरजतं वा चन्द्रदैवतं नानानाम गोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे।

प्रायश्चित्तानुसारेण यथा शक्ति सहस्रं शतं पञ्चाशत पंचविंशति द्वादश संख्याकान् वा ब्राह्मणान् भोजयेत्। ततो यस्यस्मृत्येत्युक्त्वा परमेश्वरार्पणं कुर्यात्।

स्त्रीणांकृते प्रायश्चित्ते—स्त्रीणां होमः कृताकृतः। करणपक्षे विधवायाः क्षौरान्ते पूर्ववत् कृत्वा अमन्त्रकानि दश स्नानानि। सधवायास्तु संकल्पान्ते दन्तधावनं कृत्वा तूष्णींदशस्नानानि। वस्त्रपरिधानान्ते विष्णु श्राद्धगोदानानि कृत्वा प्रायश्चित्त होमार्थमाचार्यं त्वां वृणे। इति विप्रं वृत्वा पूर्ववत् विप्रद्वारा सर्वं पूर्वाङ्गं कारयित्वा स्वयं पञ्चगव्यं तूष्णीं प्राश्य मुख्य प्रत्याम्नाय द्रव्यं विसृज्योत्तराङ्गानि कारयेत्। होमाभाव पक्षे दशविधस्नानान्ते विष्णुश्राद्धगोदाने कृत्वा विप्रेण पञ्चगव्यं कारयित्वा तूष्णीं पञ्चगव्यं च प्राश्य प्रायश्चित्त द्रव्यं सङ्कल्प्यदत्त्वोत्तराङ्ग विष्णुश्राद्धगोदानदशदानानि कुर्यात्। अथ शूद्रस्य संकल्पान्तमविकृतं प्राग्वत्। ततः क्षौरान्तेऽमन्त्रकदशस्नानानि वस्त्र तिलक धारणान्ते विष्णु श्राद्ध गोदाने कृत्वा विप्रद्वारा पञ्चगव्यं कारयित्वा तूष्णीं पिबेत्। शूद्रेण कपिलायाः पञ्चगव्यानि न पेयानि। नास्यविप्रद्वारा होमः। प्रायश्चित्त द्रव्यं संकल्प्य देवोत्तराङ्गविष्णुश्राद्धगोदानानि दशदानानि च कुर्यात्।

अथ दशमहादानम्

गोदानम्—देशकालौ स्मृत्वा गोदान लभ्यफल प्राप्तिकाम इदं गोनिष्क्रयभूतं द्रव्यं गोत्रायशर्मणे सुपूजिताय तुभ्यमहं सम्प्रददे।

प्रार्थना—यज्ञसाधनभूता या विश्वस्यौघनाशिनी।
विश्वरूपधरोदेवः प्रीयतामनया गवा॥

अथ भूमिदानम्—ॐ अद्य॰ गोत्राय शर्मणे सुपूजिताय षष्ठिवर्षसहस्रवर्षपरिमितस्वर्गे शिवपुरनिवासकामः सर्वपापक्षयकामश्च इमां भूमिं बहुसस्यप्रदां विष्णुदैवतां तुभ्यमहं सम्प्रदे नममेति।

प्रार्थना— सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता।
अनन्तसस्यफलदा: अतः शान्ति प्रयच्छ मे॥
यस्यां रोहन्ति वीजानि काले चैव महीतले।
त्वत्प्रसादाच्च सफलाममसन्तु मनोरथाः॥

तिलदानम्—ॐ अद्य॰ गोत्रायशर्मणे इमान् तिलान् सोमदैवताकान् (विष्णुदैवताकान्) वा सर्वपापक्षयकामस्तुभ्यमहं सम्प्रददे नममेति।

प्रार्थना—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्त पुण्य फलदमतः शान्ति प्रयच्छमे ॥

आज्यदानम्—ॐ अद्य० गोत्राय शर्मणे इदमाज्यं विष्णुदैवतं समस्तपापक्षय-कामस्तुभ्यमहं सम्प्रददे नममेति ।

प्रार्थना—कामधेनोःसमुद्भूतं सर्वक्रतुषुसंस्थितम् ।
देवानामाज्यमाहारः अतः शान्ति प्रयच्छमे ॥

वस्त्रदानम्—ॐ अद्य० गोत्राय शर्मणेसमस्त पापक्षयकामः इमे वार्हस्पत्ये वाससी तुभ्यमहं संप्रददे नममेति ।

प्रार्थना—शीत वातोष्मसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्ति प्रयच्छ मे ॥

धान्यदानम्—ॐ अद्य० गोत्राय शर्मणे इदं धान्यं प्रजापति दैवतं समस्त पापक्षयपूर्वकैहिकामुष्मिकशिवफलावाप्तिकामस्तुभ्यमहं संप्रददेनममेति ।

प्रार्थना—सर्वदेव मयं धान्यं सर्वोत्पत्तिकरं महत् ।
प्राणिनां जीवनोपायम् अतः शान्ति प्रयच्छमे ॥

गुडदानम्—ॐ अद्य०मम समस्त पापक्षयपूर्वकं गृहे लक्ष्म्या स्थैर्यसिद्धिकामो गोत्रायशर्मणे सुपूजितायेमं गुडंस्सवयं सोमदैवतं सदक्षिणं तुभ्यमहं सम्प्रददे नममेति ।

प्रार्थना—गुड इक्षुरसोद्भूतो मन्त्राणां प्रणवोयथा ।
दानेनानेनमेतस्य परा लक्ष्मीः स्थिरा गृहे ।

रजतदानम्—ॐ अद्य० मम समस्त पापक्षयपूर्वकशिवविष्णुपितृप्रीति कामो गोत्रायशर्मणे सुपूजिताय इदं रजतं विष्णु दैवतं सदक्षिणं तुभ्यमहं सम्प्रददे नममेति ।

प्रार्थना—प्रीतिर्यतः पितृणां च विष्णु शंकरयोः सदा ।
शिवनेत्रो द्भवं रौप्यमतः शान्ति प्रयच्छ मे ॥

लवणदानम्—ॐ अद्य० मम समस्त पापक्षयपूर्वकशिवप्रीतिकामोगोत्राय शर्मणे सुपूजिताय इदं लवणं सर्व रसोत्कृष्टं सोमदैवतं सदक्षिणं तुभ्यमहं सम्प्रददे नममेति ।

प्रार्थना—यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ।
शम्भोः प्रीतिकरं यस्मादतः शान्ति प्रयच्छ मे ॥

इतिदशमहादानं समाप्तम् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यन्मया दूषितं देव परिपूर्णं तदस्तु मे ॥

अथ स्वास्तिपुण्याहवाचनम्

सपवित्रः पाणिराचम्य स्वात्मपूजां विधाय दिग्बन्धनानन्तरम् ।

प्रतिज्ञासंकल्प—अद्य विष्णुयाग साङ्गतार्थं यज्ञस्य निर्विघ्नता सिद्धयार्थं गणपति-पूजनपूर्वकं पुण्याहवाचनं करिष्ये । तत्रादौ तण्डुलैरष्टदलं कृत्वोक्तविधिना कलशंस्थापयेत् ।

भूमिस्पर्शः—ॐ महीद्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्षताम् ।
पिपृतानो भरीमभिः ॥

तण्डुलपुञ्जम्—ॐ ओषधयः समवदन्त सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजनपारयामसि ॥

कलशस्थापनम्—ॐ आजिघ्रकलशं मह्या त्वा विशन्त्विन्दवः पुनरूर्ज्जा ।
निवर्त्तस्वसानः सहस्रं धुक्ष्वोरुधारा पयस्वतीः पुनर्म्मा विशताद्रयिः ॥

जलपूरणम्—ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्ज्जनी स्थोवरुणस्यऽ ऋत सदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीत् ॥

तीर्थजलम्—इमम्मे गंगे यमुने सरस्वति शुतुद्रिस्तोमे स च तापरुष्ण्या ।
मरुद्वृधे वितस्तयार्जीकीये श्रृणु ह्यासुषोमया ॥

गन्धक्षेपः—ॐ त्वां गन्धर्वा ऽअखनंस्त्वामिन्द्रस्त्वां वृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥

सर्वौषधीः—ॐ याऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुग पुरा ।
मनैनु बभ्रुणामहं शतंधामानि सप्त च ॥

दूर्वा—ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

पञ्चपल्लवाः—ॐ अश्वत्थेवोनिषदनं पर्णेवो वसतिष्कृता ।
गोभाजऽइत्किलासथयत्सनवथ पुरुषम् ॥

सप्तमृत्तिका—ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छानः शर्म सप्रथाः ॥

पूंगीफलम्—ॐ या फलिनीर्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पति प्रसूतास्ता नो मुञ्चन्त्व ँ हसः ॥

पंचरत्नम्—ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानिदाशुषे ॥

सुवर्णखण्डम्—ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

रक्तवस्त्रम्—ॐ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः ।
वासोऽअग्ने विश्वरूप ँ संव्ययस्व विभावसो ॥

पूर्णपात्रम्—ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहाऽइषमूर्ज ँ शतक्रतो ॥

श्रीफलम्—ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ँ हसः ॥

वरुणावाहनम्—ॐ तत्वायामि ब्रह्मणावन्दमानस्तदाशास्तेयजमानो हविर्भिः ।
अहेडमानो वरुणेह वोध्युरुश ँ समानऽआयुः प्रमोषीः ॥
अस्मिन्कलशे साङ्गं सपरिवारं सायुधं सशक्तिकं वरुणं आवाहयामि ।

देवतावहनम्—ॐ कलाः कला हि देवानां दानवानां कलाः कलाः ।
संगृह्य निर्मितोयेन कलशस्तेन कथ्यते ॥
कलशस्य मुखे विष्णुर्ग्रीवायां तु महेश्वरः ।
मूले तस्यस्थितो ब्रह्मामध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सप्तद्वीपा वसुन्धरा ।
अर्जुनी गोमती सर्यू चन्द्रभागा सरस्वती ॥
कावेरी कृष्णवेणी च गङ्गा चैव महानदी ।
तापी गोदावरी चैव माहेन्द्री नर्मदा तथा ॥
नदाश्च विविधा जाता नद्यः सर्वास्तथा परा ।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै ॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु मम शान्त्यर्थं दुरितक्षय कारकाः ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्चसहिताः सर्वे कलशं तु समाश्रिताः ॥
शान्तिः पुष्टिश्च गायत्री सावित्री कलशेस्थिताः ।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥

प्रतिष्ठा—ॐ मनोजूतिर्जुषतामज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमन्दधातु । विश्वेदेवासऽइहमादयन्तामोम्प्रतिष्ठ । कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु ॥

कलशस्थदेवपूजा—ॐ कलशे आवाहितवरुणादि देवताभ्यो नमः पादयोः पाद्यम् हस्तयोरर्घ्यं । मुखे आचमनीयम् । सर्वांगेषु स्नानीयम् । गन्धाक्षत पुष्पधूपदीपनैवेद्य दक्षिणादि यथासम्भवोपचाराणि समर्पयामि ।

प्रार्थना—ॐ देवदानव संवादे मथ्यमाने महोदधौ
उत्पन्नोऽसितदाकुम्भविधृतो विष्णुनास्वयम् ।
त्वत्तोये सर्वतीर्थाणिदेवाः सर्वे त्वयिस्थिताः ।
त्वयितिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः ।
आदित्यावसवोरुद्राः विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपियतः कामफलप्रदाः ॥
त्वत्प्रसाददिमं यज्ञंकर्तृमीहे जलोद्भव ॥
सानिध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।
अनया पूजया कलशे वरुणाद्यावाहितदेवताः प्रीयन्ताम् ।
ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

ततः पुण्याहवाचनम् ॥

कलश स्थापन विधिना कलशं संस्थाप्य पुण्याह वाचकेभ्यो वेदविद्भ्यो नमः इति वेदविदो विप्रान् गन्धादिभिरभ्यर्च्य प्रधानाचार्यं विशेषवरण द्रव्यैर्वृत्वा वरण द्रव्यच तुष्टयमादाय वरणं कुर्यात् ।

विप्रवरण संकल्पः—ॐ अद्येत्यादि अमुकोऽहं करिष्यमाण विष्णुयज्ञकर्मणः [illegible] कर्मणि एभिर्वरण द्रव्यैः अमुकामुकगोत्रान् ऋग्यजुः सामाथर्व विदो विप्रान् अमुकामुकशर्मणो युष्मान् अहं वृणे ।

विप्रा:—वृता: स्म: । इति विप्रा: प्रतिब्रूयु: ।

वरणमन्त्र:—ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।

दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।।

यजमान:—अवनिकृतजानुमण्डल: कमलमुकुलसदृशमञ्जलिं शिरस्याधाय कलशंधारयित्वाऽऽशिषं प्रार्थयेत् ।

प्रार्थना—ॐ दीर्घानागा नद्यो गिरयस्त्रीणि विष्णु पदानि च । त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्य: अतोधर्माणि धारयन् तेनायु: प्रमाणेन पुण्यं पुण्याह दीर्घमायुरस्तु ।।३।।

विप्रा:—अस्तु दीर्घमायु: ।३ ।

यजमान:—अपांमध्ये स्थिता देवा: सर्वमप्सु प्रतिष्ठितम् ।

ब्राह्मणानां करे न्यस्ता: शिवा आपो भवन्तु मे ।।

शिवा आप: सन्तु इति विप्र हस्तेषु जलं दद्यात् ।

विप्रा:—सन्तु शिवा आप: ।।३।। इति विप्रा: प्रतियुयु: ।

यजमान:—लक्ष्मीर्वसतु पुष्पेषु लक्ष्मीर्वसति पुष्करे ।

सा मे वसतु वै नित्यं सौमनस्य तथास्तुन: ।।

ॐ सौमनमस्यमस्तु ।।३।। इति विप्र हस्तेषु पुष्पं दद्यात् ।

विप्रा:—अस्तु सौमनस्यम् । इति प्रतिवचनम् ।

यजमान:—अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम् ।

यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ।।

ॐ अक्षतं चारिष्टं चास्तु इति विप्रहस्तेषु अक्षतान् दद्यात् ।

विप्रा:—अस्त्वक्षतमरिष्टं च ।।३।।

यजमान:—ॐ गन्धा: पान्तु इति विप्र हस्तेषु गन्धं दद्यात् ।

विप्रा:—सौमङ्गल्यं चास्तु ।

यजमान:—ॐ अक्षता: पान्तु इति विप्रहस्तेषुवक्षतान् दद्यात् ।

विप्रा:—आयुष्यमस्तु ।

यजमान:—ॐ पुष्पाणि पान्तु इति पुष्पाणि विप्रहस्तेषु दद्यात् ।

विप्रा:—सौश्रियमस्तु ।

यजमान:—ॐ ताम्बूलानि पान्तु विप्रहस्ते ताम्बूलं दद्यात् ।

विप्रा:—ऐश्वर्यमस्तु ।

यजमाना:—ॐ दक्षिणा: पान्तु विप्रहस्तेषु दक्षिणां दद्यात् ।

विप्रा:—बहुदेयं चास्तु ।

यजमान:—ॐ सर्वाचितमस्तु विप्रहस्तेषु जलं दद्यात् ।

विप्रा:—अस्त्वर्चितम् ।

प्रार्थना—ॐ दीर्घमायु: शान्ति: पुष्टिस्तुष्टि: श्रीर्यशो—

विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु इति विप्रान् प्रार्थयेत् ।

यजमान:—यं कृत्वा सर्ववेदयज्ञ क्रियाकरण कर्मारम्भा: शुभा: शोभना: प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजु: सामाथर्वाशीर्वचनं बहुऋषि-सम्मतं समनुज्ञात: पुण्यं पुण्याह वाचयिष्ये । इति वदेत् ।

विप्रा:—वाच्यताम् ३ ।

ऋक:—ॐ द्रविणोदा द्रविण सस्तु रस्यं द्रविणोदा: सनरस्य प्रयंसत् ।

द्रविणोदा वीरवती मिषन्नो द्रविणोदा रासते दीर्घमायु: ।।१।।

सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविता धरात्तात् ।

सविता न: सुवतु सर्वताति सविता नो रासतां दीर्घमायु: ।।२।।

नवो नवो भवति जायमानो ऽह्नां केतुरुषसामेत्यग्रम् ।

भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायु: ।।३।।

उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदा: सहते सूर्येण ।

हिरण्यदा अमृतत्वं भजन्ते वासोदा: सोमप्रतिरन्त आयु: ।।४।।

यजु:—ॐ द्रविणोदा: पिपीषति जुहोत प्रचतिष्ठत । नेष्ट्रा दृतु भिरिष्यत ।।१।।

सवितात्वा सवाना ँ सुवतामग्नि गृहपतीना ँ सोमो वनस्पतीनाम् ।

बृहस्पतिर्वाच ऽ इन्द्रो ज्यैष्ठाचाय रुद्र: पशुभ्यो मित्र: सत्यो वरुणो धर्म्मपतीनाम् ।।२।।

न तद् रक्षां ँ सि न पिशाचास्तरन्ति देवानामोजः प्रथम् ज ँ ह्येतत् ।

यो बिभर्ति दाक्षायण ँ हिरण्य ँ स देवेषु कृणुते दीर्घमायुः स

मनुष्येषु कृणुते दीर्घमायुः ॥३॥

उच्चाते जातमन्धसो दिवि सद्भूम्याददे । उग्र ँ शर्म महिश्रवः ॥४॥

उपास्मै गायता नरः पवमानायेन्दवे । अभिदेवां २ इयक्षते ॥५॥

५र४ २ ४ ५र २र१र २र १२ १ २
साम:—ॐ देवो ३ वो ३ द्रविणोदाः । पूर्णां वि व ष्ट्वा सिचम् । उ द्वा
१ २र १ ७ १ र २ र १
सिञ्चा र । ध्व मुप वा पृणाध्वम् । आ दि द्वोदेर । व ओ ह ते इ डा
२ १
२ ३ भा ३ ४ ३ । ओ २ ३ ४ ५ इ । डा ॥१॥
५४ ५र र ४र ५र २१ र
अध नो देव सवितः । ओ हो वा । इ ह श्रु धायि । प्रजा वा २ ३
२ र २ १२ २ १
त्सा वीः । सौभगाम् । पराद्रू २ ३ ष्वा ३ । हो बा २ ३ हा । प्निय ँ सू
१ २ १ १ १ १ १
२ ३ ४ ५ वा ६ ५ ६ । दक्षा ३ या २ ३ ४ ५ ॥२॥
२ १ र १ २ १र २ १र १ र
चन्द्रमा आउवा । प्सु वान्ता राउवा । सुपर्णो धाउवा । वतेदिवि न वो
२ १ २ १ २ १ १
हि राउवा । ण्यनायिमा याउवा । पद विन्दाउवा । ति विद्युताः वित्तंमा
२ १
आउवा । स्यरोदा २ ३ सा ३ ४ ३ यि ओ २ ३ ४ ५ इ । डा ॥३॥
५ २ २ ४र ५ २ १ २ १
उच्चाता ३ यि जात मन्धसाः । दिवाई सा १ दभू २ । मिया २ ३
२ २१ २ २ २र ३
ददायि । उग्र ँ शर्म्मा । महा २ ३ यि श्रवाउ । वा ३ । स्तौष

१ १ १ १
२ ३ ४ ५ ॥४॥
४ ३ र ४ २ ४र ५ २ १ २ २ १
उ पा ५ ५ स्मै । गा ३ या ३ तानाराः । पा ३ वामा ३ ना । या २ ३
२ १ २ २ १ र ३ २
आ । हुम्मायि । दा ३ वायि । अभिदेवां ँ इया २ क्षताउ ।
१ १ १ १ १
वा २ ३ ४ ५ ॥५॥

अथर्वण: ॐ धातारातिः सवितेदं जुषन्तां प्रजापतिं निधिपति र्नो अग्निः ।

त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणन्दधातु ॥१॥

येन देवं सवितारम्परिदेवा अधारयन् । तेनेदम्ब्रह्मणस्पते परिराष्ट्राय

धत्तन ॥२॥

अहोरात्राभ्यां नक्षत्रेभ्यः सूर्याचन्द्रमसाभ्याम् । भद्राहमस्मभ्यं राजञ्छक

धूम त्वं कृधि ॥३॥

उच्चायतंन्तमरुणं सुपर्णमध्ये दिवस्तरणिं भ्राजमानम् । पश्याम त्वा

सवितारं यमाहु रजस्रं ज्योतिर्यदविंददत्रिः ॥४॥

यजमान:—व्रत जप नियम तपः स्वाध्यायशमदम दया दान विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् इति विप्रान् प्रार्थयेत् ।

विप्रा:—समाहित मनसः स्मः ।

यजमान:—प्रसीदन्तु भवन्तः इति वदेत् ।

विप्रा:—प्रसन्ना स्मः ।

यजमान:—पूर्वोक्त रीत्याऽवनि कृत जानु मण्डलः कमलमुकुलसदृशं अञ्जलि शिरस्या धाय तत्र तमेव कलशं धारयित्वा कलशजलं अन्यस्मिन् पात्रे वक्ष्यमाण प्रकारेण प्रतिवचनं दद्यात् । ॐ शान्तिरस्तु अस्तु इति प्रति-वचनम् पुष्टिरस्तु । ॐ तुष्टिरस्तु ॐ वृद्धिरस्तु ॐ अविघ्नमस्तु

ॐ आयुष्यमस्तु ॐ आरोग्यमस्तु ॐ शिवमस्तु ॐ शिवं कर्मास्तु ॐ कर्मसमृद्धिरस्तु ॐ धर्मसमृद्धिरस्तु ॐ वेदसमृद्धिरस्तु ॐ शास्त्रसमृद्धिरस्तु ॐ धनधान्यं समृद्धिरस्तु ॐ पुत्रपौत्रसमृद्धिरस्तु ॐ इष्ट सम्पदस्तु (द्वितीय पात्रे) अरिष्टनिरसनमस्तु ॐ यत्पापं तत्प्रतिहतमस्तु। (पुनः पात्रे) ॐ यत् श्रेयस्तदस्तु ॐ उत्तरे कर्मणि निर्विघ्नमस्तु ॐ उत्तरोत्तरमहर हरभिवृद्धिरस्तु ॐ उत्तरोत्तरा: क्रिया: शुभा: शोभना: सम्पद्यन्ताम्। इष्टकामा: सम्पद्यन्ताम् ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवता: प्रीयन्ताम् ॐ तिथिकरणे सुमुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदेवते प्रीयेताम् ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् ॐ अग्निपुरोगा विश्वदेवा: प्रीयन्ताम् ॐ इन्द्रपुरोगा मरुद्गणा: प्रीयन्ताम् ॐ ब्रह्मपुरोगा: सर्वेदेवा: प्रीयन्ताम् ॐ विष्णुपुरोगा: सर्वे देवा: प्रीयन्ताम् ॐ महेश्वरी पुरोगा उमामातर: प्रीयन्ताम् ॐ वसिष्ठ पुरोगा ऋषिगणा: प्रीयन्ताम् ॐ अरुन्धती पुरोगा एकपत्न्य: प्रीयन्ताम् ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॐ श्री सरस्वत्यौ प्रीयेताम्। ॐ श्रद्धामेधे प्रीयेताम् ॐ भगवती कात्यायनी प्रीयताम् ॐ भगवती माहेश्वरी प्रीयताम् ॐ भगवती पुष्टिकरी प्रीयताम् ॐ भगवती तुष्टिकरी प्रीयताम ॐ भगवतीऋद्धिकरी प्रीयताम् ॐ भगवती वृद्धिकरी प्रीयताम ॐ भगवन्तो विघ्नविनायकौ प्रीयेतास् ॐ सर्वा: कुलदेवता: प्रीयन्ताम् ॐ सर्वाग्रामदेवता: प्रीयन्ताम ॐ सर्वा इष्टदेवता: प्रीयन्ताम् ततो जलंवहिर्देशे ॐ हताश्चब्रह्मद्विष: ॐ हताश्च परिपन्थिन: ॐ हताश्च विघ्नकर्तार: ॐ शत्रव: पराभवंयान्तु ॐ शाम्यन्तु घोराणि ॐ शाम्यन्तु पापानि ॐ शाम्यन्त्वीतय: (पुन: पात्रे) ॐ शुभानि वर्द्धन्ताम् ॐ शिवाआप: सन्तु ॐ शिवा ऋतव: सन्तु ॐ शिवा अग्नय: सन्तु ॐ शिवा आहुतय: सन्तु ॐ शिव: वनस्पतय:सन्तु ॐ शिव: ओषधय: सन्तु ॐ शिवा अतिथय: सन्तु ॐ अहोरात्रे शिवेस्याताम्।

ऋक्—ॐ शंव: कनिक्रदद्देव: पर्जन्यो अभिवर्षत्वोषधय: प्रतिधीयतम्॥ शन्नो द्यावा पृथिवी शम्प्रजाभ्य: शन्नो अस्तु द्विपदे शञ्चतुष्पदे॥

यजु:—ॐ आब्रह्मन् ब्राह्मणो ब्रह्म वर्च्चसी जायतामाराष्ट्रे राजन्य: शूर ऽ इषव्योति व्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशु: सप्ति: पुरन्धिर्योषा जिष्णू रथेष्ठा: सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे न: पर्जन्यो वर्षतु फलवत्यो न ऽ ओषधय: पच्यन्तां योगक्षेमो न: कल्पताम्॥

साम:—ॐ त्वष्टा ३ ४। नो दैविम्। वचा:। पर्जन्यो ब्रह्मणस्पा २ ३ ती:। पुत्रै भ्रातृभिरदिति र्नू पातु २ ३ ना:। दुष्टारा २ ३ न्त्रा। मेणांवा २ ३ वा २ ४ ३:। ओ २ ३ ४ ५ इ। डा॥

अथर्वण:—ॐ गणास्त्वोपगायन्तु मारुता: पर्जन्य घोषिण: पृथक्। सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवी मनु॥

यजमान:—ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादन कारकम्।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु न:॥
भो ब्राह्मणा: मम सकुटुम्बस्य सपरिवारस्य च गृहे करिष्यमाण
अमुक कर्मण: पुण्याहं भवन्तो ब्रुवन्तु इति त्रिर्ब्रूयात्।

विप्रा:—पुण्याहम् ३।

ऋक्—ॐ उद्गातेव शकुने सामगायसि ब्रह्मपुत्र इव सवनेषु शंससि। वृषेव वाजी शिशुमतीरपीत्या सर्वतो न: शकुने भद्रमावद विश्वतो न: शकुने पुण्यमावदे॥

यजु:—ॐ पुनन्तु मा देवजना: पुनन्तु मनसा धिय:। पुनन्तु विश्वा भूतानि जातवेद: पुनीहिमा॥

र र र १ ५ १र रर र

साम:—ॐ पुनान: सोमा ३ धारा २३४ या। आपो वसानो अर्षस्या

र र ३र १२ २१रर

रत्नधा योनिमृतस्यसा २ यि दसायि। ओ हा ३ उ वा उत्सो देवोहि

२ १२ २ १ २ ४५ ४

रा २ ३ हायि। ओ हा ३ उ वा। ण्य या। ओ ३ हो वा। हो

५ इ। डा॥

अथर्वण:—ॐ पुनन्तु मा देवजना: पुनन्तु मनवो धिया।

पुनन्तु विश्वो भूतानि पवमान: पुनातु मा॥

यजमान:—ॐ पृथिव्यामुद्धृतायान्तु यत्कल्याणं पुराकृतम्।

ऋषिभि: सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तुन:।

भो ब्राह्मणा: मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मण:

कल्याणं भवन्तो ब्रुवन्तु इति त्रिर्ब्रूयात्।

विप्रा:—अस्तु कल्याणम् ३ इति त्रि प्रतिब्रूयु:।

ऋक्—ॐ अग्ना: सोम मस्तमिन्द्र प्रयाहि कल्याणी जाया सुरणं गृहे ते।

यत्रा रथस्य वृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥

यजु:—ॐ यथेमां वाचं कल्याणी मावदानि जनेभ्य:। ब्रह्म राजन्याभ्या

शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै

दातुरिह भूयासमयं मे काम: समृध्यतामुपमादो नमतु।

३ र ४ २ ४र५ १ र २१र२ १

साम:—ॐ का ५ या। नश्चा ३ यित्रा ३ आभुवात्। ऊ। ती सदावृध: स।

२ र२ १ २ ३र२ १

खा। औ ३ हो होयि। कया २३ शचायि। ष्ट यो हो ३। हुम्मा २।

१ २

वा २ त्तो ३५ हायि॥

अथर्वण:—ॐ विश्वजित् कल्याण्यै मापरिं देहि। कल्याणि द्विपाच्च

सर्वन्नो रक्ष चतुष्पाद्यच्च न स्वम्॥

यजमान:—ॐ सागरस्यतु या ऋद्धिर्महालक्ष्म्यादिभि: कृता।

सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तुन:॥

भो ब्राह्मणा मम सकुटुम्बस्य सपरिवारस्य गृहे अमुक कर्मण:

ऋद्धिं भवन्तों ब्रुवन्तु। इति वारत्रयं ब्रूयात्।

विप्रा:—ऋद्ध्यताम् ३।

ऋक्—ॐ ऋध्यामस्तोमं सनुयाम वाजमानो मन्त्रं सरथे होपयातम्। यशो न

पक्वं मधुगोष्वन्तरा भूतांशो अश्विनो: कामंमप्रा:॥

यजु:—ॐ सत्रस्य ऽऋद्धिरस्यगन्म ज्योतिरमृता ऽअभूम। दिवम्पृथिव्या

ऽअध्यारुहामा विदाम देवान्त्स्वर्ज्योति:॥

२रर र १ २१र२ २१र२र १ २

साम:—ॐ औ हो वा।३। अगन्म ज्योति:।३। अमृता अभूमा।३।। अन्तरिक्षं

१र र२रर १ २ २२१र२र १२र र१र

पृथिव्या अध्यारुहाम।३। दिवमन्तरिक्षादध्यारुहाम।३। अविदाम देवान्

१२र१र३ २रर र २र १ र३१११ १

।३। समुदेवैरगन्महि।३। औ हो वा।३।।ए। सुवर्ज्योति २ ३ ४ ५ :॥

अथर्वण:—ॐ ऋधङ् मन्त्रो योनि य आबभूवामृतासु वर्द्धमान: सुजन्मा।

अदब्धासु भ्राजमानो हेवत्रितो धर्तादाधारत्रीणि॥

यजमान:—ॐ स्वस्तिर्या अविनाशाख्या पुण्य कल्याण वृद्धिदा।

विनायक प्रिया नित्यं तां च स्वस्ति ब्रुवन्तुन:॥

भो ब्राह्मणा: मम सकुटुम्बस्य सपरिवारस्य गृहे अमुक कर्मण:

स्वस्ति भवन्तो ब्रुवन्तु इति त्रिर्ब्रूयात्।

विप्रा:—स्वस्ति ३

ऋक्—ॐ स्वस्ति ऋद्धि प्रपथे श्रेष्ठा रेक्णं स्वस्त्यभिया वा ममेति ।

सा नो अमासो अरणे निपातु स्वा वेशा भवतु देव गोपा ॥

यजु:—ॐ स्वस्तिन ऽ इन्द्रो वृद्धश्रवा: स्वस्तिन: पूषा विश्ववेदा: ।

स्वस्तिन स्तार्क्ष्यो ऽ अरिष्टनेमि: स्वस्तिनो बृहस्पति र्दधातु ॥

२र २र ७ २ १र र

साम:—ॐ त्रातारमिन्द्रमविता । रमी २ ३ न्द्राम् । हवे हवे सुहव ँ शू ।

७ २ १ ७ २ २१

रमी २ ३ न्द्राम् । हुवाई नु शक्रं पुरुहू । तमी २ ३ न्द्राम् । इद ँ

२१ र २१र २ २ ४

स्वस्तिनो मघवा । वा ३ ४ ३ इ । तू ३ वा ५ इन्द्रा ६ ५ ६: ॥

अथर्वण:—ॐ स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते

पुरुषेभ्य: । विश्वं सुभूतं सुविदत्रंनो अस्तु ज्योगेव दृशेम सूर्य्यम् ॥

यजमान:—मृकण्डुसूनोरायुर्यद्ध्रुव लोमशयोस्तथा ।

आयुषा तेन संयुक्ता: जीवेम शरद: शतम् । इति त्रिवारं ।

विप्रा:—शतं जीवन्तु भवन्त: ॥

ऋक्:—ॐ शतं जीव शरदो वर्द्धमान: शत हेमन्तान्छतमु वसन्तान् ।

शत मिन्द्राग्नी सविता बृहस्पति: शतायुषा हविषेमं पुनर्दु: ॥

यजु:—ॐ शतमिन्नु शरदो ऽ अन्तिदेवा यत्रा नश्चक्रा जरसंन्तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिषता युर्गन्तो: ॥

१र र र २ र १र २१ १र

साम:—ॐ आयु विश्वायु विश्वं विश्वमायुरशीमहि । प्रजान्त्वष्टरधिनिधे

२ १र २१र २र १२र १ ३ ११११

ह्यस्मै । शतञ्जीवेम शरदो वयन्ते २३४५ ॥

अथर्वण:—ॐ आयुरस्मै धेहि जातवेद: प्रजां त्वष्टरधि निधे ह्यस्मै ।

रायस्पोषं सवितरा सुवास्मै शतञ्जीवाति शरदस्तवायम् ॥

यजमान:—शिवगौरी विवाहे याया श्रीरामे या नृपात्मजे ।

धनदस्यगृहे या श्री रस्माकं सास्तु सद्मनि ॥

विप्रा:—अस्तु श्री: ३ ।

ऋक्—ॐ श्रिये जात: श्रिय आविरियाय श्रियंवयो जरितृभ्यो दधाति ।

श्रियं वसाना अमृतत्वमायन् भवन्ति सत्यासंमिथा मितद्रौ ॥

यजु:—ॐ मनस: काममाकूतिं वाच: सत्यमशीय । पशुना ँ रूपमन्नस्य

रसो यश: श्री: श्रयताम्मयि स्वाहा ॥

५र ५ १ १ १

साम:—ॐ श्रायन्त इवसू ४ रायम् । विश्वा २ इ दिन्द्रा २ । स्यमा २

१ र२ २र २१२ १ २२१ २र

क्षाता । वासूनि जातो जनिमा । नियोजा १ सा २ । प्रति भागन्नदी

र १ २ १र २ २ १र ३२ १

२ धिम: । प्रा २ ३ ती । भागान्ना ३ दा । हुम् । धिमा ३: । औ

५

२ ३ ४ वा । श्रिये १ ॥

अथर्वण:—ॐ एहयातु वरुण: सोमो अग्नि बृहस्पतिवसुभिरेह यातु ।

अस्य श्रिय मुप संयात सर्व उग्रस्य चेत्तु: सं मनस: सजाता: ॥

यजमान:—ॐ प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ।

भगवान शाश्वतो नित्यं नो रक्षतु च सर्वत: ॥

ॐ भगवान् प्रजापति: प्रीयताम् इति उदक त्याग: ।

ऋक्—ॐ प्रजापते नत्व देतान्यो विश्वा जातानि परिता बभूव । यत्कामास्ते

जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥

यजुः—ॐ प्रजापते न त्व देतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो ऽअस्त्वयममुष्य पिता सावस्य पिता वयꣳ स्याम पतयो रयीणाꣳ स्वाहा ॥

२र १र र र२र १
सामः—ॐ हाउ । ३ । इमाः । ३ । प्रजाः । ३ । प्रजापते । होइ ॥ ३ ॥
र२र २ २र १२ २ १रर
प्रजापते । हा ३ १ उ वा २ । ए । हृदया ३ १ उ । वा २ । प्रजारूपम-
रर २१रर २र २१रर २१ १ १११
जीजने । प्रजारूपमजीजने । प्रजारूपमजीजने । इट् इडा २ ३ ४ ५ ॥

अथर्वणः—ॐ प्रजापते रावृतो ब्रह्मणावर्म णाहं कश्यपस्य ज्योतिषा वर्चसा च । जरदष्टिः कृतवीर्यो विहायाः सहस्रायुः सुकृतश्चरेयम् ॥

यजमानः—आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।
श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ॥

विप्राः—ॐ आयुष्मते स्वस्ति ३ ।

ऋक्—ॐ स्वस्तये वाजिभिश्च प्रणेतः संयन्महीरिष आसत्सि पूर्वीः । रायो वन्तारो वृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ।

यजुः—ॐ प्रतिपन्था मपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परिद्विषो वृणक्ति विदन्ते वसु ॥

५र २र १२१ २रर३ ५र३२
सामः—ॐ त्यमूषू । वाजि । ना ३ ४ ५ म् । देवजूता २ ३ ४ ५ सहोवा-
२१ २ २ ३४५ २ ५ २
नान्ता । रुता ३ । रꣳ रथानाम् । अरिष्टना २ ३ ४ इभीम् । पृतना
२३र५ २ १ र २
३ ४ ३ जमाशुम् । स्वस्त । या ३ । तार्क्ष्यमिहा ३ ४ ३ हू ३ वा ५
इ मा ६ ५ ६ ॥

अथर्वणः—ॐ वेदः स्वस्तिद्रुघणः स्वस्तिः परं शुर्वेदिः परशुर्नः स्वस्ति । हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम् ॥

यजमानः—अत्र प्रधान देवाय महाविष्णवे नमः विष्णुः प्रीयताम् ।
इति कलश जलं अधःस्थित पात्रे पूर्ववत् क्षिपेत् ॥
ॐ स्वस्ति पुण्याहवाचन कर्मसमृद्धिरस्तु । इति त्रिः ।

विप्राः—ॐ अस्तु समृद्धिः ।

अभिषेकः—चतुः स्वस्ति पयः पञ्च विष्णोः षट् द्वादश देवताः
प्रातः षट्, पञ्चभगः, पञ्चैन्द्रैः, पञ्चवारुणैः ।
षड्वातैः, शान्तिरष्टौ, जपान्मृत्युर्विनश्यति ॥ (संस्कारगणपति)

ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषा० पुनातु ।। ॐ पयः पृथिव्यांपयऽओषधीषु पयो० पुनातु ॥ ॐ विष्णोरराटमसि विष्णोः श्नप्त्रे० पुनातु ॥ ॐ अग्निर्देवता वातो देवता सूर्यो० पुनातु ॥ ॐ प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुतरुद्रꣳ हुवेम ॥ पुनातु ॥ ॐ भगप्रणेतर्भगसत्यराधोभगेमांधियमुदवा ददन्नः । भगप्रणो जनय गोभिरश्वैर्भगं प्रन्नृभिर्नृवन्तः स्याम ॥ पुनातु ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे० पुनातु । ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भ० पुनातु । ॐ समुद्रायत्वा वातायस्वाहा सरिराय त्वा वाताय स्वाहा । अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्यायत्वा वाताय स्वाहा । अवस्यवे त्वा वाताय स्वाहा शिमिदायत्वा वाताय स्वाहा ॥ पुनातु ॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः० पुनातु ॐ यतोयतः समीहसे ततो नोऽभयं कुरु । शन्नः कुरु प्रजाभ्योभयन्नः पशुभ्यः ॥ ॐ शान्तिः ३ ॥ अमृताभिषेकोऽस्तु ।

विप्राः—अस्त्वमृताभिषेकः ।

विप्र दक्षिणा—ॐ अद्य पुण्याहवाचन साद्गुण्यार्थमिमां दक्षिणां प्रजापति दैवतांकाममुकामुकगोत्रेभ्योऽमुकशर्मभ्यऽऋग्यजुः सामाथर्वविद्भ्यो विप्रेभ्यो

विभज्य दातुमहमुत्सृजे न मम ।

आचार्य दक्षिणा—ॐ अद्य कृतैतत्पुण्याहवाचन सांगता सिद्ध्यर्थमिमां दक्षिणां प्रजापति दैवताकां यथा नाम गोत्राय आचार्याय दातुमहमुत्सृजे ॥

आयुष्यतिलकम्—ॐ दीर्घायुस्त ऽओषधे खनिता यस्मै च त्वां खनाम्यहम् । अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥

आशीर्वाद:—ॐ पुनस्त्वादित्या रुद्रावसव: समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञै: । घृतेन त्वं वर्धयस्व सत्या: सन्तु यजमानस्य कामा: ।

मन्त्रार्था: सफला: सन्तु पूर्णा: सन्तु मनोरथा:
शत्रूणां बुद्धि नाशोऽस्तु मित्राणामुदयस्तथा ॥

ॐ श्रीवर्च्चस्वमायुष्यमारोग्य माविधात्पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायु: ॥

अनेन पुण्याहवाचन कर्मणा भगवान् विष्णु: प्रीयताम् ।

॥ शुभमस्तु ॥

॥ अथ नान्दी श्राद्धम् ॥

अथ प्रयोगादौ—अत्र निखिल निबन्ध सारभूत निर्णयस्तु धर्मसिन्धु तृतीय परिच्छेदारम्भे गर्भाधान संस्कारादौ द्रष्टव्य: । अत्र स्वधाशब्दस्थाने स्वाहा शब्द: सव्येनैव सर्वा: क्रिया: । प्रति पार्वणं युग्मा एव ब्राह्मणा: । विवाहादिमङ्गलकर्माङ्गे । वृद्धिश्राद्धे कुशास्थाने दूर्वा: यज्ञादि कर्माङ्गे तु अमूलादर्भा: । दूर्वा दर्भाश्च युग्मा एव पूर्वाह्ण: काल: प्रदक्षिणं कर्म तथा चात्र प्रकृतिभूतपार्वणवदेव दैवेप्राङ्मुखा: पित्र्येचोदङ्मुखा: विप्रा: समुपवेशनीया: न तु दैव धर्मत्वेन सर्वे प्राङ्मुखा: किन्तु ब्राह्मण पंक्ति निवेश: प्रागुपक्रम: पश्चादपवर्ग: आभ्युदिके प्रदक्षिणमुपचार: इति सूत्र बोधितत्वात् ।

सङ्कल्प:—ॐ अद्य विष्णुयाग सांगतार्थं पितृणां तृप्त्यर्थं मगणगणेशमातृकापूजनपूर्वकं नान्दीश्राद्धं करिष्ये । ॐ गणेश्वराय नम: इति स्वस्तिवाचनपूर्वकं गणेशं सम्पूज्य । ॐ गौर्यादि षोडश मातृकाभ्यो: नम: । इति यथा लब्धोपचारै: षोडश मातृका पूजनं कृत्वा घृतं मातृकाश्चसम्पूज्या: । तद्यथा

अथ गौर्यादि षोडश मातृकानां पूजनमावाहनञ्च

गौरी—हेमाद्रितनयां देवीं वरदां वरदप्रियाम् ।
लम्बोदरस्य जननीं गौरी मावाह्याम्यहम् ॥

प्रार्थना—ॐ गौरीर्मिमाय सलिलानि तक्षत्येकपदीद्विपदीसाचतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरापरमेव्योमन् ॥

पद्मा—सुवर्णा त्वां पद्महस्तां विष्णोर्वक्षस्थले स्थिताम् ।
त्रैलोक्य पूजितां देवीं पद्मामावाहयाम्यहम् ॥

प्रार्थना—ॐ हिरण्यरूपाऽउषसोविरोक ऽउभाविन्द्रा ऽउदिथ: सूर्यश्च आरोहणम्वरुणं मित्रगर्तन्ततश्चक्षाथामदितिंदितिं च मित्रोसिवरुणोसि ॥

शची—उत्पलाक्षी सुदशनां शचीं कुण्डलधारिणीम् ।
देवराजप्रियां भद्रां शचीमावाहयाम्यहम् ॥

प्रार्थना—ॐ कदा चनस्तरीरसिनेन्द्रसश्चसिदाशुषे उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यप च्यतऽआदित्येभ्यस्त्वा ॥

मेधा—विवस्वतकरं पुल्लमवर्ततां पद्म वासिताम् ।
बुद्धि प्रसादिनीं सौम्यां मेधामावाहयाम्यहम् ॥

प्रार्थना—ॐ मेधाम्मे वरुणोददातुमेधामग्नि: प्रजापतिर्मेधामिन्द्रश्च वायुश्चमेधान्धाता ददातुमे स्वाहा ॥

सावित्री—जगत्स्रष्टां जगद्धात्रीं यशीरूपेण संविताम् ।
ॐ काराक्षीं भगवतीं सावित्रीमावाहयाम्यहम् ॥

प्रार्थना ॐ—तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोन: प्रचोदयात् ॥

विजया—दैत्यपक्षक्षयकरीं देवानां चाभयप्रदाम् ।
गीर्वाणवन्दिता देवीं विजयामावाहयाम्यहम् ॥

प्रार्थना—ॐ विज्यं धनु: कपर्दिनो विशल्योबाणवां ॅ उत । अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधि: ।

जया—विश्वभद्रं जयारिक्तां रक्ताम्बरधरां सदा ।
त्रैलोक्यवन्दितां देवीं जयामावाहयाम्यहम् ॥

प्रार्थना—ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी ।
तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥

देवसेना—मयूरवाहनारुढां शक्तिखड्गधनुर्धरीम् ।
आवाहयेद्देवसेनां तारकासुरमर्दिनीम् ॥

प्रार्थना—ॐ देवानाम्भद्रासुमतिर्ऋजूयतान्देवाना ँ रातिरभिनोनिवर्त्तताम्
देवानां ँ सख्यमुपसेदिमा वयन्देवानआयुः प्रतिरन्तुजीवसे ॥

स्वधा—कव्यमादायसततंपितृभ्यो या प्रयच्छति ।
पितृलोकार्चितान्देवीं स्वधामावाहयाम्यहम् ॥

प्रार्थना—ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरोमीमदन्तपितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥

स्वाहा—हविर्गृहीत्वा सततन्देवो माया प्रयच्छति ।
स्वर्गलोकार्चितास्वाहासमागच्छममाध्वरे ॥

प्रार्थना—ॐ स्वाहायज्ञं मनसः स्वाहोरोरन्तरिक्षात्स्वाहाद्यावापृथिवीभ्यां ँ स्वाहावातादारभे स्वाहा ॥

मातृ—भूतग्राममिदं कृत्स्नयया उत्पादितं पुरा ।
त्रैलोक्यपूजितां देवीं मातृरावाहयाम्यहम् ॥

प्रार्थना—ॐ आपो अस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्वः पुनन्तु । विश्व ँ हृरि प्रप्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतएमि । दीक्षातपसोस्तनूरसि तान्त्वाशिवा ँ शग्मामपरिदधेभद्रं वर्णपुष्यन् ॥

लोकमातृ—आवाहयेल्लोकमातृः जगत्पालनसंस्थिताम् ।
शक्राद्यैर्वन्दितां देवींतंत्रयैश्च सुरैरपि ॥

प्रार्थना—ॐ रयिश्चमे रायश्चमे पुष्टञ्चमे पुष्टिश्चमेविभुचमेप्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमे कुयवञ्चमेक्षितञ्चमे नञ्चमे क्षुच्चमेयाज्ञेनकल्पन्ताम् ॥

धृति—नमस्तु ष्टिकारीं देवीं लोकानुग्रहकारिणीम् ।
सर्व कामसमृद्ध्यर्थं धृतिमावाहयाम्यहम् ॥

प्रार्थना—ॐ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ।
यस्मान्नऽऋतेकिञ्चनकर्मक्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ॥

पुष्टि—प्रणता इमे लोकेस्मिन्पुत्रपुष्टिसुखप्रदा ।
भक्तेभ्यश्चापिवरदाविद्युज्ज्वालार्ककुण्डला ॥

प्रार्थना—ॐ तत्वायामित्र ह्मणावन्दमानस्तदा शास्तेयजमानोहविर्भिः ।
अहेडमानो वरुणेहवोद्ध्युरुश ँ समानआयुः प्रमोषीः ॥

तुष्टि—आवाहयामितां तुष्टिं सर्वलोकेषु पूजिताम् ।
सन्तोषभावनादींश्च रक्षणायाध्वरे मम ॥

प्रार्थना—ॐ बृहस्पतेपरिदीयारथेन रक्षोहामित्रा ँ ऽ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणोयुधाजयन्नस्माकमेध्यविताराथानाम् ॥

आत्मकुलदेवी—तामात्मादिहितां देवीं सर्वे काम फलप्रदाम् ।
वंश रक्षाकरीं गोत्रीं देवीमावाहयाम्यहम् ॥

प्रार्थना—ॐ प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा । अम्बेऽअम्बिकेऽम्बालिकेनमानयति कश्चन ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

ततः हस्तयो पुष्पाञ्जलिं गृहीत्वा—

ॐ गौरीपद्माशचीमेधा सावित्री विजया जया ।
देवसेना स्वधास्वाहामातरो लोकमातरः ॥
हृष्टिः पुष्टिस्तथातुष्टिरात्मनः कुलदेवता ।
गणेशेनाधिकाह्येता वृद्धौ पूज्याश्चषोडश ॥

ततो मनोजूतिरिति मन्त्रेण प्रतिष्ठाप्य हस्तयोः पुष्पाञ्जलिं गृहीत्वा-ॐ गौर्यै नमः, ॐ पद्मायैः, ॐ शच्यैनमः, ॐ मेधायै नमः, ॐ सावित्र्यै, ॐ विजयायै०, ॐ जयायै, ॐ देवसेनायै नमः, ॐ स्वधायै० ॐ स्वाहायै, ॐ मात्रे नमः, ॐ लोकमात्रे नमः, ॐ हृष्ट्यै नमः, ॐ पुष्ट्यै० ॐ तुष्ट्यै ॐ आत्मकुलदेव्यै नमः ।

अथ वसोर्द्धारा पूजनम्

आग्नेयां काष्ठ फलके कुङ्कुमादिना बिन्दुकरणेनाल ङ्करणं कृत्वाऽगामिमन्त्रं पठन् घृतेन सप्तधाराः प्राक् संस्था उदकसंस्था वा कुर्यात् ।

घृतेनसप्तधारा करणम्—ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा ।

गुडेनैकीकरणम्—ॐ कामधुक्षः ॥

[illegible]यो घृतमातृभ्य एव च ।
गुडेन मेलयिष्यामि ताः सर्वार्थं प्रसाधिकाः ॥

श्री:—ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूना ँ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ।

लक्ष्मी:—ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

धृति:—ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरै-रङ्गैस्तुष्टुवां ँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

मेधा—ॐ मेधाम्मे वरुणोददातुमेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥

स्वाहा—ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥

प्रज्ञा—ॐ आयङ्गौ पृश्निरक्रमीदसदन्मातरम्पुरः ॥ पितरञ्च प्रयन्त्स्वः ॥

सरस्वती—ॐ पावकानः सरस्वती वाजेभिर्वाजिनीवती । यज्ञंवष्टुधिया वसुः ॥

ॐ मनोजूतिरित्यनेन प्रतिष्ठाप्य प्रार्थयेत् ।

प्रार्थना—ॐ श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥

नतः हस्तयोः पुष्पाञ्जलिं गृहीत्वा—

ॐ श्रियैनमः, ॐ लक्ष्म्यै०, ॐ धृत्यै०, ॐ मेधायै०, ॐ स्वाहायै०, ॐ प्रज्ञायै० ॐ सरस्वत्यै नमः ॥

सामूहिक प्रार्थना—ॐ यदङ्गत्वेन भोदेव्यः पूजिता विधिमार्गतः ।
कुर्वन्तु कार्यमखिलं निर्विघ्नेनक्रतूद्भवम् ॥

अथवा, ललितादि सप्तमातृकाभ्यो नमः । वसोः पवित्रमसि० इत्यावाह्य ॐ ललितायै, उमायै, गौर्यै, अम्बिकायै, सलिलाश्रयायै, भगाह्वै भगाक्ष्यै नमः । इति सर्वोपचारैः सम्पूज्य

प्रार्थना—ललिता च उमागौरी अम्बिकासलिलाश्रया ।
भगाह्वी च भगाक्षी च सप्तैताघृतमातृकाः ।

एवं पञ्चोङ्कार पूजनम्—

पञ्चोङ्कारेभ्यो नमः । ॐ ब्रह्मणे नमः, गायत्रीदेव्यैनमः, गोवर्धनेश्वरायनमः, पृथिव्यै नमः, यज्ञपतये नमः, एवं पञ्चोङ्कारान् सम्पूज्य ।

प्रार्थना—ॐ ब्रह्मा देवी च गायत्री तथा गोवर्धनेश्वरः ।
पृथ्वी यज्ञपतिश्चैतान् पञ्चोङ्कारान्नमाम्यहम् ॥

आयुष्यमन्त्रजपः—ॐ आयुष्यं वर्च्चस्य ँ रायस्पोष मौद्भिदम् ।
इद ँ हिरण्यं वर्चस्वजैत्रायाविशतादुमाम् ॥

॥ अथ वृद्धिश्राद्धारम्भः ॥

यजमानः—कृतमंगलस्नानः माङ्गलिक वस्त्र भूषित उत्तराभिमुखः शुभासने चोपविश्याचम्य ॐ वाङ् मे आस्येऽस्तु इत्यादि न्यास विधिं विधाय प्राणानायम्य स्वदक्षिणभागे भूमौ गन्धादिना चतुष्कोण मण्डलं कृत्वा तत्र शङ्खचक्रे लिखित्वा गन्धाक्षत पुष्पाणि तूष्णीं प्रक्षिप्य तत्रासनार्थं दूर्वाङ्कुरत्रयं संस्थाप्य तदुपरि कर्मपात्रं पात्रे पवित्रं पवित्र स्थाने दूर्वाङ्कुरत्रयं—

कर्मपात्रेपवित्रक्षेपः—ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्य च्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
देवीरापो ऽअग्रेगुवोऽ अग्रे पुवोग्रऽइममद्य यज्ञपति ँ सुधातु यज्ञपतिं युवम् ॥

जल प्रक्षेपः—ॐ शन्नोदेवीरभिष्टय ऽआपो भवन्तु पीतये शंय्योरभिस्रवन्तुनः ।

यव प्रक्षेपः—ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः ।
गन्धादीनि तूष्णीं प्रक्षिप्य कर्मपात्रं सम्पन्नम् इति यजमानः ।

विप्राः—सुसम्पन्नम् । तेन जलेन आत्मानं सम्भारांश्चसंप्रोक्षयेत् ।

अभिषेकः ॐ यद् देवा देव हेडनं देवा सचकृमावयम् अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ।
ॐ यदि दिवा यदि नक्तमेना ँ सिचकृमावयम् । वायुर्मातस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ।
ॐ यदि जाग्रद् यदि स्वप्न एना ँ, सिचकृमावयम् । सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ।

आत्माभिषेकः—ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतो ऽपि वा । यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः । ॐ पुण्डीकाक्षाय नमः ।

देव गायत्री—ॐ देवताभ्यो देवताभ्यो देवताभ्यो नमो नमः ।

नमः स्वाहायै स्वाहायै स्वाहायै च नमो नमः ॥

दक्षिणकट्यां नीवीबन्धनम्—ॐ सौमस्य नीवीरसि विष्णोः शर्मासि शर्म-यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि ।

यवदूर्वाभिर्दिग्बन्धः—ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु यामीं मे पितरः स्थिताः ॥
प्रतीचीमाज्यपाः पान्तु उदीचीमपि सोमपाः ।
विदिशश्च गणाः सर्वे रक्षन्त्वर्यमघोपिवा ॥
रक्षो भूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
यवा रक्षन्तु दितिजान् दर्भा रक्षन्तु राक्षसान् ।
पंक्ति वै श्रोत्रियो रक्षेदतिथिश्च सर्वं रक्षकः ॥

ततो गायत्री मन्त्रेण कर्मपात्रजलमभिमन्त्र्य तेन जलेन शूद्रादि दृष्टि निपातात् संघर्षणादि दोषाद् आमान्नादीनां पवित्रतास्तु । इतिसम्प्रोक्ष्य ।

स यव दूर्वाभिः सङ्कल्पः—ॐ तत्सदद्य पितृ पितामह प्रपितामहानां सपत्नीकानां नान्दी मुखानां देवानां तथा च मातामह प्रमातामह वृद्धप्रमातामहानां सपत्नीकानां नान्दी मुखानां देवानां विष्णु यागाङ्गत्वेन सांकल्पिक विधिना सत्यवसु संज्ञक विश्वेदेव पूर्वकमाभ्युदयिक श्राद्ध करिष्ये । तत उत्तर वृद्धया यव जलान्यादाय ।

विश्वेदेवेभ्यः आसन दानम्—ॐ तत्सदद्य सपत्नीक पित्रादित्रय सपत्नीक मातामहादित्रयाभ्युदयिक श्राद्ध सम्बन्धिनः सत्यवसु संज्ञका विश्वेदेवा भू र्भुवः स्वः इदमासनं सुखासनं स्वाहा । वृद्धि वृद्धि श्रियै । इत्यासनं २ वा ४ । तदुपरि स यव जलत्यागं कुर्यात् । ततः पश्चिम वृद्धया यव जलान्यादाय ।

पित्रादिभ्यः आसनदानम्—ॐ तत्सदद्य पितृ पितामह प्रपितामहाः सपत्नीका नान्दी मुखा देवाः सांकल्पिकाभ्युदयिके इदमासनं सुखासनं स्वाहा । वृद्धि वृद्धि श्रियै । इत्यासनं २ वा ४ । तदुपरि [illegible]

माता महादिभ्यः आसनदानम्—ॐ तत्सदद्य मातामह प्रमातामह वृद्ध-

इदमासनं सुखासनं स्वाहा । वृद्धि वृद्धि श्रियै । इत्यासनं २ वा ४ तदुपरि सयव जलं त्यजेत् ।

देवानां पादप्रक्षालनम्—ॐ नान्दीमुखाः सत्यवसु संज्ञका विश्वेदेवाः सांकल्पिकाभ्युदयिके इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृद्धिः वृद्धिः । २ वा ४ ।

पित्रादि पाद प्रक्षालनम्—ॐ तत्सदद्य पितृ पितामह प्रपितामहा नान्दीमुखा देवाः सपत्नीका सांकल्पिकाभ्युदयिके इदं वः पाद्य पादावनेजनं पादप्रक्षालनं वृद्धिः वृद्धिः २ वा ४ ।

मातामहादि पादप्रक्षालनम्—ॐ तत्सदद्य मातामह प्रमातामह वृद्ध-प्रमातामहाः सपत्नीका नान्दीमुखा देवाः ॐ भू र्भुवः स्वः इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृद्धि वृद्धि २ वा ४ ।

आसनो परिपूजा मन्त्रः—ॐ सप्त ऋषयः प्रतिहिताः शरीरे सप्तः रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽस्वप्नजौ सत्र सदौच देवौ इति गंधादिकं समर्प्य ।

देवेभ्यो गंधादिदानम्—ॐ तत्सदद्य सपत्नीक पित्रादित्रय सपत्नीक मातामहादित्रय श्राद्ध संबन्धिनः सत्यवसुसंज्ञका विश्वेदेवाः आसनार्चन विधौ इमानि गन्धाक्षत पुष्पधूपदीपनैवेद्य ताम्बूल धौतोपवस्त्रकमण्डलूपपात्रासनादीनि यथा विभागं वो नमः स्वाहा वृद्धिः वृद्धिः श्रियै ॥ २ वा ४ ॥

पित्रादिभ्यो गंधादिदानम्—ॐ तत्सदद्य पितृ पितामह प्रपितामहाः सपत्नीका नान्दी मुखा देवाः आसनार्चन विधौ इमानि गन्धाक्षत पुष्पधूपदीपनैवेद्य ताम्बूल धौतोपवस्त्रकमण्डलूपपात्रासनादीनि यथा विभागं वो नमः स्वाहा वृद्धि वृद्धि श्रियै ॥ २ वा ४ ॥

मातामहादि गन्धादिदानम्—ॐ तत्सदद्य मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकानां नान्दी मुखा देवाः आसनार्चनविधाविप्राणि गन्धाक्षत पुष्पधूपदीपनैवेद्य ताम्बूल धौतपोवस्त्रकमण्डलूपपात्रासनादीनि यथां विभागं विभज्य वो नमः स्वाहा वृद्धिः वृद्धिः श्रियै ॥ २ वा ४ ॥

आसनोपरि पूजा—ॐ सप्तऽऋषयः । ॐ यथेमां वाचं कल्याणीमावदानि

प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्धयतामुपमादो नमतु ॥ इति मन्त्राभ्यां आसनोपरिपूजां कृत्वा। आसनामुपरिष्ठादन्नं संस्थाप्य। अत्राभ्युदयिके पक्वान्नाभावे आममन्नं तदभावे हिरण्यं तदभावे ब्राह्मण भोजनं पर्याप्तान्ननिष्क्रयीभूतं द्रव्यमिति धर्म सिन्धुः।

देवानां परिवेषणम्—ॐ तत्सद्य सपत्नीक पित्रादि त्रय सपत्नीक मातामहादि त्रय श्राद्ध सम्बन्धिनः सत्यवसु संज्ञका विश्वेदेवा आसनार्चनविधौ—इदमान्नं पक्वं वा सोपस्करं यथा विभागं वो नमः स्वाहा वृद्धिः वृद्धिः श्रियै ॥ २ वा ४ ॥

पित्रादीनां परिवेषणम्— ॐ तत्सद्य पितृ पितामह प्रपितामहाः सपत्नीका नान्दी मुखाः देवाः आसनार्चनविधाविदमामान्न पक्वं वा सोपस्करं यथा विभागं वो नमः स्वाहा वृद्धि : वृद्धिः श्रियै ॥ २ वा ४ ॥

मातामहादीनां परिवेषणम्— ॐ तत्सद्य मातामह प्रमातामह वृद्ध प्रमातामहाः सपत्नीकानान्दी मुखा देवा आसनार्चन विधाविदमामान्नं पक्वं वा सोपस्करं यथा विभागं वो नमः स्वाहा वृद्धिः वृद्धिः श्रियै ॥ २ वा ४ ॥

देवानां दक्षिणासंकल्पः— ॐ तत्सद्य सपत्नीक पित्रादि त्रय श्राद्ध सम्बन्धिनः तथा सपत्नीक मातामहादि त्रय श्राद्ध सम्बधिनः सत्यवसुसंज्ञका विश्वेदेवाः अमुककर्माङ्गत्वेन कृतस्याभ्युदयिकस्य कर्मणः फलप्रतिष्ठा सिद्धयर्थं इयं दधिककंन्धु निष्क्रयिणी दक्षिणा यथा विभागं वो नमः स्वाहा वृद्धि वृद्धि श्रियै २ वा ४ ॥

पितृणो क्षिणासंकल्पः—ॐ तत्सद्य पितृ पितामह प्रपितामहाः सपत्नीका नान्दी मुखाः सपत्नीकानान्दी मुखादेवा तथा मातामह प्रमातामह वृद्धप्रमातामहाः नान्दी मुखा देवाः अमुक कर्माङ्ग त्वेनकृतस्याभ्युदयिककर्मणः सादगुण्यार्थं इदं द्राक्षामलयवमूलनिष्क्रयिणी दक्षिणा यथा विभागं वो नमः स्वाहा वृद्धि वृद्धि श्रियै । ४ । ८ ॥

आत्मतिलकम्—सत्यानुष्ठान निरताः सर्वदा यज्ञ वुद्धय।
पितृमातृपराश्चैवमन्त्वस्मत्कुलजानराः ॥

विशेष पूजा—आयुः प्रजांधनं विद्यां स्वर्गं मोक्षं सुखानिच।
प्रयच्छन्तु तथा राज्यं नणां प्रीतापितामहाः ॥

आयुः पुत्रान् यशः स्वर्गं कीर्ति पुष्टि वलंश्रियम्।
पशु सुखं धनं धान्यं प्राप्नुयात्पितृपूजनात् ॥

अथाक्षय्योदकस्थाने दद्यात् क्षीर यवादिकम्। इतिस्मृतिवचनात्।

क्षीरं यवो कदानम्—नान्दी मुखाः सत्य वसुसंज्ञकाः विश्वेदेवाः प्रीयन्ताम्।
पितृपितामह प्रपितामहागोत्राः सपत्नीकाः नान्दी मुखाः प्रीयन्ताम्।

आशिषोग्रहणम्—गोत्रन्नो वर्द्धताम्। अभिवर्द्धतां वो गोत्रम्। दातारो नोभिवर्द्धताम् वर्द्धन्तां वोदातारः ॥ वेदाश्चनोभिर्द्धन्ताम्। अभिवर्द्धन्तां वो वेदाः ॥ सन्ततिर्नोभिवर्द्धताम् । अभिवर्द्धतां वः संततिः ॥ श्रद्धा च नो माव्यगमत्। माव्यगमद्धः श्रद्धा ॥ बहुदेयञ्च नो ऽस्तु। अस्तुवो बहुदेयम् ॥ अन्नञ्चबहुभवेत्। भवतुवोबह्वन्नम् ॥ अतिथींश्चलभामहै। लभतां वो ऽतिथयः ॥ याचितारश्चनः सन्तु। सन्तु वो याचितारः ॥ मा च याचिष्मकञ्चन। मायाचेथाः ॥ एताः सत्या आशिषः सन्तु। सन्त्वेताः सत्या आशिषः ॥

देवगायत्री—ॐ देवताभ्यो देवताभ्यो देवताभ्यो नमोनमः ॥
नमः स्वाहाहै स्वाहायै स्वाहायै च नमो नमः। इति त्रिर्जपेत्।

देवविसर्जनम्—ॐ वाजे वाजे वतवाजिनो नो धनेषु विप्रा अमृताऽऋतज्ञाः।
अस्य मध्वः पिबतामादयध्वं तृप्यता यातपथिभिदेवयानैः।

अनुव्रजनम्—ॐ आमावाजस्य प्रसवोयगम्यादेमे द्यावा पृथिवी विश्वरूपे।
आमागन्तां पितरोमातरश्चा मा सो मो ऽअमृतत्वेन गम्यात्।

पूर्णतावाक्यानि—इदमाभ्युदायिकं श्राद्धं विधिहीनं देशहीनं कालहीनं वाक्यहीनं श्रद्धाहीनं दक्षिणाहीनं च यत् कृतम्।
तत्सुकृत मस्तु यन्नकृतं तत् श्रीविष्णोः प्रसादाद् ब्राह्मणानाञ्च वचनात्सर्वं परिपूर्णमस्तु ॥

विप्राः ॐ अस्तु परिपूर्णम्। त्रिर्ब्रूयुः।
ॐ तद्विष्णोः परमं पद ँ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥
यस्य स्मृत्वा च नामोक्त्या तपो यज्ञक्रियादिषु। न्यूनंसम्पूर्णतां यातु सद्योवन्दे तमच्युतम्। ॐ अच्युताय नमः। ॐ अनन्ताय नमः।
ॐ गोविन्दाय नमः।

आचार्य ॰क्षिणा—ॐ तत्सदद्य० अमुककर्माङ्गतया कृतस्याभ्युदयिकश्राद्धस्य साङ्गफलाप्तये इदं हिरण्यं दक्षिणात्वेनामुकशर्मणे तुभ्यमहं सम्प्रददे नमम ।

सूर्यार्घ्यदानम्—ॐ ह्रँ सः ।

क्षमाप्रार्थना—कामतो ऽकामतो वापि यत्करोमि शुभाशुभम् । तत्सर्वं त्वयि सन्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥ इति जलम् ।

आसनवन्दनम् विशेष: - आसत्यलोकादापातालादालोकालोकपर्वतात् । ये सन्ति ब्राह्मणाः पुण्यास्तेभ्यो नित्यं नमो नमः ॥ न च स्मरेद्‌ऋषिच्छन्दः श्राद्धे वैतानिके मखे । अतोनात्र ऋष्यदि स्मरणम् ॥

शुभमस्तुतराम् ॥

अथ ब्राह्मणवरणम्

ततो यजमानः अस्मिन् विष्णुयागकर्मणि आचार्यकर्मकर्तुममुकगोत्रामुकशर्माणं ब्राह्मण मेभिर्गन्धाक्षत ताम्बूल सुवर्णपवित्रासनकमण्डलु धौतोत्तरीय वासोभिराचार्यत्वेन त्वामहं वृणे । एवं ब्रह्माणादीन् विप्रान् वृत्वा सम्पूज्य । ॐ व्रतेनदीक्षामाप्नोति० इत्यादिना विप्रदक्षिणकरेषु रक्षासूत्रबन्धनम् । (प्राक्कुण्डे ऋग्वेदिनावृत्विजौ याम्यकुण्डेयजुर्वेदिनौ । प्रत्यक्कुण्डे सामगौ । उत्तरकुण्डेऽथर्वाणौ) तत एवमेवाष्टौ चतुरो वा द्वारपालान् वृणुयात् ॥ तत एकैक वेदिकौ द्वौ द्वौ जापकावेकैकं वा पूर्वादिदिशिवृणुयात् । पंचकुण्डी पक्षेत्वष्टौ होतारः । अष्टौ जापकाः । अष्टौ द्वारपाला गुरुश्चैवंपञ्चविंशतिऋत्विजो भवन्ति । अत्राशक्त । अष्टौ होतारश्चत्वारो जापकाश्चत्वारो द्वारपाला गुरुश्चेति सप्तदश । अत्राप्यशक्तो चतुरोहोतॄंश्चतुरो द्वारपालांश्चतुरो जापकान्गुरुंचेति त्रयोदश । अत्राप्य सामर्थ्येह्यकाग्नि विधिना कर्मकर्तुमाचार्यं ब्रह्माणं च द्वौ । ततः आचार्यादीनां समस्त विप्राणां मधुपर्कविधिना पूजा प्रयोगो विधेयः । अर्थात् यज्ञे महाऋत्विजः ... भवति ततः यजमान कृताः ।

जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः ।
देवानां चपितृणां च तृप्त्यर्थं याजकाः स्मृताः ॥
येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् ।
रक्षन्तु सततं ते मां जपयज्ञेव्यवस्थिताः ॥
ब्राह्मणाजंगमं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
येषां वाक्योदकेनैवशुद्धयन्ति मलिनो जनाः ॥
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ।
सर्वकर्मरतानित्यं वेदशास्त्रार्थकोविदाः ॥
श्रोत्रियाः सत्यवाचश्च देवध्यानरताः सदा ।
यद्वाक्यामृत संसिक्ताऋद्धिं यान्ति नर द्रुमाः ॥
अंगीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषाः ।
यथोक्तनियमैर्युक्तामंत्रार्थे स्थिरबुद्धयः ॥
यत्कृपा लोचनात्सर्वाऋद्धयो वृद्धिमाप्नुयुः ।
अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥
देवध्यानरता नित्यं प्रसन्नमनसः सदा ।
अदुष्टभाषिणो नित्यं मा सन्तु परनिन्दकाः ॥
ममापि नियमाह्येते भवन्तु भवतामपि ॥

आचार्य प्रार्थना—मन्त्रमूर्तिभवन्नाथ संसारोच्छेदकारक ।
साङ्गं कर्मयथामेस्यात् तथा कुरु हि भूसुर ॥
संसारभय भीतेन अयं यज्ञः सुभक्तितः ।
प्रारब्धस्त्वत्प्रसादेन निर्विघ्नं मे भवत्विति ॥
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ॥
सुप्रसादेन कर्तव्यं शान्तिकं विधि पूर्वकम् ॥

आचार्यो निम्नान् नियमान् विप्रेभ्यो यजमानेभ्यश्च श्रावयेत्—
क्षमा सत्यं दया दानं शौचमिन्द्रिय निग्रहः ।
देवपूजाऽभिरतश्चैव सन्तोषः स्तेयवर्जनम् ॥
उपवीती बद्धशिखो धीरो मौनी दृढव्रतः ।

नैकवस्त्रोनान्तरालेन द्वीपेनार्द्रवाससा ।
नकुर्यात्कस्यचित्पाद्यां कण्डून्मीलनवर्जितः ।
अवैधं नाभ्यधः स्पर्शं कर्मकालेन कारयेत् ।
न पदापादमाक्रम्य न चैव हि तथा करौ ॥
न चासमाहितमना न च संश्रावयन् जपेत् ।
न च क्रमन्न च हसन्न पार्श्वानवलोकयन् ॥
जप काले न भाषेत नान्यानि प्रेक्षयेद्बुधः ।
न कम्पयेच्छिरो ग्रीवं दन्तानैव प्रकाशयेत् ॥
न द्रुतं नापि विश्रान्तं क्रमान्मंत्रं जपेत्सुधीः ।
क्रोधं मोहं क्षुतां निद्रां निष्ठीवनविजृम्भणे ।
दर्शनं च श्वनीचानां वर्ज्जयेज्जपकर्मणि ।
पादप्रसारणं नैव कांस्य पात्रे न भोजनम् ॥
श्रद्धोत्साहौ मनः स्थैर्यं त्रिकालं देवतार्चनम् ।
जपहोमादिषु नरमन्यं नाकारणात् स्पृशेत ॥
अनालस्यं सौमनस्य हिंसा शान्तिरेव च ।
मन्त्राधिष्ठातृदेवानां ध्यानं धारणमर्थतः ॥
पवित्रपाणिस्तिलकी ताम्बूलपरिवर्जनम् ।
असूयाद्वेषद्रोहेर्ष्या प्रहासपरिवर्जनम् ॥
मञ्चखट्वादिशयनं प्रातराहारवर्जनम् ।
परस्परमनिन्दां च न क्षौरं नातिभोजनम् ॥
निरर्थकं न संलापो नाङ्गानां चालनं मुधा ।
स्नानं त्रिषवणं चैव गुरुदेवद्विजार्चनम् ॥
वैश्वदेवं तथातिथ्यमर्थकासनसंस्थितिः ।
प्रियावाणी प्रसन्नत्वं तत्तन्मंत्रार्थचिन्तनम् ॥
आचार्यकथने स्थेयान्न प्रतिग्रहमाचरेत् ।
हविष्याशीमिताहारी लोभदंभविवर्जितः ॥
अत्वरः सकलान मन्त्रान् जपे होमे प्रयोजेत् ।
दूरतः सन्तयजेत्सर्वं मादकद्रव्यसेवनम् ॥

न यज्ञमण्डपे हस्तपादप्रक्षालनं क्वचित् ।
नान्यं प्रतिनिधिं कुर्यान्न पर्युषितभुग्भवेत् ॥
वर्तमाने जपादौ च लघुशङ्कादिकं त्यजेत् ।
कृतेऽपि तत्क्षणं वस्त्रमन्यद्धृत्वासनं भजेत् ॥
मृगीमुद्रामुपाश्रित्य यथार्थं हुतमाचरेत् ।
न स्यूतवासा नोष्णीषी नापि पारक्य वस्त्रभृत् ॥
अभ्यङ्गोन्मर्दने नैव सदा साधुमना भवेत् ।
अकौटिल्यं च स्वाध्यायं तितिक्षामार्जन भवेत् ॥
आदिष्ट समये कुर्यात् गमनागमने बुधः ।
जृम्भादीनाभ्यधः स्पर्शेनिमित्ते ऽप उपस्पृशेत् ॥
यद्वा सर्वोपघातेषु संस्मरेद्विष्णुमव्ययम् ।
पालयेद्यज्ञभाग्विद्वान द्रढिम्नानियमानिमान् ॥
अज्ञानादथवा मोहात्प्रच्यवेताध्वरेषुयत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णस्यदिति श्रुतिः ॥

अथवरुणश्राद्धम्

ततो वरुण श्राद्धार्थं नानानाम गोत्रान् अमुकशर्मणोविप्रान् विष्णुयागाङ्गीभूतवरुण श्राद्धे युष्मानहं वृणे । वृताः स्म इति प्रतिवचनम् ।

संकल्पः—अद्येत्यादि वृतानां ब्राह्मणानामासनाद्यर्चनमहं करिष्ये । वरुणश्राद्धे वरुणरूपेभ्यो ब्राह्मणेभ्यः इमानि आसनपाद्यार्घ्याचमनगन्धपुष्पधूपदीप नैवेद्य यज्ञोपवीत वस्त्रालङ्कारादीनि ब्राह्मणेभ्यो नम इति दद्यात् । प्राजापत्यान्युपवीतानि बार्हस्पत्यानि वस्त्राणि अग्निदेवताकानि सुवर्णनिर्मित्तानि कुण्डलाद्यलङ्कारादीनिताम्बूलादीनि मधुपर्कपात्रादीनि वरुणरूपेभ्यः समस्त ब्राह्मणेभ्यः स्वाहा सम्पद्यताम् ॥

अथ जलयात्र'प्रयोगः

यजमानः सपत्नीकः सुप्रक्षालितपाणिपादः पुत्रपौत्रादिबान्धवयुक्तः सन् दधिमधुघृतदुग्धशर्करागन्धाक्षतपुष्पधूपदीपनैवेद्य पूंगीफलताम्बूलानां दक्षिणां ताहय पूजोपहाराः सुदृढ कनककुंभाः पञ्चरत्नानि

पञ्चपल्लवदूर्वा आर्द्रचूर्णक श्रीहि माषाश्चपक्वाः । ततः सुवासिनी-भिः जीवत्पुत्रीभिः पतिव्रताभिः मोहादि दोषरहिताभिः सर्वब्राह्मण-सुहृत्सहितः सन् ध्वजपताकालंकृतानि गजरथाश्वादीनि अन्यानि च नरयानानि चतुरस्रविमानानि शिविकादीनि शकटादीनि वा समारुह्य शंखभेरीमृदंगादि चतुर्विधवादित्र वादितदिङ्मण्डलो मागधचार-णादि प्रगीतवंशप्रशस्तिः सन् वाद्यादि वैदिकमन्त्रघोषेण च नदीतडागादौ गच्छेत् । तत्रस्थण्डिलत्रयकरणम् । एकं गणेशाम्बिकयोः स्थापनार्थं यजमानस्याग्रे । द्वितीयं तदग्रे तृतीयं द्वितीयादुत्तरत । वितस्तिमात्रांतरे प्रथम तृतीये हस्तमिते द्वितीयं द्विहस्तमात्रं कृत्वा अद्येत्यादि देशकालौ स्मृत्वा ।

संकल्पः— मम सपत्नीकस्य आयुरारोग्यैश्वर्यादि वृद्धिद्वारा श्रीपरमेश्वर-प्रीत्यर्थममुक विष्णुयाग कर्मांगत्वेन जलयात्रा कलशानां जलमातृकाणां वरुणस्य गणेशाम्बिकयो स्थापनप्रतिष्ठा पूचनाद्यर्चनमहं करिष्ये । इति संकल्प्य रक्तवस्त्रोपरि तण्डुलैः पद्मं कृत्वा तदुपरि नवकलशानां स्थापनम् । तत्राष्टदिक्षु अष्टौ कलशान् नवमकलशं प्रधानं मध्ये च स्थापयेत् । ततः आनोभद्रा० इत्यादि शान्ति सूक्तं (रात्रिवर्ग) पठेत् । स्थापित कलेशु वरुणं संपूज्य तीर्थान्यावाहयेत् ।

तीर्थावाहनम्—आगच्छन्तु महाभागाः समुद्राः सरितो ह्रदाः ।
प्रभासं पुष्करं चैव विशाला विरजागया ॥
कुरुक्षेत्रं प्रयागं भद्राकर्णं पृथूकम् ।
गंगा च यमुना चैव ब्रह्मपुत्रा सरस्वती ॥
गोदावरी पयोष्णी च नदी चर्मण्वतीतथा ।
शतद्रुः पुष्करश्चैव शोणश्चैवमहानदः ॥
तुंगभद्रा च सिंधुश्च पारावारस्तथैव च ।
क्षिप्रा वेत्रवती चैव पुण्यो जंबूनदस्तथा ॥
विपाशा कौशिकी चैवनदी दुःस्वप्ननाशिनी ।
स्वर्णरेखा महीचैव मध्यं रुद्रमहालयम् ॥
विष्णुपदं महातीर्थं गंगासागर संगमः ।
अर्घतीर्थं महापुण्यं कुशावर्तं तथैव च ॥
भृगुकुत्सं कर्दमालं शक्तिभेदोरि संगमः ।
एवमादीनि तीर्थानि यानि संति धरातले ॥
आयान्तु तानि सर्वाणि कलशेषु समंततः ।
आवाहयामि तीर्थानि पूजार्थं यागमण्डपे ॥

यजमानः—कलशान् स्पृष्ट्वा कुर्यात् ' ततः कलशोपरि शरावेषु तण्डु-लैर्नव अष्टदलानि कृत्वा तेषु जलमातृः स्थापेत् । तत्रादौ यजमानाग्रे स्थंडिलोपरि अष्टदलं कृत्वा तत्र गणेशाम्बिकेस्थापयेत् तद्यथा ।

गणेशावाहनम्—एहि भालघृतबालसुधांशो विघ्नवारण विदारण सिंह ।
एकदन्त विपदंतकरत्नं श्रीगणेशजगदीशनमस्ते ॥

ॐ गणानान्त्वेति आवाह्य संपूज्य ततः प्रार्थयेत् ।

गौरीमावाहनम्—ॐ प्रणम्य मातरं देवीं सुशांतां शुभलक्षणाम् ।
विष्णुयाग सिद्धयर्थमावाहयेदम्बिकामिह ।

जलमातृकास्थापनम्—पूर्वादिक्रमेणाष्टकुम्भोपरि जलमातृणांमावाहनम् ।

जलमातृकाणां नामानि पूर्वकुंभोपरि उर्णम—
ऊर्मिर्लक्ष्मीजलापाना वारुणी जलवासिनी ।
आयगा च क्रमेणैव सप्तैता जलमातरः ॥
महार्णवे समुद्भूतां कल्लोलांदोलवर्द्धिनीम् ।
मोहयन्ती जगत्सर्वमूर्मिमावाहयाम्यहम् ॥
आगच्छ वरदे देवि जलमातर्नमोऽस्तुते ।

आवाहनम्—ॐ वृष्ण ऊर्मिरसिराष्ट्रदा राष्ट्रं मे वेहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । वृष सेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥

आग्नेयकुंभे—पद्मासनसमासीनां पद्महस्तां हरिप्रियाम् ।
अम्भोधितनयां देवीं लक्ष्मीमावाहयाम्यहम् ॥
आगच्छ वरदे देवि जलमातर्नमोस्तुते ।

लक्ष्मीमावाहनम्—ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्म ऽइषाण सर्वलोकं म ऽ इषाण ॥

दक्षिणकुंभोपरि—प्रलयान्ते महाघोरे एकोदधिकृतां महीम् ।
अंबुमूर्तिधरां देवीं जलमावाहयाम्यहम् ।
आगच्छवरदे देवि यज्ञेऽस्मिन् सन्निधौभव ।

जलमावाहनम्—ॐ द्युभिरक्तुभिः परिपातमस्मानरिष्टेरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौ ॥

नैर्ऋतकुम्भे—चतुरशीति संख्याका जंतवो योनि संभवाः ।
मायाधाराः कृतास्तस्मात्पानामावाहयाम्यहम् ॥

पानमावाहनम्—ॐ अन्तरामित्रावरुणाचरन्ती मुखं यज्ञानामभिसंविदाने ।
उषासावा ँ सुहिरण्ये सुशिल्पे ऋतस्ययोमाविहसादयामि ।

पश्चिमकुम्भे—वरुणस्य प्रियां देवीं पावनीं भुवनत्रये ।
सर्वाभरणशोभाढ्यां वारुणीमावाहयाम्यहम् ॥
आगच्छ वरदे देवि विशुद्धजलवासिनि ।

वरुणावाहनम्—ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्जनीस्थोवरुणस्य-ऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥

वायव्यकुम्भे—जलजंतून्विना नैव यानि तीर्थानि सर्वतः ।
आवाहयामि तां देवीं विशुद्धां जलवासिनीम् ॥
आगच्छ वरदे देवि यज्ञेऽस्मिन्सन्निधौ भव ।

जलवासिन्यावाहनम्—ॐ अर्यमणं बृहस्पतिमिन्द्रन्दानायचोदयावाचं । विष्णु ँ सरस्वती ँ सवितारंञ्चवाजिन ँ स्वाहा ।

उत्तरकुंभे—रसातलंच पातालं यया व्याप्तंचराचरम् ।
जगदाधारभूतां चापगामावाहयाम्यहम् ॥
आगच्छवरदेवि यज्ञेऽस्मिन्सन्निधौ भव ।

आपगामावाहनम्—ॐ अग्नऽइन्द्रवरुणमित्रदेवाः शर्धः प्रयन्तमारुतो त विष्णो उभाना सत्यारुद्रोऽधम्नाः सरस्वती जुषन्तः ।

ऐशानकुंभे—शुद्धोदधिसमुद्भूतां शुद्धवर्णजलप्रियाम् ।
शुद्धयर्थं जलकुम्भानां शुद्धमावाहम्यहम् ॥
आगच्छगवरदे देवि यज्ञेऽस्मिन्सन्निधौभव ।

शुद्धामावाहनम्—ॐ होतायक्षद्वनस्पतिमभिह्विपिष्टतमयारभिष्टयारशनया-धित । यत्राश्विनोश्छागस्यहविषः प्रियाधामनि यत्र सरस्वत्या-मेषस्यहविषः प्रियाधामानि यत्रेन्द्रस्य ऽऋषभस्य हविषः प्रियाधामानि यत्राग्नेप्रियाधामानि यत्र सोमस्य प्रियाधामानि यत्रेन्द्रस्य सुत्राम्ण-प्रियाधामानि यत्र सवितुः प्रियाधाभानि यत्र वरुणस्य प्रियाधामानि यत्र वनस्पते प्रियापाथा ँ सि यत्र देवानामाज्यपानं प्रियाधामानि यत्राग्रेहोतुः प्रियाधामानि तत्रैतान् प्रस्तुत्येवोपस्तुत्येवोपावस्तक्षद्र-भीयसे इव कृत्वीकरदेवं देवोवनस्पतिर्जुषता ँ हविहोतर्यज ॥

मध्यकुम्भोपरि—आगच्छ जलदेवेशजलनाथ ह्यपांपते ।
तव पूजां करिष्यामि कुंभेऽस्मिन्सन्निधौभव ॥

वरुणावाहनम्—ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्जनीस्थो वरुणस्य-ऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्य ऋतसदनमातीत् ।

जीवमातृणां नामानि कुंभस्योत्तरतः—
मत्सी कूर्मी जलौका च दुर्दरी जलगोधिका ।
मकरी तन्तुकी चैव सप्तैता जीवमातरः ॥

मध्ये—रसातलसमुत्पन्ने मत्स्यदेवि महार्णवे ।
मातंगि च प्रियेकृष्णे जीवमातर्नमो ऽस्तुते ॥

मत्स्यावाहनम्—ॐ समुद्राय शिशुमारानालभतेपर्जन्याय मण्डूकानद्भ्यो मत्स्यानमित्रायकुलीपगाम् वरुणायनाक्रान् ।

पूर्वपत्रे—ह्रदे कूर्म्मसमुत्पन्नां गंभीरां चैव कर्मणि ।
पाताल जल संस्थाने जीवमातर्नमो ऽस्तुते ॥

कूर्म्मीआवाहनम्—ॐ को ऽसिकतमोलिकस्यासिकोनामासि । यस्य तेनामा-मन्महियंत्वासोमेनातीतृपाम् ॥ भूर्भुवः स्वः सुप्रजाः प्रजाभिस्या ँ सुवीरो-वीरैः सुपोषः पोषैः ।

आग्नेयकोणे—श्वेताभ्रेवैसमुत्पन्नां जन्तुके जीवचारिणीम् ।
उत्पत्तिः सर्वभूतानां जीवमातर्नमोऽस्तते ॥

जलौक्यावाहनम्—ॐ यस्यास्ते घोर आसन जुहोम्येषां बंधानामवसर्जना-ययान्त्वाजनो भूमिरिति प्रमंदते निऋ तित्वाहं परिवेदविश्वतः ।

दक्षिणपत्रे—कालाभ्रशिखराकारा विद्युतेजा च दुर्दरी ।
अर्द्धमाकाशसंस्थाने जीवमातर्नमो ऽस्तुते ॥

दुर्दरी आवाहनम्—ॐ द्वारोदेवीरन्वस्यविश्वेव्रतादद्न्ते अग्नेः । ऊरुव्यच-सोधाम्नापत्यमाना: ।

नैऋत्यपत्रे—गोधिके गोसमुत्पन्ने सस्रग्दाम विभुषिते ।
सर्वाधारधरे देवि जीवमातर्नमोऽस्तुते ॥

जलगोधिकाऽऽवाहनम्—ॐ गोमदूषुणा सत्या अश्वावद्यासमश्विनावर्तिरुद्रा-नृपाय्यम् ।

पश्चिमपत्रे—नमस्ते देव देवेशि मकरेमदमर्दिनि ।
आश्रये सर्वभूतानां जीवमातर्नमोऽस्तुते ॥

मकरी आवाहनम्—ॐ मापोमोषधोर्हि ँ सीः धाम्नो धाम्नो राजंस्ततो वरुणनोमुञ्च । यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुणनो मुञ्च ।

वायव्यपत्रे—अन्धकार समुत्पन्ने तंतुके निर्मिते शिवे ।
दीप्तिरूपे त्रिभुवने जीवमातर्नमोऽस्तुते ॥

तंतुकी आवाहनम्—ॐ याते हेतिर्मीढुष्टमहस्ते वभूवतेधनुः । तयास्मान् विश्व-तस्त्वमयक्ष्मया परिभुज ।

उत्तरपत्रे—सर्वाधार धरे देवि कर्करि जीवमातृके ।
आश्रये सर्वभूतानां जीवमातर्नमोऽस्तुते ॥

कर्करी आवाहनम्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्वः । पुनन्तु विश्व ँ हिरिप्रं प्रवहंति देवी रुदिदाभ्यः शुचिम्यः पूतएमि ।

ईशानपत्रे—नमस्ते देव देवेशि सर्पिणिमदमर्दिनि ।
सर्वाधारधरेदेवि जीवमातर्नमोऽस्तुते ॥

सर्पिणी आवाहनम्—ॐ नमोस्तुसर्पेभ्यो ये केच पृथिवीमनु । येऽअन्तरिक्षे-येदिवितेभ्यः सर्पेभ्यो नमः ।

अथ स्थलमातृका स्थापनम्

मध्य कलशस्य दिक्षु विदिक्षु च स्थलमातृकास्थापनम् ॥

स्थलमातृकानामानि—उमा लक्ष्मीर्महामाया पानदेवी तथैव च ।
वारुणी निर्मला गोधा: [illegible]

पूर्वादि क्रमेण नाममंत्रैः स्थापनम्— ॐ उमामावाहयामि स्थापयामि । ॐ लक्ष्मीमावाहयामि० । ॐ महामायामावाहयामि० । ॐ पानदेवी-मावाहयामि० । ॐ वारुणीमावाहयामि० । ॐ निर्मलामावाहयामि० । ॐ गोधामावाहयामि० ।

प्रतिष्ठापनम् ॐ मनोजूतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमंदधातु । विश्वेदेवासऽइहमादयन्तामों ३ प्रतिष्ठ । स्थापित-देवता गणेशप्रमुखाः सर्वाः सकलशाः जलमातरः स्थलमातरश्चसुप्रतिष्ठिता वरदा भवन्तु ।

नाममंत्रेण पूजनम्—ॐ श्री गणेशायनमः । ॐ अम्बिकायै नमः । ॐ लक्ष्मै नमः । ॐ जलायैनमः । ॐ पानायै नमः । ॐ वारुण्यै नमः । ॐ जल-वासिन्यै नमः । ॐ आपगायै नमः । ॐ शुद्धायै नमः । ॐ वरुणाय नमः । ॐ मध्यकलशेभ्यो नमः ।

अत्रादि पूजनम् - पूर्वकलशाय क्षीरोदधदिव्यभोगसमन्विताय इदमत्रादि-पूजनम् । दक्षिणकलशाय स्वादूदकायसर्व फलप्रदायइदमात्रादिपूजनम् । पश्चिमकलशाय क्षीरोदकाय दिव्यभोगसमन्विताय इदमत्रादि पूजनम् । उत्तरकलशाय दध्युदकाय सर्वसमृद्धियुक्ताय इदमत्रादि पूजनम् । मध्य-कलशाय षड्रसोदकाय सर्वज्ञानमयाय इदमत्रादि पूजनम् ।

स्थंडिले जीवमातृ पूजनम्—ॐ मत्स्यै नमः । ॐ कूर्म्यै नमः । ॐ जलौकिका-यै नमः । ॐ दुर्दर्य्यै नमः । ॐ जलगोधिताय नमः । ॐ मकर्य्यै नमः । ॐ तन्तुक्यै नमः । ॐ सर्पिण्यै नमः ।

स्थलमातृ पूजनम्—ॐ उमायै नमः । ॐ लक्ष्म्यै नमः । ॐ महामायायै नमः । ॐ पान देव्यै नमः । ॐ वारुण्यै नमः । ॐ निर्मलायै नमः । ॐ गोधा-यै नमः ।

मध्यकलशे वरुणस्य बिशेष पूजनम्

मंत्राक्षरन्यासः स्वशरीरे—ॐ वं वरुणाय जलाधिपतये अंगुष्ठाभ्यां नमः । ॐ रुं वरुणाय जलाधिपतये कनिष्ठिकाभ्यां नमः । ॐ णां वरुणाय जलाधि-पतये मध्यमाभ्यां नमः । ॐ यं वरुणाय जलाधिपतये अनामिकाभ्यां नमः । ॐ वं वरुणाय जलाधिपतये कनिष्ठिकाभ्यां नमः । ॐ मं वरुणाय जलाधि-

पतये करतलकरपृष्ठाभ्यां नमः। एवमेव हृदयादिन्यासं कुर्यात् एवं अंगन्यासं कृत्वा पूर्वबीजामानि सं पूज्य मध्ये वेदम्।

अंगन्यासः—ॐ शन्नो देवीराभिष्टय आपो भवन्तु पीतये शंय्योरभिस्र वन्तु नः वरुणस्य हृदयाय नमः। ॐ स्योनापृथिवी नो भवान्नृक्षरा निवेशनी। यच्छानः शर्म सप्रथाः वरुणस्य शिरसे स्वाहा। ॐ आपोहिष्ठा-मयो भुवस्तान ऊर्ज्जेदधातन। ॐ महे रणाय च क्षसे। ॐ योवः शिवत-मोरसस्तस्य भाजयते हनः। उशतीरिवमातरः। तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ आपोजनयथाचनः वरुणस्य शिखायै वौषट् ॐ इमम्मे वरुणस्यश्रुधी हवमद्या च मृडय त्वामवस्युराचके। वरुणस्य नेत्रत्रया-यवौषट्। ॐ तत्सवितुवरेण्यं भर्गो देवस्यधीमहि। धियो योनः प्रचोदयात्। वरुणस्य अस्त्रायफट्।

कलशेजपः पूर्वाग्नेयकलशयोः ऋग्वेदिजपः—ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनि विशमानाः। इन्द्रो यः वज्री वृषभो रराद ता आपो देवीरिह् मामवन्तु। ॐ इमम्मे वरुण श्रुधी हव मद्या चमृडय। त्वामवस्युरा चके ॐ वरुणं वो० ॐ प्रमित्राय०।

दक्षिणानैऋति कलशयोर्यजुर्वेदिनः—ॐ समुद्राय त्वा वाताय स्वाहा। सरिराय त्वा वाताय स्वाहा। अनाधृष्याय त्वा वाताय स्वाहा। प्रतिधृष्याय त्वा वाताय स्वाहा। अवस्यवे त्वा वाताय स्वाहा। शिमिदायत्वा वाताय स्वाहा। ॐ समुद्रादूर्मिम्मधुमां २ ऽउदारदुपा ँ शुना समभृतत्वमानट्। घृत-स्य नाम गुह्यं यदस्ति जिह्वादेवानाममृतस्य नाभिः स्वाहा। ॐ उक्षा समुद्रो ऽअरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेश। मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पत्यन्तौ। ॐ समुद्रंगच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देव ँ सवितारं गच्छ स्वाहा मित्रा वरुणौ गच्छ स्वाहाऽहोरात्रेगच्छ स्वाहा छन्दा ँ गच्छ स्वाहा द्यावा पृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ-सर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत-सतनमासीद। ॐ पंचनद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्। इति यजुर्वेदिजपः।

पश्चिमवायुकलशयोः साम—ॐ पवित्रं तेविततं०। ३ ॐ पयः साम ॐ गायत्री। इत्यादि सामवेदिनः पठेत्।

उत्तरेशानकलशयोः—ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतय शय्योर-विस्रवन्तुनः। ॐ अथर्व शिखा इत्यादि अथर्व वेदिनः पठेत्।

प्रार्थना—यादः पृष्ठि समारूढ पाशहस्तमहाबल।
पाहि यज्ञमिमं देव जलनाथ नमोऽस्तुते॥

वरुणोपवेशनपद्मपत्राणिपूजनम्—ॐ पूर्वपत्राय नमः। ॐ आग्नेयपत्रायनमः। ॐ दक्षिण पत्रायनमः। ॐ नैऋतपत्रायनमः। ॐ पश्चिमपत्रायनमः। ॐ वायव्य पत्रायनमः। ॐ उत्तरपत्रायनमः। ॐ ईशान पत्रायनमः। इति।

वरुणपूजा—आवाहयामि देवेशं वरुणं जल नायकम्।
यादः पृष्ठसमारूढं पाशहस्तं महाबलम्॥
आगच्छ जलदेवेश कुंभेऽस्मिन् सन्निधौभव।

वरुणावाहनम्—ॐ तत्वायामिब्रह्मणावन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहवोध्युरुश ँ समान ऽआयुः प्रमोषीः। ॐ वरुणस्यो-त्तम्नमसि० ॐ वरुणायनमः। इति श्वेतगन्धाक्षतपुष्प धूपदीप नैवेद्य ताम्बूल नानाफल दक्षिणाभिः संपूज्य नारिकेरेणार्ध्यं दद्यात्।

अर्घ्यम्—श्वेताभ्र शिखराकार सर्वभूतहिते रत।
गृहाणार्घ्यमिमं देव जलनायनमोऽस्तुते॥

प्रार्थना—नदी सागरमाश्रित्य कलशेषु समाश्रित।
प्रसादं कुरु मे देवमदीये यागमण्डपे॥
अभ्यर्थितो मयाभक्त्या परिवार समन्वित।
सान्निध्यं भवदेवेशमदीये यागमण्डपे॥
गृहाण ब्रह्मणा सेव्य प्रसादं कुरु मे अपः।
संपूज्य बहुधा भक्त्या मन्त्रमेतमुदीरयेत्॥

वरुणमंत्राः पठनीयाः—ततो जलसमीपे गत्वा ॐ वरुणरूपि वैश्वानराय नमः। इत्यग्निं जलमध्ये गंगादिभिः सम्पूज्य प्राथ्य स्रुवेण जले आज्य-होमः कुर्यात्। ॐ आपो अस्मान्० ॐ आपो हिष्ठा० ॐ वरुणस्योत्तम्भन० ॐ इमम्मेवरुण० ॐ अग्नये० स्वाहा। ॐ सोमाय०• स्वारा। ॐ सवित्रे० स्वाहा। ॐ पूष्णे० स्वाहा। ॐ बृहस्पतये०। ॐ इन्द्राय०। ॐ पोषाय०। ॐ श्लोकाय०। ॐ अंशाय०। ॐ अद्भ्यः स्वाहा। ॐ वार्म्यः स्वाहा। ॐ उदकाय०। ॐ तिष्ठं तीभ्यः स्वाहा। ॐ स्रवन्तीभ्यः स्वाहा। ॐ स्यन्दमानायस्वाहा। ॐ कूप्याय०। ॐ सूद्याय०। ॐ धार्याभ्यः स्वाहा। ॐ अर्णवाय०। ॐ समुद्राय०। ॐ सरिद्भ्यः स्वाहा।

बलिदानम्—मुद्गमाषचणकभक्तकोद्रयवादि वलिद्रव्याणि पात्रे संस्थाप्य ॐ बलिद्रव्यायनमः। गंधादिभिः संपूज्य वक्ष्यमाणमन्त्रैर्मत्स्यादिभ्यः।

जलेवलिं क्षिपेत्—ॐ यस्यकूर्मो गृहे हविस्तमग्ने वर्धयात्वम्।

तस्मैदेवाऽअधिब्रुवन्त्वयं च ब्रह्मणस्पतिः।
वलिगृह्णन्तु ते देवा येकेचिज्जलमाश्रिताः।
वुभुक्षितान्नहीनाश्च कृपणाजलवासिनः॥
दस्यवः सिंह शार्दूल ग्रन्ये ये जलमाश्रिताः।
भूतप्रेतपिशाचाश्चये केचिद्वरुणालयाः॥
तृप्तास्ते मे श्रियं दद्युर्विघ्नान्रक्षन्तु सर्वदा।
वलिं गृह्णं त्विमे देवा आदित्या वसवस्था॥
मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगाग्रहाः।
असुरा यातुधानाश्च पिशाचा मातरो नगाः॥
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः।
शाकिन्यो यज्ञ वेतालायोगिन्या पूतनाशिवा॥
जृंभकाः सिद्धगन्धर्वा माला विद्याधरा नगाः।
जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः॥
मा विघ्नं मा च मे पापं संतु परनिंदकाः।
सोम्याभवन्तु तृप्ताश्च भूताः प्रेताः सुखावहाः॥

हस्तौ प्रक्षाल्य आचामेत्।

पठेत्—ॐ समुद्रंगच्छ०। ॐ समुद्रोसि०। ॐ समुद्राद्रूर्मि०। ॐ उक्षासमुद्र० ॐ पंचनद्य०।

प्रार्थना—प्रतीचीश नमस्तुभ्यं सर्ववैरिनिषदन।

पवित्रं कुरु मे देव सर्वकार्येषु सर्वदा।
ज्ञानतोऽज्ञानतोवापि यांवन्विधिरनुष्ठितः।
तत्सर्वंत्वत्प्रसादेन संपूर्णं भवतु प्रभो॥
त्वमापो योनिः सर्वेषां देवदानव रक्षसाम्।
स्वेदजोद्भिज्जजातीनां रसानां पतये नमः॥
प्रसादं कुरु देवेश आगच्छ यज्ञमण्डपे।
अर्घ्यार्चितोमयाभक्त्या परिवारैर्जलाधिप॥
सान्निध्यं कुरुदेवेश पवित्रे यज्ञमंडपे।

इन्द्रादिदशदिग्पालेभ्यः बलिदानम्—

ॐ इन्द्रादिदशदिग्पालेभ्यो नमः। इतिगन्धादिभिः पूजांकृत्वामाषभक्तवलीन् दद्यात्। पूर्वे इन्द्रायनमः, इन्द्रानुचरेभ्योनमः इमं वलिं समर्पयामि। आग्नेय्याम्। अग्नेनमः अग्न्यमुचरेभ्यो नमम: इमं वलिं समर्पयामि। दक्षिणे यमायनमः यमानुचरेभ्योनमः इमं वलिं समर्पयामि। नैऋत्याम्। ॐ नैऋतयेनमः निऋत्यनुचरेभ्यो नमः इमं वलिं समर्पयामि। पश्चिमे। ॐ वरुणायमः वरुणानुचरेभ्योनमः इमं वलिं समर्पयामि। वायव्याम्। ॐ वायवे नमः वायोरनुचरेभ्यो नमः इमं वलिं समर्पयामि। उत्तरे। ॐ कुवेरायनमः कुवेरानुचरेभ्यो नमः इम वलिं समर्पयामि। ऐशान्यांम्। ॐ ईशानायनमः ईशानचरेभ्यो नमः इमं वलिं समर्पयमि। ईशानपूर्वयोर्मध्ये। ॐ ब्रह्मणे नमः ब्रह्मणोनुचरेभ्यो नमः इमं वलिं सुमर्पयामि। निऋंति वरुणयोर्मध्ये। ॐ अनन्तायनमः। अनन्तानुचरेभ्योनमः इमं०।

बलिदानमंत्रम्—ॐ ये देना सोदिव्येकादशस्थ पृथिव्यामध्येकादशस्य। अप्सुक्षितोमहिनैकादशस्थते देवासो यज्ञमिमंजुषध्वम्। इति वलिं दद्यात्। ततः यस्यस्मृत्या इत्यादिकर्मपूर्तिकामोविष्णुं स्मृत्वा। आचार्यादिभ्यो दक्षिणां दत्वा यथाशक्ति ब्राह्मणानभोजयेत्।

कलशाभिषेकम्—उत्तिष्ठ ब्रह्मणस्पते० तान् कलशान सुवासिन्यः सौभाग्य-

वत्योन येयु :। ततो मार्गे वारुणमंत्रान् शाकुन सूक्तं पवमान सूक्तं शांति-सूक्तं च पठन् चतुष्पथे क्षेत्रपालाय बलि दद्यात्। चत्वरे किंचिद्भूमि-मुपलिप्य दर्भानास्तीर्य पाषाणं तत्र संस्थाप्य ॐ क्षेत्रपालायनमः। इति षोडशोपचारै संपूज्य माषमुद्गभक्त सुगन्धितैल रक्तवस्त्रादियुतं बलि गृहीत्वा।

क्षेत्रपाल प्रार्थना—ॐ नमो भगवते क्षेत्रपालय भासुर नेत्र ज्वाला मुख अवतर कपिलउर्ध्वकेशललज्जिह्वशत्रून्छिधिभिधि इति। बलि दत्वा प्रत्यागच्छेत्। हस्तोपादौ प्रक्षाल्य आचम्य आचाय ब्राह्मणैसह मण्डपे आगत्यसर्वान्कुम्भाना मुद्धृत्यतत्तीयं मणिके क्षिपेत।

॥ इति जलयात्रा समाप्ता ॥

अथ वर्द्धिनीकलशस्थापनम्

यजमानः—देशकालौ सङ्कीर्त्य हस्ते जलाक्षतपुष्पाणि गृहीत्वा मम सकुटुम्बस्य-सपरिवारस्य सर्वविधकल्याणार्थं महाविष्णुयागाङ्गतया (महारुद्राङ्गतया) यज्ञप्रवेशकर्तुं वर्द्धिनीकलशदेवतानां पूजन स्थापनं च करिष्ये। इति संकल्प्य पीठोपरि अक्षतादिन अष्टदलं विधाय तत्र कलश स्थापनविधि पूर्वक वर्द्धिनी कलशं संस्थापयेत्। ततः हस्ते अक्षतान् गृहीत्वा।

वर्द्धिन्यावाहनम्—ॐ वर्द्धिन्यैनमः। ॐ ब्रह्मणेनमः। ॐ रुद्राय नमः। ॐ विष्णवेनमः। ॐ मातृभ्योनमः। ॐ सागरेभ्योनमः। ॐ मह्यैनमः। ॐ गङ्गादिनदीभ्योनमः। ॐ पुष्करादितीर्थेभ्यो नमः। ॐ गायत्र्यैनमः। ॐ ऋग्वेदायनमः। ॐ यजुर्वेदायनमः। ॐ सामवेदायनमः। ॐ अथर्व-वेदायनमः। ॐ अग्नयेनमः। ॐ आदित्येयो नमः। ॐ एकादशरुद्रेभ्यो-नमः। ॐ मरुद्भ्यो नमः। ॐ गन्धर्वायनमः। ॐ ऋषयेनमः। ॐ वरुणाय नमः। ॐ वायवेनमः। ॐ धनदायनमः। ॐ यमाय नमः। ॐ धर्माय नमः ॐ शिवाय नमः। ॐ यज्ञाय नमः। ॐ विश्वेभ्यो-देवेभ्योनमः। ॐ स्कन्दायनमः। ॐ गणेशायनमः। ॐ यक्षायनमः। ॐ अरुन्धत्यै नमः।

प्रतिष्ठा—ॐ मनोजूतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमं तनो त्वनो त्वरिष्टं। यज्ञ समिमंदधातु विश्वे देवास ऽइहमादयन्तामों ३ प्रतिष्ठ। इति सर्वोपचारैः संपूज्य।

प्रार्थना—वर्द्धिनि त्वं महाभागा सर्वतीर्थोदान्वितते।
अतस्त्वं प्रार्थये देवि भव त्वं कुलवर्धिनी ॥

इति वर्द्धिनी कलश स्थापनविधिः।

यजमानः—जलयात्रातः समानीतानां वर्द्धिनीत्याख्य नवकलशानां यज्ञमण्डपस्य मध्यवेद्याः पश्चिमेदिग्भागे वारुणमण्डल पार्श्वे समुपविश्य संकल्पं कुर्यात्।

संकल्पः—अहं महाविष्णुयागांगत्वेन वर्द्धिनीत्याख्य नवकलशानां वारुणमण्डला-धिष्ठातृ देवानां स्थापनं पूजनं च करिष्ये।

ॐ दिक्षु विदिक्षु पूर्वादिक्रमेणाष्टसु आरासुप्रदक्षिणक्रमेण स्थितेभ्यः सूर्यादि नवग्रहेभ्यो: लोकपालेभ्यश्च नमः। ॐ वायुसोमान्तरालमारभ्य अन्त-रालासु यथा क्रमं अष्ट वसुभ्यो नमः। एकादशरुद्रेभ्यो नमः। द्वादशादि-त्येभ्यो नमः। अश्विभ्यां नमः। विश्वेभ्यो देवेभ्यो नमः। पितृभ्यो नमः। यक्षेभ्यो नमः। भूतनाशेभ्यो नमः गन्धर्वाप्सरोभ्यो नमः। सोमादि अष्ट-पत्रेषु स्कन्दादि नवदेवेभ्यो नमः। ॐ स्कंदायनमः। ॐ दक्षाय नमः। ॐ दुर्गायैमम:। ॐ विष्णवे नमः। ॐ स्वधायैनमः। ॐ मृत्यवे नमः। ॐ गणपतये नमः। ॐ अद्भ्यो नमः। ॐ मरुद्भ्योनमः। ॐ वरुणाय नमः। उत्तरादितः क्रमेण केसरमूलेषु ब्रह्मादि अष्टदेवेभ्यो नमः। ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ लक्ष्म्यै नमः। ॐ अम्बिकायै नमः। ॐ सावित्र्यैनमः ॐ गंगादिनदीभ्यो नमः। ॐ सप्त सागरेभ्यो नमः। ॐ भूतग्रामायनमः। ॐ भैरवे नमः।

तद्बाह्ये श्वेतपरिधौ उत्तरादितः सोमादिसमीपे अष्टायुधदेवानामा-वाहनम। ॐ गदायैनमः। ॐ त्रिशूलायनमः। ॐ वज्रायनमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गायनमः। ॐ पाशायनमः। ॐ अंकुशायनमः। तद्बाह्येरक्तपरिधौ उत्तरादिक्रमेण गौतमादि अष्टदेवे-भ्यो नमः।

आवाहनम्—ॐ गौतमाय नमः। ॐ भरद्वाजाय नमः। ॐ विश्वामित्राय नमः। ॐ कश्यपायनमः। ॐ जमदग्नये नमः। ॐ वसिष्ठायनमः। ॐ अत्रये नमः। ॐ अरुन्धत्यै नमः।

तद्वाह्ये कृष्णपरिधौपूर्वादित: क्रमेण ऐन्द्र्यादिभ्यो नमः।

आवाहनम्—ॐ ऐन्द्र्यै नमः । ॐ कौमार्यै नमः । ॐ ब्राह्म्यै नमः । ॐ वाराह्यै नमः । ॐ चामुण्डायै नमः । वैष्णव्यै नमः । कौवेर्यै नमः । ॐ वैनायक्यै नमः ।

सूर्याद्यावाहितदेवतानां प्राणप्रतिष्ठापनं पूजनं च ।

ॐ मनोजूति० इतिप्रतिष्ठाप्य षोडशोपचारैः पूजयेत् ।

प्रार्थना—ॐ वर्द्धिनित्वं महाभावो सर्वतीर्थोदकेनान्विते ।
त्वत्तोयेन प्रपूर्येऽहं भव त्वं कुलवर्द्धिनी ॥

वर्द्धिनी कलशेषु मत्स्यादिजलमातृणामणिमासिद्धिभ्यो नमः ॥

कलश प्रार्थनम्—कलशस्यमुखे विष्णु० इति प्रार्थनां कुर्यात् ।

हस्ते जलमादाय अनेन वर्द्धिनि कलशस्थापनकर्मणा महालक्ष्मीः प्रीयताम् इति वर्द्धिनी कलशस्थापनम् ।

अथ मण्डपप्रवेशम्

ततः मण्डपस्थलं संप्राप्य संभारान् गृहीत्वा सुवासिनीर्ब्राह्मणांश्च पुरस्तात् कृत्वा वाद्यघोषादि सहिताः सपरिकरः सम्पूर्ण कुम्भोयजमानः ।

यजमानस्य: मण्डपप्रदक्षिणा—ॐ भद्रं कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः । स्थिरै रङ्गैस्तुष्टु वा ँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः । प्रदक्षिणीकृत्य मंडपस्य पश्चिमद्वारमागत्य पाणिभ्यां चार्घ्य पात्रं आदाय शांतिपाठः पठेत् । ॐ आशुः शिशानो वृषभोनभीमो-घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनो निमिषऽएकवीरः शत ँ सेनाऽअजयत्साकमिन्द्रः । ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहोजोमयि प्राणापानौ । ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः० इत्यादिकं सम्पूर्णशान्त्याध्यायानि पठेत् । द्वारदेशेऽर्घ्यंदद्यात् ।

ध्यानम्—ॐ पृथिवीं चतुर्भुजां शुक्लां कूर्मपृष्ठोऽपरि स्थिताम् पद्मशंखचक्र त्रिशूलकरां विहसितां सुप्रसन्नां गोरूपधरां सवत्सां वसुंधराम् ।

प्रार्थना—ॐ आगच्छदेवि कल्याणि वसुधे लोकधारिणः ।
पृथ्वी त्वं ब्रह्मदत्तासि काश्यपेनाभिनन्दिता ॥
भूतधात्री रत्नगर्भा विपुला सागराम्बरा ।
अस्मिन्यज्ञे महादेवि विघ्नंविध्वंसयाम्बिके ॥

पुष्पाञ्जलि—ॐ यज्ञभूम्यै नमः । इति पूर्वोपचारैः सम्पूज्य ।

प्रार्थना—ॐ उद्धृतासि वराहेण विष्णुना शतबाहुना ।
दंष्ट्रा मेलीलया देवि यज्ञार्थे त्वां वृणोम्यहम् ॥

शेष प्रार्थना—ब्रह्मणा निर्मिते देवि विष्णुनाशंकरेण च ।
पार्वत्या चैव गायत्र्या स्कंदेन श्रवणेन च ॥
यमेन पूजिता देविधर्मं वृद्धिजिगीषया ।
सौभाग्यं देहि पुत्रांश्चधनं रूपं च पूजिता ॥
गृहाणार्घ्यं च मेदेवि सौभाग्यं च प्रयच्छ मे ॥

इति यज्ञभूम्यै अष्टाङ्ग अर्घ्यंदत्वा साष्टांग प्रणिपत्य कूर्मं पूजयेत् । ॐ कूर्मासनायनमः इति रजतमयं कूर्मं संपूज्य । ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवी मनुः । ये अन्तरिक्षे ये दिवितेभ्यः सपभ्यो नमः । ॐ शेषासनाय नमः इति शेषं सम्पूज्य यज्ञमण्डपस्य पश्चिमद्वारेण प्राविशेत् । होमद्रव्यः प्रवेशः पूर्वद्वारेणादानद्रव्य प्रवेशो दक्षिण द्वारेण । दानार्थाग्निप्रतिष्ठार्थान्संभारानुत्तरद्वारेद्वारेण प्रवेशयेत् । तत आचार्यो वामहस्ते गौरसर्षपांल्लाजामिश्रितान्गृहीत्वादिग्रक्षणं कुर्यात् ।

दिग्क्षणमन्त्रः—ॐ रक्षोहणंवलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यम्मे निष्टचोयममात्यो निचखानेदमहन्तं वलगमुत्किरामि यम्मे समानोयमसमानो निचखानेद महन्तं वलगमुत्किरामि यम्मे सबन्धुर्य्यम संबंधुर्निचखानेद महन्तं वलगमुत्किरामि यम्मे सजातोयमसजातो निचखानोत्कृत्याङ्किरामि । रक्षोहणौवोवलगहनः प्रोक्षामि वैष्णवान्र क्षोहणो वो वलगहनो वनयामि वैष्णवान्रक्षोहणो वो वलगहनो वस्तृणामिर्वैष्णवान्रक्षोहणौवां वलगहनाऽउपदधामि वैष्णवीरक्षहणौ वां वलगहनौ पर्य्यूहामिवैष्णवी वैष्णवमसिवैष्णवास्त्य । रक्षसाम्भागोसिनिरस्त ँ रक्ष इदमह ँ रक्षोभितिष्ठामीदमह ँ रक्षोवबाध ऽइदमह ँ रक्षोधमन्तमो नयामि । घृतेनद्यावा पृथिवी प्रोर्णुवाथां बायो-वेस्तोकानामग्निराज्यस्य वेतु स्वाहा स्वाहा कृते उऽर्ध्वनभसंमारुत-

ङ्गच्छतम् । रक्षोहाविश्वाचर्षणि रभियोनि मयोहते । द्रोणेसधस्थमासदत् ।

अपसर्पंतुतेभूता ये भूता भूमि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तुशिवायाज्ञया ।
अपक्रामन्तु भूतानि पिशाचा सर्वतो दिशम् ।
सर्वेषामविरोधेन ब्रह्मकर्मसमारभे ।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः ।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थे तत्रगच्छतु ।
भूतप्रेतपि शाचा द्याअपक्रामन्तु राक्षसाः ।
स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमि भुव त्विमाम् ।
भूतानि राक्षसा वापि यत्र तिष्ठन्ति केचन ।
ते सर्वेऽप्यपगच्छन्तुशान्तिकं तु करोम्यहम् ।

एतैर्मन्त्रैरीशानादिसर्वदिक्षुश्वेतसर्षपान् विकीर्य देवाआयान्तुयातुधाना अपयान्तु, विष्णो देवयजनं रक्षस्व इति रक्षां कृत्वा पञ्चगव्येन कुर्लमण्डपभूमि यज्ञ संभारांश्च प्रोक्षयेत् । प्रायश्चित्तोक्त प्रकारेण पञ्चगव्यकरणम् । प्रणवेन पञ्चगव्यमालोड्य वारुण मंत्रै यज्ञभूमि प्रोक्षयेत् ।

यज्ञभूप्रोक्षणम्—ॐ हिरण्य वर्णाः शुचयः पावकाया सुजातः कश्यपोया-स्विन्द्रः । अग्नियागर्भंदधिरेविरूपास्तान आपः श ँ स्योना भवन्तु । या सां देवादि विकृण्वं तिभक्षं या अंतरिक्षे बहुधा भवन्ति । यः पृथिवी पयसोदंतिशुक्रास्तान आपः श ँ स्योनाभवंतु । शिवेन मा चक्षुषा पश्यतापः शिवया तनुवोपस्पृशतत्वचं मे । सर्वा ँ अग्नि ँ रप्सुदोहुवेवो मयि वर्चो वलमोजोनिधत्त । ततः पावनसूक्तं जपेत् ।

यजमानः—हस्तप्रमाणं चतुरस्रं चतुरंगुलोच्चं स्थंडिलं कृत्वा ।

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्यधर्त्री । पृथिवीं यच्छ पृथिवींदृ ँ ह पृथिवीम्माहि ँ सीः । पृथ्वीकूर्मानंत-देवताभ्यो नमः इति मन्त्रै षोडशोपचारैः पूजयेत् ।

पुष्पाञ्जलिः—स्वास्तिवाचनं कृत्वा ।

अथ वास्तु पूजनम्

मंडपैनैर्ऋत्य कोणे रचितं वास्तुमण्डलं तत्समीप उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य ।

संकल्पः—ॐ अद्य विष्णुदेव प्रतिष्ठा कर्मणि वास्तुपूजा कर्माऽहं करिष्ये ।

चतुर्दिक्षुशंकुरोपणम्—वास्तुमण्डल चतुष्कोणेऽश्वोदुम्बरस्य वा लोहस्य शंकु-चतुष्टयमीशानादिप्रदक्षिणेनारोपयेत् ।

मन्त्रः—ॐ विशंतुभूतलेनागा लोकपालाश्च सर्वतः ।
मंडपे ऽत्रावतिष्ठंतु ह्यायुर्वलकराः सदा ॥

ततः शंकूनां पार्श्वे रोपणक्रमेण माषभक्तदध्योदनेनवलिदानम् ।

ईशानेवलिदानम्—ॐ रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्येतत्समाश्रिताः । वलिं तेभ्यः प्रयच्छामि गृह्णंतुसततोत्सुकाः ।

आग्नेय्याम्—ॐ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः । वलि तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ।

नैऋत्ये—ॐ नैऋत्याधिपतिश्चैव नैऋत्यां येचराक्षसाः । वलिं तेभ्यः प्रयच्छामि सर्वे गृह्णंतुमं त्रितम् ।

वायव्याम्—ॐ वायव्याधिपतश्चैववायव्यां ये च राक्षसाः । बलिं तेभ्यः प्रयच्छामिपुण्यमोदनमुत्तमम् ।

सुवर्णशलाकया—ॐ लक्ष्मै नमः । ॐ यशोवत्यै नमः । ॐ कान्तायै नमः । ॐ सुप्रियायै नमः ।

रजतशलाकया—ॐ विमलायै नमः । ॐ श्रियै नमः । ॐ सुभगायै नमः । ॐ सुमत्यै नमः ।

पुष्पादीनांवानवरेखा—ॐ सुमत्यै नमः । ॐ इडायै नमः । पश्चादारम्यप्राक् पर्यंता: रेखाकार्याः । ॐ धान्यायै नमः । ॐ प्राणायै नमः । ॐ विशालायै नमः । ॐ स्थिरायै नमः । ॐ भद्रायै नमः । ॐ जयायै नमः । ॐ निशायैनमः । ॐ विरजायै नमः । ॐ विभवायै नमः । दक्षिणतः आरम्य उत्तरपर्यन्ताः नवरेखाकार्याः ।

शिखिमन्त्रः—ॐ तमीशानं जगतस्तस्थुषस्पतिं० । शिखिने नमः ।

पर्जन्यमंत्रः—ॐ शन्नोवातः पवता ँ शन्नस्तपतुसूर्य्यः । शन्नः कनिक्रदेवः पर्जन्योऽभिवर्षंतु । पर्जन्याय नमः ।

जयन्तः—ॐ मर्म्माणि वर्मणाच्छादयामि सोमस्त्वराजामृतेनानुवस्ताम् । उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानुदेवा मदन्तु । ॐ जयन्ताय नमः ।

इन्द्रः—ॐ आयातिन्द्रोवस उपनं ऽइहस्तुतः सधमादस्तुशूरः । वावृधानस्त विषीर्यस्य पूर्वी द्यौर्नक्षत्रमभिभूति पुष्यात् । ॐ इन्द्राय नमः ।

सूर्यः—ॐ वण्महाँ२ ऽअसि सूर्यवडादित्यमहाँ२ । ऽअसि महस्ते सतो-महिमापनस्यतेद्धादेवमहाँ२ असि ॐ सूर्याय नमः ।

सत्याय—ॐ व्रतेनदीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणाश्रद्धा-माप्नोति श्रद्धया सत्यमाप्यते । ॐ सत्याय नमः ।

भृशः—ॐ आत्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठा विचाचलिः । विशस्त्वासर्वा वांछन्तुमात्वद्राष्ट्रमधिभ्रशत् । ॐ भृशाय नमः ।

आकाश—ॐ या बांकशामधुमत्यमश्विना सूनृतावती । तया यज्ञमिमिक्षितम् । उपयाम गृहीतो स्यश्विभ्यां त्वैषते योनिमाध्वीभ्यांत्वा । ॐ आकाशाय नमः ।

वायुः—ॐ वायो येते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्सोमपीतये । ॐ वायवे नमः ।

पूष्णः—ॐ पूषन्तवव्रते वयन्नरिष्येमकदाचन । स्तोतारस्तऽइहस्मसि । ॐ पूष्णे नमः ।

वितथः—ॐ तत्सूर्यस्य देवत्वन्तन्महि त्वंमद्ध्या कर्तो विततं ँ संजभार । यदेदयुक्त हरितः सधस्थादाद्रात्रीवासस्तनुतेसिमस्मै । ॐ वितथायनमः ।

गृहक्षतः—ॐ अक्षन्नमीमदंतह्यवप्रिया ऽअधूषत । अस्तोषस्वभानवोविप्रा-नविष्ठयामतीयोजान्विन्द्रतेहरी । ॐ गृहक्षतायनमः ।

यमः—ॐ यमायत्वां गिरस्वते पितृमते स्वाहा । स्वाहाधर्माय स्वाहाधर्मः पित्रे । यमायनमः ।

गन्धर्वः—ॐ गंधर्वस्त्वाविश्वावसुः परिदधातुविश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः । इन्द्रस्यबाहुरसिदक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः । मित्रावरुणौत्वोत्तरतः परिधत्तांध्रु-वेणधर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः । ॐ गन्धर्वाय नमः ।

भृंगराजः—ॐ सौवीवलाकाशार्गः सृजंयः शयाण्डकस्तेमैत्राः सरस्वत्यैशारि, पुरुषवाक्श्चवाविद्धीमीशाईलोवृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् । ॐ भृंगराजाय नमः ।

मृगः—मृगोनभीमः कुचरोगिरिष्ठाः परावत आजगंथा परस्याः । सृकं ँ सं ँ शायपविमिग्मतिग्मं विशत्रूताढिविमृधोनुदस्व । ॐ मृगायनमः ।

पितृन्—ॐ उशंतस्त्वानिधीमह्युशन्तः समिधीमहि । उशन्नुशतऽ आवह पितृन्ह-विषेऽअत्तवे । पितृभ्यो नमः ।

दौवारिकः—ॐ द्वेविरूपे चरतः स्वर्थेअन्यान्यावत्समुधापयेते । हरिरन्यस्यां भवति स्वधावान्छुक्रोअन्यस्यां ददृशे सुवर्चाः । ॐ दौवारिकायनमः ।

सुग्रीवः—ॐ नीलग्रीवाः शितिकंठादिव ँ रुद्राऽउपश्रिताः । तेषां ँ सहस्रयो-जनेवधन्वानितन्मसि । ॐ सुग्रीवाय नमः ।

पुष्पदंतः—ॐ नमो गणेभ्यो गणपतिभ्यश्चवो नमो नमो व्रातेभ्यो व्रातपतिभ्य-श्चवो । नमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमो नमो विरूपेभ्यो विश्वरूपेभ्य-श्चवो नमः । ॐ पुष्पं दताय नमः ।

वरुणः—ॐ इमम्मे वरुणश्रुधीहवमद्या च मृडय । त्वामवस्युराचके । ॐ वरुणायनमः ।

असुरः—ॐ यमश्विनानमुचेरासुरादधिसरस्वत्यसुनोदिद्रियाय । इमन्त ँ शुक्रं-मधुमंतमिंद ँ सोमं ँ राजानमिहभक्षयामि । ॐ असुरायनमः ।

शेषः—ॐ याऽइषवोयातुधानानां ये वा वनस्पतीं १ रनु । ये वा वटेषुशेरते तेभ्यः सर्पेभ्यो नमः । ॐ शेषायनमः ।

पापः—ॐ एतत्ते रुद्रावसं तेन परोमूजवतोतीहि । अवततधन्वापिनाकावसः कृत्तिवासाऽअहि ँ सन्नः शिवोतीहि । ॐ पापाय नमः ।

रोगः—ॐ द्रापेऽअंधसस्पते दरिद्रनीललोहित । आसाम्प्रजानामेषां पशूनाम्माभे-रोङ्मोचनः किंचनाममत् । ॐ रोगाय नमः ।

अहिर्बुध्न्यः—ॐ अहिरिवभोगैः पर्य्येतिबाहुंज्यायाहेतिम्परिबाधमानः । हस्त-घ्नो विश्वावयुनानि विद्वान्पुमान्पुमा ँ संपरिपातु विश्वतः । ॐ अहिर्बु-ध्नाय नमः ।

मुख्यः—ॐ भवतत्यधनुष्ट्व ँ सहस्राक्षशतेषुधे। निशीर्यशल्यानां मुखा शिवोनः सुमनाभव। ॐ मुख्यायनमः।

भल्लाटम्—ॐ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमती:। यथाशमसद् द्विपदे विश्वं पुष्टं ग्रामेऽअस्मिन्नातुरम्। ॐ भल्लाटाय नमः॥

सोमम्—ॐ सोम ँ राजानमवसेग्निमन्वारभामहे। आदित्यान्विष्णु ँ सूर्यं ब्रह्माणं च बृहस्पति ँ स्वाहा। ॐ सोमाय नमः।

सर्पम्—ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजा ँ सि। योऽअस्कभायदुत्तर ँ सधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णवे त्वा। ॐ सर्पाय नमः।

अदितिः—ॐ हिरण्यरूपमुषसोव्युष्ठावयः स्थूणमुदिता सूर्यस्य। आरोहथो वरुणमित्र गर्तमतश्चक्षाथे अदितिं दितिञ्च। ॐ अदितयेनमः।

दितिः—त्वमग्ने वीर वद्यशसो देवश्च सविताभगः। दितिश्चाति वार्यम्। ॐ दितये नमः।

अपः—ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन। महेरणायचक्षसे। ॐ अद्भ्यो नमः।

अपांवत्सः—ॐ आतेवत्सोमनोजमत्परमाचित्सधस्त्यात्। अग्नेत्वांकामयागिरा। ॐ आपवत्सायनमः।

अर्यमा—ॐ यदद्यसूरऽउदितेनागा मित्रोऽअर्यमा। सुवाति सविताभगः। ॐ अर्यम्णे नमः।

सावित्रः—ॐ हस्तऽआधाय सविता विभ्रदभ्रि ँ हिरण्ययीम्। अग्नेर्ज्योतिनिचाय पृथिव्याऽअद्ध्याभरदानुष्टुभेनच्छं दसाङ्गिरस्वत्। ॐ सावित्राय नमः।

सविता—ॐ विश्वानि देवसवितर्दुरितानि परासुव। यद्भद्रं तन्नऽआसुव। ॐ सवित्रे नमः।

विवस्वान्—ॐ विवस्वन्नादित्यैषते सोमपीथस्तस्मिन्नमत्स्व। श्रदस्मैनरो वचसेदधातनयदाशीर्दादंपतीवाममश्नुतः। पुमान्पुत्रो जायतेविंदतेवस्वधा विश्वाहारएपधते गृहे। ॐ विवस्वते नमः।

विबुधाधिपः—ॐ सबोधिसूरिर्म्मघवावसुपते वसुदावन्। युयोद्ध्यस्मद्द्वेषा ँसिविश्वकर्मणे स्वाहा॥ ॐ विबुधाधिपाय नमः।

जयंतः—ॐ अषाढंयुत्सुपृतना सुपप्रि ँ स्वर्षामप्स्वांवृजतस्य गोपाम्। भरेषुजा ँ सुक्षिति ँ सुश्रुव संजयं तं त्वामनुमदेमसोम। ॐ जयन्तायनमः।

मित्रः—मित्रोन ऽ एहि सुमित्रधइंद्रस्योरुमाविशदक्षिणमुशन्नुशतं ँ स्योनः स्यानम्। स्वानभ्राजांघारेबंभारेहस्तकृशानवेतेवः सोमक्रयणास्तन्रक्षद्ध्वंमावोदभन। ॐ मित्राय नमः।

राजयक्ष्म—ॐ नाशयित्री बलासस्यार्शसऽउपचितामसि। अथो शतस्य यक्ष्माणाम्पाकारोरसिनाशनी। ॐ राजयक्ष्मणेनमः।

रुद्रः—ॐ अवरुद्रमदीमह्यवदेवंत्र्यम्बकम्। यथानोवस्यसस्करद्यथानः श्रेयसस्करद्यथानो व्यवसाययात्। ॐ रुद्रायनमः।

पृथ्वीधरः—ॐ स्योना पृथिविनो भवानृक्षरा निवेशनी। यच्छानः शर्म्मसप्रथाः। ॐ पृथिवीधरायनमः।

ब्रह्मा—ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरचोवेनआवः। सबुध्न्या ऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्च विवः। ॐ ब्रह्मणेनमः।

ईशानेचरकी—ॐ यन्तेदेवी निर्ऋ तिरानबंधपाशंग्रीवास्व विचृत्यम्। तन्ते विष्याम्यायुषोनमध्यादथैतम्पितुमद्धिप्रसूतः। नभोभूत्यैयेदं चकार। ॐ चरक्यैनमः।

विदारी अग्निकोणे—ॐ अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वपरायाधिकल्पिनमास्कंदाय सभास्थाणुं मृत्यवे गोव्यच्छमंतकाय गोघातंक्षुधेयोगां विकृतं तं भिक्षमाणा ऽउपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम्। ॐ विदार्यै नमः।

पूतना नैर्ऋतिकोणे—ॐ इन्द्रस्यक्रोडो दित्यै पाजस्यन्दिशां जत्रवो दित्यैभसज्जीमूतान् हृदयौपशेनान्तरिक्षम्पुरीततानभ ऽउदर्येण चक्रवाकौमस्ताभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशिभरुपलान्प्लीह्नावल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवंती ह्रदान्कुक्षिभ्या ँ समुद्रमुदरेणवैश्वानरभस्मना। ॐ पूतनायै नमः।

पापराक्षसी वायु कोणे—ॐ यस्यास्ते घोर ऽआसं जुहोम्येषाम्बंधानामवसर्जनाय। यांत्वा जना भूमिरितिप्रमंदते निर्ऋतिंत्वाहं परिवेदविश्वतः।

ॐ पाप राक्षस्यै नमः ।

स्कंदः पूर्वस्याम्—ॐ यत्रबाणाः संपतंति कुमारा विशिखा ऽइव । तन्न इन्द्रो-बृहस्पतिरदितिः शर्मयच्छतु विश्वाहाशर्मयच्छतु । ॐ स्कन्दाय नमः ।

अर्यमा दक्षिणस्याम्—ॐ यद्वसु ऽउदितेनागामित्रो ऽअर्यमा । सुवाति स-वितामगः । ॐ अर्यम्णे नमः ।

जृंभकः पश्चिमे—ॐ हिंकारायस्वाहा हिंकृतायस्वाहा क्रंदते स्वाहा क्रंदायस्वाहा प्रोथते स्वाहा प्रप्रोथायस्वाहा । गंधाय स्वाहा घ्राताय स्वाहानिविष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गतेस्वाहा सीनायस्वाहा शयानाय-स्वाहा स्वपतेस्वाहा जाग्रते स्वाहा कूजतेस्वाहा प्रबद्धायस्वाहा विजृम्भ-मानायस्वाहा विचृतायस्वाहा स ँ हानायस्वाहोपस्थितायस्वाहायनायस्वाहा प्रायणायस्वाहा । ॐ जृंभकायनमः ।

पिलिपिच्छउत्तरे—ॐ कास्विदासीत्पूर्वचित्तिः कि ँ स्विदासीद्बृहद्वयः । कास्विदासीत्पिलिपिलाकास्विदासीत्पिशंगिला । ॐ पिलिपिच्छायनमः ।

इन्द्रः पूर्वे—ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम् । ह्वयामि शक्रम्पुरुहूतमिन्द्र ँ स्वस्तिनो मघवा धात्विन्द्रः । ॐ इन्द्रायनमः ।

अग्निः आग्नेयाम्— ॐ त्वन्नो ऽअग्ने वरुणस्य विद्वान्देवस्य हेडो ऽअवया सिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ँ सिप्रमुमुग्ध्य-स्मत् । ॐ अग्नयेनमः ।

यमः याम्ये—ॐ यमा यत्वा मङ्खायत्वा सूर्यस्यत्वा तपसे । देवस्त्वा सविता-मध्वानक्तु पृथिव्याः स ँ स्पृशस्पाहि अर्चिरसि शोचिरसि तपोसि । ॐ यमायनमः ।

निऋतिः नैऋत्याम्—ॐ असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहि-तस्करस्य । अन्यमस्मदिच्छसात इत्यानमो देवि निऋते तुभ्यमस्तु । ॐ नैऋतयेनमः ।

वरुणः पश्चिमे—ॐ वरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनी स्थोवरुणस्य ऽऋत सदन्यसि वरुणस्य ऽऋत सदनमसि वरुणस्य ऽऋत सदनमासीत । ॐ वरुणायनमः ।

यज्ञम् । वायो ऽअस्मिनृत्सवनेमादयस्व यूयं पातस्वस्तिभिः सदानः । ॐ वायवेनमः ।

कुबेरः उत्तरे— ॐ वय ँ सोमव्रतेतवमनस्तनूषुविभ्रतः । प्रजावन्तः सचेमहि । ॐ कुबेरायनमः ।

ईशानः ईशान्याम्—ॐ तमीशानं जगतस्तस्थुषस्पतिंधियं जिन्वमवसे हूमहे वयम् । पूषानो यथावेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये । ॐ ईशानायनमः ।

ब्रह्मा ईशान पूर्वयोर्मध्ये—ॐ अस्मे रुद्रामेहना पर्वतासोवृत्रहत्ये भरहूतौ सजोषाः । यः श ँ सतेस्तुवतेधायिपज्र ऽइन्द्रज्येष्ठा ऽअस्माँ२ अवन्तु देवाः । ॐ ब्रह्मणेनमः ।

अनन्तः (निऋति वरुणयोर्मध्ये)—ॐ स्योना पृथिवि नोभवानृक्षरा निवेशनी । यच्छानः शर्म सप्रथा । ॐ अनन्तायनमः । इत्यावाह्य ॐ वास्तुपीठ देवताभ्योनमः ।

प्रतिष्ठा—ॐ मनोजूति र्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वारिष्टं यज्ञ ँ समिमंदधातु । विश्वेदेवास ऽइहमादयन्तामो३ प्रतिष्ठ ।

पूर्वोक्त कलशस्थापनविधिना ताम्रकलशं संस्थापयेत् तदुपरि-कूर्मकलरूपां सर्पमयीं वा वास्तु प्रतिमामग्न्युत्तारणपूर्वकं सन्निधायपट्ट वस्त्रार्धेराच्छाद्य ततस्तं सकलदेवताधिष्ठितावयवमुत्तानमीशानकोण स्थित-शिरसं नैऋत्यकोणस्थितपादं यथाकारं वास्तुपुरुषं ध्यायेत् ।

संकल्पः—ॐ देशकालौ संकीर्त्यास्यांमूर्तौविघातादिदोषपरिहारार्थमग्न्युत्तारणं देवता सान्निध्यार्थं च प्राण प्रतिष्ठां करिष्ये । मूर्ति पात्रे निधाय घृते-नाम्यज्यातदुपरिदुग्धधारां जलधारां च पातयेत् अग्न्युत्तारण सूक्तं वारद्वय पठेत् ।

अग्न्युत्तारणसूक्तम्—ॐ समुद्रस्यत्वावकयाग्ने परिव्ययामसि । पावकोऽ-अस्मभ्य ँ शिवो भव । ॐ हिमस्यत्वा जरायुणाग्ने परिव्ययामसि । पावको ऽअस्मभ्य ँ शिवोभव । ॐ अपामिदं न्ययन ँ समुद्रस्य निवेशनं । अन्यांस्ते अस्मत्तपन्तु हेतयः पावको ऽअस्मभ्य ँ शिवोभव ।

हेतयः पावको ऽस्मभ्य ँ शिवोभव । ॐ प्राणदाऽपानदा व्यानदा वर्चोदावरिवोदाः । अन्यांस्ते अस्मत्तपन्तुहेतयः पावको ऽस्मभ्य ँ शिवोभव ।

ध्यानम्—ॐ आसीत्पूर्वं महादैत्यो वास्तुर्यज्ञापकारकः । सदेवैर्बहुकालेन युद्धे हत्वा महीतले । निपात्यवहुभिर्देवैर्निबद्धश्चस्रुचस्रुकः । ईशानेमस्तको-न्यस्तोनैऋत्ये पादसंपुटम् । जानुनी कूर्परौ कृत्य बाहुयुग्मं तथैव च । वायव्याग्न्यो स्ततो जानुं हृदये चांजलिस्तथा । पदीकृत्य च तस्योर्ध्वं स्वयमुक्ताः सुराः स्थिताः ।

वास्तुनामावलि—ॐ शिखिनेनमः । ॐ पर्जन्यायनमः । ॐ जयन्तायनमः । ॐ कुलिशायुधायनमः । ॐ सूर्यायनमः । ॐ सत्यायनमः । ॐ भृशायनमः । ॐ आकाशायनमः । ॐ वायवेनमः । ॐ पूष्णेनमः । ॐ वितथायनमः । ॐ गृहक्षतायनमः । ॐ गन्धर्वायनमः । ॐ भृंगराजायनमः । ॐ मृगाय नमः । ॐ पितृभ्योनमः । ॐ दौवारिकायनमः । ॐ सुग्रीवायनमः । ॐ पुष्पदन्तायनमः । ॐ वरुणायनमः । ॐ असुरायनमः । ॐ शोषायनमः । ॐ पापायनमः । ॐ रोगायनमः । ॐ अहयेनमः । ॐ मुख्यायनमः । ॐ भल्लाटायनमः । ॐ सोमायनमः । ॐ सर्पेभ्योनमः । ॐ अदित्यैनमः । ॐ अद्भ्यः नमः । ॐ सवित्रायनमः । ॐ जयायनमः । ॐ रुद्रायनमः । ॐ अर्यम्णेनमः । ॐ सवित्रेनमः । ॐ विवस्वते नमः । ॐ विबुधाधिपाय नमः । ॐ मित्रायनमः । ॐ राजयक्ष्मणे नमः । ॐ पृथ्वीधरायनमः । ॐ आपवत्सानमः । ॐ ब्रह्मणेनमः । ॐ वास्तो-ष्पतयेनमः । ॐ चरक्यैनमः । ॐ विदार्यैनमः । ॐ पूतनायैनमः । ॐ पापराक्षस्यैनमः । ॐ अर्यम्णेनमः । ॐ स्कंदायनमः । ॐ जृंभकाय नमः । ॐ पिलिपिच्छायनमः । ॐ इन्द्रायनमः । ॐ अग्नयेनमः । ॐ यमायनमः । ॐ निर्ऋतयेनमः । ॐ वरुणायनमः । ॐ वायवेनमः । ॐ सोमायनमः । ॐ ईशानायनमः । ॐ ब्रह्मणेनमः । ॐ अनन्तायनमः ।

अथ मूर्तिप्राणप्रतिष्ठा

संकल्पः—देशकालो संकीर्त्य अस्याः श्री वास्तु प्रतिमाया घटनादि दोप-परिहारार्थम् अग्न्युत्तारण पूर्वकं प्राणप्रतिष्ठां करिष्ये । मूर्ति घृतेनाभ्यक्तां दुग्धमिश्रितजलधारया सन्तर्पयेत् ।

अग्न्युत्तारणमन्त्रः—ॐ प्राणदा ऽपानदा व्यानदा वर्चोदा वरिवोदाः । अन्यांस्ते ऽस्मत्तपन्तु हेतयः पावकोऽस्मभ्य ँ शिवोभवा ।

प्राणप्रतिष्ठा—ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं हं सः सोऽहम् अस्याः वास्तु प्रतिमायाः प्राणा इह प्राणाः ।

जीव प्रतिष्ठा—ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं हं सः सो ऽहं अस्या वास्तु प्रतिमायाः जीव इह स्थितः ।

इन्द्रिय प्रतिष्ठा—ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं हं सः सोऽहं अस्या वास्तु प्रतिमायाः सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्र जिह्वा घ्राणपाणि पादपायूपस्थानि इहैवागत्य चिरं तिष्ठन्तु स्वाहा ।

नेत्रोन्मीलनम्—ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा ऽअसिचक्षु र्मेदेहि । गन्धादि पञ्चोपचारान् दत्वा संस्कारसिद्धयर्थं षोडश प्रणवावृत्ति कुर्यात् । अनेनास्या वास्तु प्रतिमाया गर्भाधानादि संस्कारान्सम्पादयामि ।

ॐ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाःक्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन । ततो वास्तुदेवेभ्यो नाममन्त्रैः बलिदानं दत्वा त्रिसूत्र्या मण्डपं समावेष्टय ॐ कृणुष्व: इत्यादि जलदुग्धधारां दद्यात् ।

अथ मण्डपपूजनम्

संकल्पः—ॐ अद्येतत्सदद्य विष्णु प्रीतिकामः (रुद्रयागे सदाशिव प्रीतिकामः) मण्डप स्तम्भ द्वार तोरणायुध विष्णोः शखचक्रगदापद्म (शिवस्य चतुस्त्रिशूल) दिक्पालध्वजपताका वेदिकास्तंभाणां स्थापनपूर्वकं पूजनमहं करिष्ये ।

स्तम्भखननम्—ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी यच्छानः शर्म सप्रथाः ।

जलेनसिंचनम—ॐ सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै वभ्र्वै मदेकिन्त्वो वदति किन्त्वः ।

दधिषेचनम्—ॐ दधिक्राव्णो ऽकारिषं०

यव प्रक्षेपः—ॐ धानावन्त करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्वनः ।

हिरण्यम्—ॐ हिरण्य गर्भः समवर्तताग्रे भूतस्यं जातः पतिरेक ऽआसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।

स्तम्भारोपणम्—ॐ उर्ध्वं ऽऊषुणऽऊतये तिष्ठादेवो न सविता । उर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे । नागमात्रे नमः । सर्पेभ्योनमः ।

स्तम्भे सूत्रबंधनम्—ॐ वसोः पवित्रमसि शतधारं०

शाखाबंधनम्—ॐ आयं गौः पृश्निरक्रमीदसन्मातरं पुरः । पितरं च प्रयन्त्स्वः ।

स्तम्भाभिमंत्रणम्—ॐ यतो यतः समीहसे ततोनो ऽअभयं कुरुशन्नःकुरु प्रजाभ्यो ऽभयन्नः पशुभ्यः ।

कलशपूजनम्—कलश स्थापनविधिना कलशं संस्थाप्य पूजयेत् । एवमेव सर्वेषां षोडशस्तम्भानां स्थापनं कुर्यात् । मण्डपान्तर्गत ऐशानीतः आरभ्य मध्यस्थांश्चतुः स्तभान पूजयेत् ।

१ **सुभद्रस्तंभायनमः**—ॐ ब्रह्मयज्ञानं० ब्रह्मणेनमः । स्थूणायां ॐ वसुदायैनमः ॐ वास्तुदेवतायै नमः । ॐ ब्राह्मनमः, गंगायै नमः । ॐ उर्ध्वं ऊषुण० नागमात्रे नमः आयङ्गौ० यतो यतः० ।

यह विधि मन्त्र सहित १६ स्तम्भों में ही प्रयुक्त करें ।

इतित्रयोऽपिविधयः सर्वस्तम्भेषु विधेयाः ।

२ **विजयस्तंभाय**—ॐ इदं विष्णु० विष्णवेनमः । स्थू० ॐ भद्रायै नमः । ॐ लक्ष्म्यनमः । ॐ नन्दायैनमः । ॐ वैष्णव्येनमः ।

३ **केदारस्तंभाय**—ॐ नमस्ते रुद्र० सदाशिवायनमः । स्थू० ॐ आदित्यैनमः । ॐ गौर्य्यैनमः । ॐ माहेश्वर्यै नमः । ॐ शोभनायै नमः ।

४ **श्रीमतेस्तम्भाय**—ॐ इन्द्र आसान्नेता० इन्द्रायनमः । स्थू० नंदायैनमः । इन्द्राण्यै० । ॐ आनन्दायै०, विभूत्यै० ।

मण्डपाद्बाह्ये वेदिकायां ईशानादि क्रमेणद्वादशस्तंभानां पूजनं कार्यम् ।

१ **महायशः स्तंभाय**—ॐ आकृष्णेनरजसा० द्वारशादित्येभ्योनमः । स्थ० भूत्यै० । सौर्यै० मूर्त्यैमंगलायै नमः ।

२ **मंगलस्तंभाय**—ॐ गणानान्त्वा० ओंगणपतये नमः । सरस्वत्यैनम :, विघ्नहारिण्यै०, जयायै० गणेश्वर्यै ।

३ **गुणस्तंभाय**—ॐ असि यमो ऽस्या० ॐ धर्मराजायनमः । स्थू० ॐ पूर्वसंध्यायै, अंजन्यै, क्रूरायै, नियन्त्र्यै ।

४ **जयस्तंभाय**—ॐ नमोऽस्तु० ॐ शेषायनमः, स्थू० मध्यम संध्यायै० धरायै, पद्मायै महापद्मायै नमः ।

५ **धनदस्तंभाय**—ॐ यदक्रंदः० ॐ स्कन्दायनमः । स्थू० पश्चिम संध्यायै, वल्लर्यै देवसेनायै० । ॐ महाशक्तये नमः ।

६ **कल्याणस्तंभाय**—ॐ आनो नियुद्भिः० ॐ वायवेनमः । स्थू० गायत्र्यै, वायव्यै, प्राणेश्वर्यै, सुषुम्णायै० ।

७ **शुभस्तंभाय**—ॐ इम देवा असपत्न० ॐ सोमायनमः । स्थू० सावित्र्यै, अमृतकलायै, विजयायै, इडायै ।

८ **शांतस्तंभाय**—ॐ तत्वायामि० ॐ वरुणायनमः । स्थू० वृहत्यै, वारुण्यै ॐ पाशधारिण्यै, प्राण शक्तयै० ।

९ **मनोरमस्तंभाय**—ॐ वसोः पवित्रमसि० ॐ अष्ट वसुभ्यो नमः , स्थू० ॐ आदित्यै, मूर्त्यै, अणिमायै, ॐ गरिमायै नमः ।

१० **ऋद्धिदस्तंभाय**—ॐ वय ँ सोमव्रते० ॐ धनदायनमः । स्थू० विनतायै नमः आदित्यायै, लघिमायै, महिमायै ।

११ **सिद्धिदस्तंभाय**—ॐ वृहस्पते० गुरवे नमः । स्थू० ॐ पौर्णमास्यै, अन्तः स्फूर्त्यै, अन्तर्दृष्ट्यै, ज्ञानशक्त्यै ।

१२ **विचित्रस्तंभाय**—ॐ विश्वकर्मण हविषा० ॐ विश्व कर्मणे नमः । स्थू० सिनीवाल्यै, वास्तुदेवतायै, विश्वकर्त्र्यै विज्ञान शक्तयै । अथ पूर्वादि चतुर्दिक्षु तोरणपूजनम् ।

१ **पूर्वे**—ॐ मंगलनाम पूर्व द्वाराय नमः । ॐ अग्निमीले० इति सुदृढाख्याश्वत्थ तोरणाय नमः । तस्य मस्तके पांचजन्य शंखाय नमः (रुद्रयागे मंगलाख्य वैष्णव त्रिशूलाय नमः) । दक्षिण ॐ राहवे नमः । वामे ॐ वृहस्पतये नमः । तत्रकलशं संस्थाप्य तत्र ॐ ध्रुवाय नमः ।

२ **दक्षिणे**—ॐ धर्मिष्ठनामकद्वाराय नमः । ॐ इषेत्वा० सुभद्राख्योदुम्बर तोरणाय नमः तस्य मस्तके सुदर्शन चक्राय नमः । (रुद्रयागे शत्रुघ्नाख्य

रौद्रत्रिशूलायनमः) दक्षिणे सूर्यायनमः वामे अंगारकायनमः। कलशं संस्थाप्य तत्र धरायै नमः।

३ पश्चिमे—ॐ विजयद्वाराय नमः। ॐ अग्नऽआयाहिवीतये० ॐ सुभीमाख्य (सुशर्माख्य) प्लक्षतोरणाय नमः। तस्य मस्तके कौमोदकीगदायै नमः। (रुद्रयागे पुत्रप्रदाख्य ब्राह्मत्रिशूलाय नमः।) दक्षिणे-शुक्राय नमः। वामे बुधायनमः। स्थापितकलशे बाक्पतये नमः।

४ उत्तरे—ॐ कल्याणद्वारायनमः। ॐ शन्नोदेवी०। ॐ सुप्रभाख्य (सुहोत्राख्य) वट तोरणाय नमः। तस्य मस्तके ॐ पद्मायुधाय नमः (रुद्रयागे उत्तमाख्य सौम्यत्रिशूलायनमः) दक्षिणे ॐ सोमाय नमः। वामे ॐ केतुशनिभ्यां नमः। स्थापितकलशे विघ्नवारणाय नमः। इतिपञ्चोपचार पूजनम्।

अथ दिक्पालद्वारपूजा

पूर्वस्यां सुमंगलद्वारे—ॐ त्रातारमिन्द्र० इति इन्द्रमावाह्य। द्वारशाखयोः प्रशान्तशिशिरनामानौ कलशौ संस्थाप्य ॐ ध्रुवायनमः, ॐ अध्वरायनमः। ॐ ऐरावतदिग्गजायनमः। उत्तरांगे गणेशायनमः। वामदक्षिणस्तंभयोः भूर्लोकाय नमः। भुवर्लोकायनमः। कलश द्वये ॐ गंगायैनमः, ॐ यमुनायै नमः। ॐ आदित्यायनमः। ॐ सोमायनमः। दक्षिणवाम शाखयोः धात्रेनमः, विधात्रे नवः। ऊर्ध्वम् उर्ध्वश्रियैनमः। अधः देहल्यैनमः। मध्ये-वास्तुपुरुषायनमः। द्वारस्तम्भयोः गणेशायनमः, स्कंदायनमः। ऋग्वेदिनौ द्वारपालौ वृत्वा। ॐ अग्निमीले० संपूज्य। द्वारकलशयोः इन्द्राय सामगायत विप्राय बृहते बृहत्। धर्म कृते बिपश्चिते पनस्यवे। इन्द्रं संपूज्य ॐ इन्द्रायाहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः। इति पीतपताका ध्वजौ च समालभ्य। यो मे दण्डः परापत द्वैहायसोऽधिभूम्यान्तमहं पुनरादहे। आयुषे ब्रह्मणेवर्चसाय। इति ध्वजदण्डोच्छ्रयणम्। ततः ध्वजे कुमुदायनमः। पताकायां-हेतुकायनमः। ततः इन्द्राय वलिदानम्। ❀ अग्निकोणं गत्वा कलशं संस्थाप्य। ॐ पुण्डरीकायनमः। कलशेअग्नये नमः इति अग्निं संपूज्य। ॐ अग्निस्तिग्मेनशोचिषाया सद्विश्वन्यत्रिणम्। अग्निर्नो वनते रयिम्। इति रक्तपताकाध्वजौ समुच्छ्राय्य। सांगाय अग्नय वलिदानम् दद्यात्।

दक्षिणस्यां सुधर्म्मिष्ठद्वारे—ॐ असियमो० यममावाह्य। द्वारशाखयोः पर्जन्याशोकनामानौकलशौसंस्थाप्य ॐ सोमायनमः ॐ अद्भ्योनमः। ॐ वामनदिग्गजाय नमः। उत्तरांगे गणेशायनमः। वामदक्षिण स्तंभयोः स्वर्लोकायनमः। महर्लोकायनमः। कलशद्वये ॐ गोदावर्यैनमः। ॐ कृष्णायैनमः। ॐ भौमायनमः। ॐ बुधायनमः। दक्षिणवामशाखयोः ॐ धात्रेनमः, ॐ विधात्रे नमः। ऊर्ध्वम् ऊर्ध्वश्रियैनमः। अधो देहल्यैनमः। देहलीमध्वे वास्तु पुरुषायनमः। द्वारस्तम्भयोः पुष्पदंताय नमः, कपर्दिनेनमः, यजर्वेदिनौ द्वारपालौ वृत्वा ॐ इषेत्वोर्ज्जेत्वा० इति संपूज्य। द्वारकलशयोः ॐ यमायत्वा० इति यमं संपूज्य कृष्णपताकाध्वजौ समुच्छ्रयेत्। सांगाययमाय बलिदानम्। ❀ नैर्ऋत्य कोणं गत्वा कलशं संस्थाप्य ॐ कुमुदायनमः ॐ दुर्जयायनमः। कलशे नैर्ऋतये नमः। ॐ मोषुणइन्द्रात्रपृत्सुदेवौ रस्तिहिणते शुष्मिन्नवयाः। महश्चिद्यस्य मीढुषो यव्याहविष्मतो मरुतो वन्दतेगीः। इति धूम्रपताकाध्वजौ समुच्छाय समालभ्य च निर्ऋतये वलिदानम्।

पश्चिमस्यांजयद्वारे—ॐ इमम्मे० इति वरुणमावाह्य। द्वारशाखयोः संजीवनामृतनामानौ कलशौसंस्थाप्य ॐ अनिलायनमः, ॐ अनलायनमः, ॐ अंजनाख्यदिग्गजायनमः। उत्तराङ्गे गणेशायनमः। वामदक्षिणस्तम्भयोः ॐ जनलोकायनमः। तपोलोकायनमः। कलशद्वये ॐ रेवायैनमः, ॐ तार्प्यै नमः, ॐ वृहस्पतये नमः, ॐ शुक्रायनमः। दक्षिणवामशाखयोः ॐ धात्रेनमः ॐ विधात्रेनमः ऊर्ध्वं ऊर्ध्वश्रियैनमः। अधोदेहल्यै नमः। मध्येवास्तुपुरुषाय नमः। द्वारस्तंभयोः नंदिनेनमः ॐ चण्डायनमः। सामवेदिनौ द्वारपालौवृत्वा ॐ अग्न आयाहिवीतये० इति संपूज्य द्वारकलशयोः ॐ वरुणस्योत्तम्भत० वरुणसंपूजय श्वेतपताकाध्वजौ समुच्छ्राय। ध्वजे शंकुकर्णायनमः। पताकायं क्षेत्रपालायनमः। वरुणाय बलिदानम्। ❀ वायुकोणं गत्वा कलशं संस्थाप्य पुष्पदंतायनमः। सिद्धार्थायनमः। ॐ तववायवृतस्पते त्वष्टुर्ज्जामातरद्भुत। अवा ँ स्यावृणीमहे। वायवेनमः। वायुं संपूज्य पीतपताकाध्वजौ समुच्छ्राय वायवे बलिदद्यात्।

उत्तरस्यां कल्याणद्वारे—ॐ वय ँ सोम० इति आवाह्य । द्वारशाखयोः धनद श्रीप्रदनामानौ कलशौ संस्थाप्य प्रत्यूषायनमः । प्रभासायनमः । इति वसुद्वयंसंपूज्य । ॐ सार्वभौमनामकदिग्गजायनमः । उत्तराङ्गे गणेशाय-नमः । वामदक्षिणस्तंभयोः ॐ सत्यलोकायनमः । ॐ ध्रुवलोकायनमः । कलशद्वये वेण्यैनमः । पयोष्ण्यै नमः । शनैश्चराय नमः । राहवे नमः । दक्षिणशाखयोः धात्रे नमः । विधात्रे नमः । ऊर्ध्वं ऊर्ध्वश्रियै नमः । अधोदेहल्यैनमः । मध्येवास्तुपुरुषायनमः । द्वारस्तंभयोः पार्वतीशायनमः । चण्डेश्वरायनमः । अथर्ववेदिनौ द्वारपालौवृत्वा ॐ शन्नो देवीरभिष्टय० सम्पूज्य द्वारकलशयोः ॐ ह ँ सः शुचिषदसुरन्तरिक्षसद्धोता वेदिषदतिथि-र्दुरोणसत । नृषद्वरसदृतसदव्जागोजाऽऋतजाऽअद्रिजाऽऋतं वृहत् । ॐ कुवेरायनमः । इति रक्तपताकाध्वजौ समुच्छ्राय समालभ्य च कुवेराय-यक्षराजायबलिं दद्यात् । ❀ **ईशानकोणं** गत्वा कलशं संस्थाप्य तत्र सुप्रतीकायनमः । ॐ सुमंगलायनमः । ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां । ब्रह्माधिपति र्ब्रह्मणोधिपति र्ब्रह्माशिवोम् । इति मंत्रेण ईशानं संपूज्य श्वेतपताकाध्वजौ समुच्छ्रायेत् । ततः ईशानाय बलिं दद्यात् । ततः ❀ ईशान पूर्वयोर्मध्ये ब्रह्मयज्ञान० मंत्रेण कलशे ब्रह्माणं संपूज्य रक्तवर्णौ पताकाध्वजौ समुच्छ्राय समालम्य च ब्रह्मणे बलिदानम् । ❀ नैर्ऋतिपश्चिमयो र्मध्यस्थानंगत्वा कलशे अनन्तमावाह्य ॐ नमो ऽस्तु० इति पताकाध्वजौ उच्छ्राय समालभ्य बलिदानं कुर्यात् ॐ भूतनाथाय क्षेत्र-पालाय नमः । ❀ मण्डपमध्ये ॐ ब्रह्मयज्ञानं० मन्त्रेण महाध्वजं संपूज्य वंशेकिन्नरेभ्यो नमः । ॐ इन्द्रस्यवृष्णो वरुणस्य राज्ञआदित्यानां मरुता ँ शर्द्धऽउग्रम महामनसाम्भुवनच्यवानाङ् घोषो देवानाञ्जयतामुदस्थात् इति मंत्रेण मंडपमध्ये महाध्वजं स्थापयेत् । तत्र प्राच्यां ॐ गणानान्त्वा० इति गणपतिंसंपूज्य ॐ नमो ऽस्तु रुद्रेभ्यो येदिवियेषा० इति मंडपवाह्ये दिग्वि-दिक्षु रुद्रान् संस्थापयेत तेभ्यो बलिदानम् ।

अथ सर्वभूतेभ्योबलिदानं

विद्याधराप्सरो लोकासुराश्चैव पन्नगाः ।
सपत्नी परिवारश्च प्रतिगृह्णन्तु इमं बलिम् ।
नक्षत्राधिपतिश्चोर्ध्वं नक्षत्रैः परिवारिताः ।
स्थानं चैवपितृणांतु सर्वे गृह्णंतु इमं बलिम् ।
ईशानोत्तरयोर्मध्येक्षेत्रपाला महाबलाः ।
भीमनाभामहादंष्ट्रा सर्वे गृह्णंत्विमं बलिम् ।
येकेचिदिह लोके तु आगताबलि कांक्षिणः ।
तेभ्यो बलि प्रयच्छामि नमकृत्य पुनः पुनः ।
बलिं गृह्णन्तु इमे देवा आदित्यावसवः तथा ।
मरुतोऽप्यश्विनौ रुद्राः सुपर्णाः पन्नगाग्रहाः ।
असुरायातुधानाश्च पिशाचामातरो नगाः ।
शाकिन्यो यक्षबेताला योगिन्यः पूतनाः शिवा ।
जृंभकाः सिद्धगन्धर्वा आद्याविद्याधरा नराः ।
दशैवदिक्पालाश्च ये च विघ्नविनायकाः ।
सौम्यां भवंतु ते तृप्ता देवासुरगणास्तथा ।
ततो मंडपात्पूर्वस्यां दिशि किंचिद्भूमि-
मुपलिप्य तत्रोपविश्य ।
त्रैलोक्येयानि भूतानि स्थावराणि चराणि च ।
ब्रह्माविष्णुशिवैः सार्द्धरक्षां कुर्वन्तु तानि मे ।
देवदानवगंधर्वयक्षराक्षस पन्नगाः ।
ऋषयो मुनयो गावो देवमातर एव च ।
सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ।
ब्रह्माविष्णुश्च रुद्रश्च क्षैत्रपालो गणैः सह ।
रक्षन्तु मण्डपं सर्वघ्नन्तु रक्षांसि सर्वतः ।
एवं संप्रार्थ्य श्लोकोक्तदेवान्नाममं त्रै तस्यामेव भूमौ पूजयेत् ।

ॐ त्रैलोक्येभ्यः स्थावरेभ्यो भूतेभ्यो नमः त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्यो नमः । ब्रह्मणे नमः, विष्णवे नमः शिवाय नमः दानवेभ्यो नमः गंधर्वेभ्यो नमः यक्षेभ्योनमः । राक्षसेभ्यो नमः, पन्नगेभ्योनमः ऋषिभ्यो नमः मुनिभ्यो नमः, गोभ्यो नमः, देवमातृभ्यो नमः, एवं प्रत्येकं संपूज्य भूमौ तेभ्यः बलि ततः पाणिपादौ प्रक्षाल्य यजमानः प्राग्द्वारेण समस्त ऋत्विक्

मंडल परिवृत: मंडपं प्रविश्य महाविष्णु (महाशिवादि) प्रधानदेव समीपं समागत्य उपविश्य मंडपपूजापरिपूर्णतां प्रार्थयेत् ।

मण्डपस्यप्रधानवेद्यां सर्वतोभद्रपूजनम्

संकल्पः—देशकालौ संकीर्त्य श्रीनारायणप्रीतये विष्णुदेवप्रतिष्ठायज्ञकर्मणि एतस्मिन् सर्वतोभद्रमंडले वेदमन्त्रैर्ब्रह्मादिदेवानामावाहनं पूजनं करिष्ये ।

ब्रह्मा—ॐ ब्रह्मयज्ञानं प्रथमम्पुरस्ताद्विसीमत: सुरुचोवेनऽआव: । सबुध्न्या उपमा ऽअस्यविष्ठा: सतश्च योनिमसतश्चविव: । ॐ ब्रह्मणे नम: ।

उत्तरेवाप्यां सोमम्—ॐ वय ँ् सोमव्रतेतवमनस्तनूषुविभ्रत: । प्रजावन्त: सचेमहि । ॐ सोमाय नम: ।

ईशान्यां खंडेन्दौ ईशानम्—ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् । पूषानो वेदसामसद्वृधे रक्षिता पायुरदब्ध: स्वस्तये । ॐ ईशानाय नम: ।

पूर्वस्यां खंडेन्दौ इन्द्रम्—ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ् हवे हवे सुहव ँ् शूरमिन्द्रम् । ह्वयामि शक्रम्पुरुहूतमिन्द्र ँ् स्वस्तिनो मघवा धात्विन्द्र: । ॐ इन्द्राय नम: ।

आग्नेय्यामग्निम्—ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोअवयासिसीष्ठा: । यजिष्ठो वह्नितम: शोशुचानो विश्वा द्वेषा ँ् सि प्रमुमुग्ध्यस्मत् । ॐ अग्नयेनम: ।

दक्षिणेवाप्यां यमम्—ॐ सुगन्नु पंथाम्प्रदिशन्न ऽएहि ज्योतिष्मध्ये ह्यजरन्न ऽआयु: । अपैतुमृत्युममृतम्म ऽआगाद्वैवस्वतो नो ऽअभयं कृणोतु । ॐ यमाय नम: ।

नैऋत्यां खण्डेन्दौ निर्ऋतिम्—ॐ असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा त ऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु । ॐ निर्ऋतये नम: ।

पश्चिमेवरुणम्—ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहर्विभि: । अहेडमानो वरुणेह बोद्ध्युरुश ँ् समान आयु: प्रमोषी: । ॐ वरुणाय नम: ।

वायव्यां खण्डेन्दौ वायुम्—ॐ आनो नियुद्भि: शतिनीभिरद्ध्वर ँ् सहस्रिणीभिरुपयाहि यज्ञम् । वायो ऽअस्मिन्त्सवने मादयस्व यूय पात स्वस्तिभि: सदा न: । ॐ वायवे नम: ।

वायुसोमयोर्मध्ये ऽअष्टवसून्—ॐ वसुभ्यस्त्वा रुद्रेभ्यस्त्वा ऽऽदित्येभ्यस्त्वा सञ्जनाथां । द्यावा पृथिवीमित्रावरुणौत्वा वृष्ट्यावताम् ।। व्यन्तु वयोक्त ँ् रिहाणां मरुतां पृषतीर्गच्छवशापृश्निर्भूत्वा । दिवं गच्छ ततो नो वृष्टिमावह । चक्षुष्पा अग्ने ऽचक्षुर्मे पाहि । ॐ अष्टवसुभ्यो नम: ।

सोमेशानोर्मध्ये ईशानम्—ॐ नमस्ते रुद्रमन्यव उतो त इषवे नम: । बाहुभ्यामुत ते नम: । ॐ एकादशरुद्रेभ्यो नम: ।

ईशानपूर्वयोर्मध्ये द्वादशादित्यान्—ॐ यज्ञो देवानां प्रत्येति सुम्नादित्यासो भवतामृडयन्त: । आवोऽर्वाची सुमतिर्ववृत्याद ँ् होश्चिद्या वरिवोवित्तरासत् । ॐ द्वादशादित्येभ्यो नम: ।

इन्द्राग्न्योर्मध्ये ऽश्विनौ—ॐ अश्विना तेजसा चक्षु: प्राणेन सरस्वती वीर्यम् । वाचेंद्रो बलेनेन्द्राय रधुरिन्द्रियम् । ॐ अश्विनीभ्यां नम: ।

अग्नियमयोर्मध्येविश्वेदेवान्—ॐ विश्वेदेवास ऽआगतश्रृणुता म ऽइम ँ् हवम् । एदं बर्हिन्निषीदत । उपायामगृहीतोऽसिविश्वेभ्यस्त्वा देवेभ्यऽएषतेयोनिर्विश्वेदेवेभ्यस्त्वा देवेभ्य: । सपैतृकविश्वभ्यो देवेभ्यो नम: ।

यमनिर्ऋतयोर्मध्येसप्तयक्षान्—ॐ अभित्यं देव ँ् सवितारमोण्यो: कविक्रतुमर्चामि सत्यसव ँ् रत्नधामभि प्रियं मतिं कविम् । उर्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीतसुक्रतु: कृपास्व: प्रजाभ्यस्त्वा प्रजास्त्वाऽनु प्राणन्तु प्रजास्त्वाम नु प्राणीहि । ॐ सप्तयक्षेभ्यो नम: ।

निर्ऋति वरुणयोर्मध्ये भूतनागान्—ॐ भूतायत्वानारातये स्वरभि विख्येषन्द्रृ ँ् हन्तान्दुर्य्या: पृथिव्या मुर्वैरन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौ सादयादित्याऽउपस्थेग्नेहव्य ँ् रक्ष । ॐ भूतेभ्यो नम: ।

तत्रैवसर्पान्:—ॐ नमोऽस्तु सर्पेभ्योये के च पृथिवी मनु । ये ऽअन्तरिक्षे ये दिवि तेभ्य: सर्पेभ्योनम: । ॐ सर्पेभ्यो नम: ।

वरुणवायव्योर्मध्येगंधर्वाप्सरस:—ॐ गंधर्वस्त्वाविश्वावसु: परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडित: । इन्द्रस्यबाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडित: । मित्रावरुणौ त्वोत्तरत: परिधत्तान्ध्रुवेण धर्म्मणाविश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड

ऽ ईडित: । ॐ गन्धर्वेभ्यो नमः । ॐ अयं पुरोहरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्चरथौ जाश्च सेनानिण्यौ पुञ्जिकस्थला चक्रतुस्थला चाप्सरसौ दंक्ष्णवः पशवो हेतिः पौरुषेयोवधः प्रहेतिस्तेभ्यो नमो ऽअस्तुते नो वन्तु ते नो मृडयन्तु ते यद्विष्मो यश्चनो द्वेष्टितमेषांञ्जम्भेदध्मः । ॐ अप्सरोभ्यो नमः ।

ब्रह्मसोमयोर्मध्येस्कंदम् — ॐ यदक्रन्दः प्रथमञ्जायमान ऽउद्यन्त्समुद्रादुतवा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू ऽउपस्तुत्यम्महिजातन्ते अर्वन् । ॐ स्कन्दाय नमः ।

तदुत्तरेनंदीश्वरम्—ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सक्रन्दनोनिमिष ऽएकवीरः शत ँ सेना ऽजयत्साकमिन्द्रः । नंदीश्वराय नमः ।

तत्रैवशूलः—ॐ कार्षिरसमुद्रस्यत्वा क्षित्या ऽउन्नयामि । समापो ऽअद्भिरग्मत समोषधीभिरोषधी: । ॐ शूलाय नमः ।

तदुत्तरेकालः महाकालो—ॐ कार्षिरसि समुद्रस्यत्वाक्षित्या ऽउन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधी: । ॐ महाकालाय नमः ।

ब्रह्मशायोर्मध्येदक्षादि सप्तप्रजापतीन्—ॐ प्रजापतेनत्व देतान्यन्यो विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्यपिता सावस्यपिता वयँ स्यामपतयो रयीणाम् । ॐ प्रजापतिभ्यो नमः ।

ब्रह्मेन्द्रयोर्मध्ये दुर्गाम्—ॐ अम्बे ऽअम्बिके ऽम्बालिके नमा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् । ॐ दुर्गायै नमः ।

दुर्गापूर्वे विष्णुम्—ॐ इदं विष्णुर्विचक्रमेत्रेधा निदधेपदम् । समूढमस्य पाँ सुरे स्वाहा । ॐ विष्णवे नमः ।

ब्रह्माग्नयोर्मध्ये स्वधा पितन्—ॐ उदीरतामवर उत्परासउन्मध्यमा पितरः सोम्यासः । असुंय ईयुरवृका ऋतज्ञास्तेनो ऽवंतु पितरो हवेषु । ॐ पितृभ्यो नमः ।

ब्रह्मयमोर्मध्ये मृत्युरोगान्—ॐ परं मृत्यो अनुपरेहि पंथायस्ते अन्य इतरो देवयानात् । चक्षुष्मते शृण्वतेते ब्रवीमिमानः प्रजा ँ रीरिषो मोतवीरान् । स्यापनमुपलभ्यत । ॐ गदाय नमः । ॐ त्रिशूलाय नमः । वज्राय ॐ

ब्रह्मनिर्ऋतयोर्मध्ये गणपतिम्—ॐ गणानां त्वा गणपति ँ हवा० ॐ गणपतये नमः ।

ब्रह्मवरुणयोर्मध्ये आपः—ॐ अपो ऽअद्यान्ववचारिष ँ रसेन समसृक्ष्महि । पयस्वानग्न ऽआगमन्तम्मास ँ सृजवर्च्चसा प्रजया च धनेन च । ॐ ॐ अद्भ्यो नमः ।

ब्रह्मवायु मध्ये मरुतः—ॐ बृहदिन्द्रायगायत मरुतो वृत्रहन्त्यम् । येनज्योतिर जनयन्नृतावृधोदेवन्दे वायजागृवि । ओमरुद्भ्यो नमः ।

ब्रह्मणपादतले कर्णिकाधः पृथ्वीम्—ॐ महीद्यौः पृथिवी चन ऽइमं यज्ञम्मिमिक्षताम् । पिपृतान्नोभरीमभिः । ॐ पृथिव्यै नमः ।

तत्रैव गंगादि सरितः—ॐ इमं मे गंगे यमुने सरस्वति शतुद्रिस्तोमं सचता परुष्णिया । असिक्नियामरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया । ॐ गंगादिसरिद्भ्यो नमः ।

तत्रैव सप्तसागरान्—ॐ मापोमोषधीर्हि ँ सि धाम्नो धाम्नो राजं स्ततो वरुण नो मुञ्च । ॐ सप्तसागरेभ्यो नमः ।

तदुपरिमेरवे नमः—ॐ मेरवे नमः । उत्तरे ॐ गदायै नमः । ऐशान्याम् ॐ त्रिशूलाय नमः । पूर्वे वज्राय नमः । आग्नेय्यां ॐ शक्तये नमः । दक्षिणस्यां ॐ दंडाय नमः । नैऋत्याम् ॐ खड्गाय नमः । पश्चिमे ॐ पाशाय नमः । वायव्यां अंकुशाय नमः । तद्वाह्ये उत्तरे गौतमाय नमः । ऐशान्यां भारद्वाजाय नमः । पूर्वे विश्वामित्राय नमः आग्नेय्यां ॐ कश्यपाय नमः । दक्षिणे जमदग्नये नमः । नैऋत्यां वशिष्ठाय नमः । पश्चिमे अत्रये नमः । वायव्यां वैष्णव्यै नमः । उत्तरस्यां माहेश्वर्यै नमः । ऐशान्यां दैनायक्यै नमः । ततः मनो जूतिर्जुषता० इत्यने प्रतिष्ठाप्य ।

पुष्पांजलि:—ॐ ब्रह्मणे नमः, ॐ सोमाय नमः, ॐ ईशानाय नमः, इन्द्राय० अग्नये० यमाय०, निर्ऋतये, वरुणाय०, वायवे, अष्टवसुभ्यः एकादश रुद्रेभ्यः० द्वादशादित्येभ्यः० अश्विभ्यां० सपैतृकविश्वेभ्यो देवेभ्यो०, सप्तयक्षेभ्यः०, भूतनागेभ्यः, गन्धर्वाप्सरोभ्यः०, स्कन्दाय०, नन्दीश्वराय०, शूलाय०, महाकालाय० ... पंचस्त्री दक्ष ... वायव्यांतरेण्यौ ग्राम्यादेवेभ्यः । दीक्षागुजौ...

शक्तये०, ॐ दंडाय०, ॐ खड्गाय०, ॐ पाशाय० ॐ अंकुशाय०, ॐ गौतमाय०, ॐ भारद्वाजाय० ॐ विश्वामित्राय० ॐ कश्यपाय०, ॐ जमदग्ने, ॐ वसिष्ठाय०, ॐ अत्रये०, ॐ अरुन्धत्यै० ॐ ऐन्द्र्यै नमः ॐ कौमार्य्यै०, ॐ ब्राह्म्यै०, ॐ वाराह्यै०, ॐ चामुण्डायै० ॐ वैष्णव्यै०, ॐ माहेश्वर्य्यै० ॐ वैनायक्यै नमः। एवं सर्वेभ्यो भद्रदेवताभ्यो नाममन्त्रैः पुष्पाञ्जलिसमर्प्यैदेक बलि चोपाहृत्य कलशस्थापन विधिना सौवर्णं राजतं ताम्रमयं वा कलशं स्थापयित्वा वरुणं संप्रार्थ्य तदुपरि प्राणप्रतिष्ठापुरस्सरं प्रतिमां संस्थापयेत् (तत्र सुवर्णमयीं महाविष्णुप्रतिमां महालक्ष्मी प्रतिमां च निम्न प्रकारेण संपूज्य संस्थापयेत्) तत्रादौ विष्णु प्रतिमायां पुरुषसूक्तेनांगन्यासान् विधाय पुरुषसूक्तेनैव नारायणपूजा विधेया।

अथ नारायणपूजा

अथध्यानम्—ध्येयः सदासवितृमण्डल मध्यवर्ती
नारायणः सरसिजासन सन्निविष्टः।
केयूरवान् मकर कुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृत शंख चक्रः॥

आवाहनम्—ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्र पात्।
सभूमि ँ सर्वतस्पृत्वा त्यतिष्ठद्दशाङ्गुलम्। वामकरे

कुसुमासनम्—ॐ पुरुष ऽएवेद ँ सर्वं यद्भूत यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्ये नाति रोहति। दक्षिणकरे

पाद्यम्—ॐ एतावानस्यमहिमातो ज्यायांश्चपूरुषः।
पादो ऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि। वामपादे।

अर्घ्यम्—ॐ त्रिपादूर्ध्वं ऽउदैत्पुरुषः पादो ऽस्येहा भवत्पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि। दक्षिणपादे।

आचमनम्—ॐ ततो विराडजायत विराजो ऽअधि पुरुषः।
सजातो ऽअत्य रिच्यत पश्चाद्भूमिमथो पुरः। वामजानौ।

पञ्चामृत स्नानम्—(ॐपञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पञ्चधासो देशे भवत्सरित्।)

वस्त्रम्—ॐ,तस्माद्यज्ञात्सर्व हुत ऽऋचः सामानि जज्ञिरे।
छन्दा ँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। वामकट्याम्

ब्रह्मसूत्रम्—ॐ तस्मादश्वा ऽअजायन्त ये के चोभयादतः।
गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः। दक्षिण कट्याम्।

गन्धः—ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा ऽअयजन्त साध्या ऽऋषयश्च ये। नाभौ

तुलसीपुष्पाणि—ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन्।
मुख किमस्यासीत्किम्बाहूकिमूरूपादा ऽउच्येते। हृदि

धूपः—ॐ ब्राह्मणो ऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरूतदस्य यद् वैश्यः पद्भ्या ँ शूद्रो ऽअजायत। कण्ठे

दीपः—ॐ चन्द्रमामनसो जातश्चक्षोः सूर्यो ऽअजायत।
श्रोत्राद्वायुश्च प्राणश्चमुखादग्निरजायत। वाम बाहुमूले

नैवेद्यम्—ॐ नाभ्या ऽआसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्। दक्षिण बाहुमूले

ताम्बूलम्—ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तो ऽस्यासीदाज्यं ग्रीष्म ऽ इध्मः शरद्धविः। मुखे

(प्र) दक्षिणा—ॐ सप्तास्या सन्परिधयस्त्रिः सप्तसमिधः कृताः।
देवायद्यज्ञन्तन्वाना ऽ अबध्नन्पुरुषं पशुम्। ललाटे

पुष्पाञ्जलिः—ॐ यज्ञन यज्ञमयजन्तदेवाः साध्याः सन्ति देवाः।
तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवा। मूर्ध्नि

विष्णो द्वादशनामस्तवः—
केशवं मार्गशीर्षेसु पौषे नारायणं स्मरेत्।
माधवं माघमासेतु गोविन्दं फाल्गुने जपेत्॥
चैत्रमासे सदाविष्णुं वैशाखे मधुसूदनम्।
ज्येष्ठे त्रिविक्रम विन्द्यादाषाढे वामनं पठेत्॥

श्रावणे श्रीधरं विन्द्याद्धृषीकेशं च भाद्रके ॥
आश्विने पद्मनाभं च ऊर्ज्जे दामोदरं जपेत् ॥
द्वादशैतानि नामानि ऋष्यशृंगो ऽब्रवीन्मुनिः ।
पूजयेन्मासनामानि सर्वान्कामान्समश्नुते ॥
आयुष्मन्तं सुतं सूते यशो मेधा समन्वितम् ॥
धनवन्तं प्रजावन्त धार्मिकं सात्विकं शुचिम् ॥
अनेन पूजनेन महाविष्णुः प्रीयतां न मम ॥

॥ अथ महालक्ष्मीपूजनम् ॥

अथध्यानम्—या सा पद्मासनस्था विपुलकटि तटी पद्म पत्रायताक्षी
गम्भीरावर्तनाभिः स्तन भर नमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेम कुम्भैः
नित्यं सा पद्महस्ता वसतु ममगृहे सर्वमांगल्य युक्ता ॥

आवाहनम्— ॐ हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोम ऽआवह । मूर्ध्नि

पुष्पासनम्—ॐ तां म ऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् । नेत्रयोः

पाद्यम्—ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रभोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम् । कर्णयोः

अर्घ्यम्—ॐ कांसो ऽस्मितां हिरण्य प्राकारामार्द्रांज्वलन्तीं तृप्तां तर्पयन्तीम्
पद्मे स्थितां पद्मवर्णां तामि होप ह्वयेश्रियम् । नासिकयोः

आचमनम्—ॐ चन्द्रां प्रभासां यशसाज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमिं शरणमहं प्रपद्ये ऽअलक्ष्मीर्मे नश्यतां त्वां वृणोमि । मुखे

स्नानम्—ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पति स्तव वृक्षो ऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्याऽअलक्ष्मीः । कण्ठे

वस्त्रम्—ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतो सुराष्ट्रे ऽस्मिन् कीर्ति वृद्धि ददातु मे । बाह्वोः

[illegible]—ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।

गन्धः—ॐ गन्ध द्वारां दुराधर्षां नित्य पुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । नाभौ

पुष्पाणि—ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां मयि । गुह्ये

धूपः—ॐ कर्दमेन प्रजाभूता मयि सम्भ्रम कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् । पायौ

दीपः—ॐ आपः स्रजन्तुस्निग्धानिचिक्लीत वसमे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले । ऊर्वोः

नैवेद्यम्—ॐ आर्द्रां पुष्करिणीं पुष्टां पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म ऽआवह । जान्वोः

ताम्बूलम्—ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म ऽआवह । जंघयोः

दक्षिणा—ॐ तां म ऽआवह जातवेदो लक्ष्मीं मनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्यो ऽश्वान् विन्देयं पुरुषानहम् । चरणयोः

पुष्पांजलि:—ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पंचदशर्चं च श्री कामः सततं जपेत् । सर्वाङ्गे

प्रार्थना—भवानि त्वं महालक्ष्मीः सर्वकाम प्रदायिनी ।
सुपूजिता प्रसन्ना स्यान्महा लक्ष्म्यै नमो ऽस्तु ते ।

अथ द्वादशलिङ्गतो भद्रमण्डल पूजनम्

प्रार्थना—ध्यायेन्नित्यं महेशं रजतगिरि निभं चारुचन्द्रावतंसं
रत्ना कल्पोज्वलाङ्गं परशु मृगवरा भीति हस्तं प्रसन्नम् ॥
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्
विश्वाद्यं विश्वबन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

संकल्पः— देश कालौ संकीर्त्य अद्य पुण्य तिथौ मम इह जन्मनि जन्मांतरे च सुख सौभाग्य सम्पतादि फल प्राप्त्यर्थं श्री उमामहेश्वरदेवता प्रीतये रुद्रयज्ञे (मया आचरितस्य अमुक व्रतस्य फल प्राप्ति द्वारा उद्यापनांगभूतं वा) लिंगतो भद्र देवतानां आवाहन प्रतिष्ठा पूजनं च करिष्ये । इति संकल्प्य

सर्वत्र १ आग्नेय्यां गणपतये नमः २ नैर्ऋते दुर्गायै० ३ वायव्यां क्षेत्रपालाय नमः ४ ततः भद्रमध्ये सदाशिवाय ५ ततः अष्टदले पूर्वस्यां दिशि-कालाग्निरुद्राय० १ कूर्माय० २ मंडूकाय० ३ आग्नेय्यां वराहाय ४ अनंताय० ५ दक्षिणे पृथिव्यै० ६ स्कंदाय० ७ अंकुराय० ८ नैर्ऋत्यां दिशि नलाय० ७ पद्माय० पश्चिमे पत्रेभ्य० ११ केसरेभ्य० १२ कर्णिकायै० १३ वायव्यां सिंहासनाय १४ पद्मासनाय० १५ उत्तरे धर्माय० १६ ज्ञानाय० १७ वैराग्याय १८ ऐशान्यां ऐश्वर्याय० १९ चिदाकाशाय० २० पद्ममध्ये योगपीठात्मने० २१ ततः कर्णिकोपरिपूर्वेपृथिव्यै० १ दक्षिणे कपिलाय २ पश्चिमे सप्तसरिद्भ्यः ३ उत्तरे सप्तसागरेभ्यः ४ अथ कर्णिका समीपे चत्वारि श्वेतभद्राणितद्देवता स्थापनं पूर्वे १ तत्पुरुषाय० २ दक्षिणे अघोराय ३ पश्चिमे सद्योजाताय० ४ उत्तरे वामदेवाय अथ तत्समीपे कृष्णानि अष्टौ भद्राणि तद्देवता स्थापनमैशान्यक्रमेण ऐशान्यां भगवत्यै० १ पूर्वे उमायै० २ आग्नेय्यां शंकरप्रियायै० ३ दक्षिणे पार्वत्यै० ४ नैर्ऋत्यां गौर्यै० ५ पश्चिमे काल्यै० ६ वायव्यां कौम्यै० ७ उत्तरे विश्वंभर्यै० ८ ततः कृष्णभद्राणामधः अष्टौ रक्तभद्राणि तद्देवतास्थापनम् ईशान्यादि क्रमेण १ ईशान्ये नंदिन्यै० पूर्वेमहाकालाय० ३ आग्नेय्यां वृषभाय० ४ दक्षिणे भृंगकिरीटिने० ५ नैर्ऋत्यां स्कंदाय० ६ पश्चिमे उमापतये० ७ वायव्यां चण्डेश्वराय० ८ उत्तरे सोमसूत्राय० अथ लिंगोपरि श्वेतभद्राणि तद्देवता स्थापनम् ।। १ पूर्वे धात्रे नमः २ दक्षिणे मित्राय० ३ पश्चिमे यमाय० ४ उत्तरे रुद्राय। ततः समीपे लिंगोपरि अष्टौ पीतभद्राणि तद्देवता स्थापनम्। ईशान्य क्रमेण १ ईशान्ये वरुणाय० २ पूर्वे सूर्याय० ३ आग्नेय्यां भगाय० ४ दक्षिणे विवस्वते ५ नैर्ऋते पुरुषोत्तमाय० ६ पश्चिमे सवित्रे० ७ वायव्ये त्वष्ट्रे ८ उत्तरे विष्णवे० ततः द्वादशलिंगदेवता स्थापन पूर्वादि क्रमेण। १ पूर्वे शिवाय० २ एक नेत्राय ३ एक रुद्राय १ दक्षिण मूर्तये० २ श्रीकंठाय० ३ वामदेवाय० १ पश्चिमे ज्येष्ठाय० २ श्रेष्ठाय ३ रुद्राय १ उत्तरे कालाय २ कलविकरणाय ३ बलविकरणाय० ।। अथ श्वेत षोडशवापीदेवतास्थापनम्। ईशान्यादि क्रमेण १ अणिमायै० २ महिमायै० ३ लघिमायै० ४ गरिमायै० ५ प्राप्त्यै० ६ प्राकाम्यायै० ७ ईशितायै० ८ वशितायै० ९ ब्राह्म्यै० १० माहेश्वर्यै० ११ कौमार्यै० १२ वैष्णव्यै० १३ वाराह्यै० १४ इंद्राण्यै० १५ चामुंडायै० १६ चण्डिकायै० ततः वापी समीपे अष्टौ रक्त भद्राणि तद्देवता स्थापनम् ।। ईशान्यादिक्रमेण ।। १ असितांग भैरवाय० २ रुरुभैरवाय ३ चंडभैरवाय० ४ क्रोधभैरवाय० ५ उन्मत्तभैरवाय० ६ कालभैरवाय० ७ भीषणभैरवाय० ८ संहारभैरवाय० अथ अष्टौ वल्ली देवता स्थापनमीशान्यादि क्रमेण ।। १ घृताच्यै २ मेनकायै० ३ रंभायै ४ उर्वश्यै० ५ तिलोत्तमायै० ६ सुकेशायै० ७ मंजुघोषायै० ८ अप्सरायै ततः मण्डलमध्ये परिधि समीपे शृंखला देवतास्थापनमाग्नेय्यादि क्रमेण ।। १ आग्नेय्यां भवाय० २ शिवाय० ३ रुद्राय० ४ पशुपतये० ५ उग्राय० ६ महादेवाय० ७ भीमाय० ८ ईशानाय० ९ वासुकये १० ततः नैर्ऋत्यां परिधि समीपे शृंखला देवताः ।। १ तक्षकाय० २ कुलीराय० ३ कर्कोटकाय० ४ शंखपालाय० ५ कम्बलाय० ६ अश्वतराय० ७ वैन्याय ८ अंगाय० ९ हैहयाय० १० अर्जुनाय० ।। ततः वायव्ये दशशृंखला देवताः ।। १ शाकुन्तलाय० २ भरताय० ३ नलाय० ४ रामाय० ५ सार्वभौमाय० ६ निषधाय० ७ विन्ध्याचलाय० ८ माल्यवते० ९ पारियात्राय० १० सह्याय ।। ततः ईशान परिधि समीपे दश शृंखला देवता स्थापनम् ।। १ हेमकूटाय० २ गंधमादनाय० ३ कुलाचलाय० ४ हिमवते ५ रैवताचलाय० ६ देवगिरये० ७ मलयाचलाय० ८ कनकाचलाय० ९ पृथिव्यै० १० अनंताय० इति शृंखला देवताः ।। अथ चतुर्दिक्षुखंडेंदु देवता स्थापनमीशानादि क्रमेण ।। १ ईशाने अश्विनी कुमाराभ्यां० आग्नेय्यां विश्वेदेवेभ्यो० ३ नैर्ऋते पितृभ्यो० ४ वायव्यां नागेभ्यः० ततः मंडलाद्बहिः प्रथमं सत्वपरिधौ पूर्वादि क्रमेण देवताः ।। १ पूर्वे इंद्राय० २ अग्नये० ३ यमाय० ४ निर्ऋतये० ५ वरुणाय० ६ वायवे० ७ कुबेराय ८ ईश्वराय० ९ ब्रह्मणे० १० अनंताय० तद्बहिः रजः परिधौ पूर्वादि क्रमेण देवताः ।। १ पूर्वे वज्राय० २ शक्तये० ३ दंडाय० ४ खड्गाय० ५ पाशाय० ६ अंकुशाय० ७ गदायै० ८ त्रिशूलाय० तद्बहिस्तमोमय

कृष्ण परिधौ पूर्वादि क्रमेण देवता: ।। १ पूर्वे कश्यपाय० २ अत्रये० ३ भरद्वाजाय० ४ विश्वामित्राय० ५ गौतमाय० ६ जमदग्नये० ७ वसिष्ठाय० ८ अरुंधत्यै० ।। ततः १ पूर्वे ऋग्वेदाय० २ दक्षिणे यजुर्वेदाय० ३ पश्चिमे सामवेदाय० ४ उत्तरे अथर्ववेदाय० एवं देवता: संस्थाप्य षोडशोपचारै: संपूज्य सांबसदाशिवप्रतिमां पूर्वोक्त क्रमेण

प्राण प्रतिष्ठा पुरस्सरं—तांतु प्रधानदेवतां मंडलमध्ये कलशे परि संस्थाप्य पूजयेत् । इति शम् । ततो गणेशाम्बिकयो: पूजांकृत्वा

अथ शिवार्चनम्

नंदीश्वर पूजा—ॐ आयँङ्गौ: पृश्निरक्रमीदसदन्मातरम्पुर: । पितरञ्च प्रयन्त्स्व: ।

प्रार्थना—ॐ प्रतुव्वाजी कनिक्रदन्नानदद्रासभ: पत्वा । भरन्नग्निम्पुरीष्यमा-पाद्यायुष: पुरा ।

वीरभद्र पूजा—ॐ भद्रं कर्णेभि: श्रृणुयामदेवा भद्रम्पश्ये मा क्षभिर्यजत्रा: । स्थिरै रङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहि देवहितं यदायु: ।

प्रार्थना—ॐ भद्रो नो ऽअग्निराहुतोभद्रारातिः । सुभग भद्रो ऽअध्वर: । भद्रा-ऽ उत प्रशस्तय: ।

कार्तिकपूजनम्—ॐ यद्क्रन्द: प्रथमञ्जायमान ऽउद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बा हू ऽ उपस्तुत्यम्महि जातन्ते ऽअर्वन् ।

प्रार्थना—ॐ यत्र बाणा: सम्पतन्ति कुमारा विशिखाऽइव । तन्न ऽ इन्द्रो बृहस्पतिरदितिः शर्मयच्छतु विश्वाहा शर्म यच्छतु ।

कुबेरपूजा—ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनु पूर्वं वियूय । इहे हैषाङ्कणुहि भोजनानि ये बर्हिषो नम ऽ उक्तिं यजन्ति ।

प्रार्थना—वय ँ सोमव्रते तव मनस्तनूषुविभ्रत: । प्रजावन्त: सचेमहि ।

ेतिमुख पूजा—असवे स्वाहा वसवे स्वाहा विभवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा स ँ सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय-स्वाहा दिवापतये स्वाहा ।

प्रार्थना—ओजश्चमे सहश्चम ऽ आत्मा च मे तनूश्चमे शर्म च मे वर्म च मेङ्गानि च मे स्थीनि च मे परू ँ षि च मे शरीराणि च मऽआयुश्च मे जरा च मेयज्ञेन कल्पन्ताम् ।

आत्म नो ऽङ्गन्यास:—

या ते रुद्र शिवा तनूर घोरा पापकाशिनी ।
तया नस्तन्वाशन्तमया गिरिशन्ताभिचाकशीहि ।। शिखायाम् ।।
असिमन्महत्यर्णवेन्तरिक्षे भवा ऽ अधि ।
तेषा ँ सहस्रयोजनेव धन्वानि तन्मसि ।। शिरसि ।।
असङ्ख्याता सहस्राणि ये रुद्रा ऽअधिभूम्याम् ।
तेषा ँ सहस्र योजनेव धन्वानि तन्मसि ।। ललाटे ।।
वय ँ सोम व्रते तव मनस्तनूषुविभ्रत: ।
प्रजावन्त: सचेमहि ।। भ्रुवोर्मध्ये ।।
त्र्यम्बक यजामहे सुगन्धिम्पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।। नेत्रयो:
अग्निर्ज्योतिर्ज्योतिरग्नि: स्वाहा सूर्यो ज्योतिर्ज्योति: सूर्य: स्वाहा ।
अग्निर्वर्चो ज्योतिर्वर्च: स्वाहा सूर्यो वर्चो ज्योतिर्वर्च: स्वाहा ।।
ज्योति: सूर्य: सूर्यो ज्योति: स्वाहा ।। तृतीयनेत्रे ।।
नम: स्रुत्याय च पथ्याय च नम: काट्याय च नीप्याय च
नम: कुल्याय च सरस्याय च नमोनादेयाय च वैशन्ताय च ।। कर्णयो: ।।
मानस्तोके तनये मान ऽआयुषि मानो गोषु मानो अश्वेषुरीरिष: ।
मानो वीरान्रुद्रभामिनोवधीर्हविष्मन्त: सदमित्वाहवामहे ।।
नासिकयो: ।।
अवतत्य धनुष्ट्व ँ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानांमुखा शिवो न: सुमनाभव ।। मुखे ।।
नमोवञ्चते परिवञ्चते स्तायूनाम्पतये नमो
नमो निषङ्गिण ऽ इषुधिमते तस्कराणाम्पतये नमो
नम: सृकायिभ्योजिघा ँ सद्भ्योमुष्णताम्पतये नमो
नमो सिमद्भ्योनक्तञ्चरद्भ्यो विकृन्तानाम्पतये नम: । ग्रीवायाम् ।।
नीलग्रीवा: शितिकण्ठादिव ँ रुद्रा ऽउपश्रिता: ।

तेषा ँ सहस्र योजनेव धन्वानि तन्मसि ॥ कण्ठदेशे ॥
नमस्त ऽआयुधायाना तताय धृष्णवे ।
उभाभ्यामुतते नमो बाहुभ्यान्तव धन्वने ॥ बाह्वोः ॥
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषा ँ सहस्रयोजनेव धन्वानि तन्मसि ॥ हस्तयोः ॥
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वं जायचापरजाय ।
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च ॥ अंगुलिषु ॥
नमः पर्णाय च पर्णं शदाय च नम ऽ उद्गुरमाणाय चा
भिघ्नते च नम ऽआखिदते प्रखिदते च नम ऽ इषु कृद्भ्यो
धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवाना ँ हृदयेभ्यो ।
नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम ऽआनिर्हतेभ्यः ॥ हृदये ॥
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रात पतिभ्यश्च वो
नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो
विश्वरूपेभ्यश्च वो नमः ॥ पृष्ठे ॥

विकिरिद्र विलोहित नमस्ते ऽअस्तु भगवः ।
यास्ते सहस्र ँ हेतयो ऽन्यमस्म न्निवपन्तुताः ॥ । उदरे ॥
नमः शंभवाय च मयो भवाय च नमः शंकराय च ।
मयस्कराय च नमः शिवाय च शिवतराय च ॥ दक्षिणकुक्षौ ॥
द्रापे ऽ अन्धसस्पते दरिद्र नीललोहितः ।
आसाम्प्रजानाम्मेषां पशूनामार्मेर्मा रोङ्मोचनः ॥ वामकुक्षौ ॥
हिरण्य गर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽआसीत् ।
सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ नाभौ ॥
मीढुष्टम शिवतम शिवोनः सुमना भव ।
परमे वृक्ष ऽआयुधन्निधाय कृत्ति
वसान ऽआचर पिनाकम्बिभ्रदागहि ॥ कट्याम् ॥
शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तुमामाहि ँ सीः ।
निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषायसु प्रजास्त्वाय सुवीर्याय ॥
लिंगे ॥

इमा रुद्राय तवसेकपर्दिने क्षयद्वीराय प्रभरामहेमतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे ऽअस्मिन्ननातुरम् ॥ गुह्ये ॥
इषे त्वोर्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु
श्रेष्ठतमाय कर्म्मण ऽआप्यायध्वमघ्न्या ऽइन्द्राय
भागम्प्रजावतीरन मीवाऽअयक्ष्मामावस्तेन ऽईशत
माघश ँ सोध्रुवा ऽअस्मिन् गोपतौस्यात् बह्वीर्यजमानस्य पशून्पाहि ॥
वृषणयोः ॥
मानो महान्तमुतमानो ऽअर्भकम्मान ऽउक्षन्त मुतमान ऽउक्षितम् ।
मानो वधीः पितरम्मोत मातरम्मानः प्रियास्तन्वो रुद्ररीरिषः ॥ ऊर्वोः ॥
एषते रुद्रभागः सहस्वस्राम्बिकया तञ्जुषस्व ।
स्वाहैषते रुद्रभाग ऽआखुस्ते पशुः ॥ जान्वोः ॥
नमो ज्येष्ठाय च कनिष्ठाय नमः पूर्वजाय च
नमो मद्ध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥ जंघयोः ।
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च ।
नमो वृद्धाय च सवृधे च नमो ग्र्याय च प्रथमाय च ॥ गुल्फयोः ॥
ये पथाम्पथि रक्षय ऽऐल बृदा ऽआयुर्युधः ।
तेषा ँ सहस्र योजने ऽव धन्वानि तन्मसि ॥ पादयोः ॥
अद्ध्यवो च दधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वांश्चयातु धान्योधराचीः परासुव ॥ कवचे ॥
नमो विल्मिने च कवचिने च नमो वर्मिणे च बरूथिने च नमः ।
श्रुताय च श्रुतसेनाय च नमोदुन्दुभ्यायचाहनन्याय च ॥ अस्त्रे ॥
विज्यंधनुः कपर्दिनो विशल्यो वाणवां २ उत ।
अनेशन्नस्ययाा इषव ऽआभुरस्य निषङ्गधिः ॥ धनुषि ॥
यत्र बाणाः सम्पतन्ति कुमारा विशिषा ऽइव ।
तन्न इन्द्रो बृहस्पतिरदितिः शर्मयच्छतु ॥ वाणे ॥
विकिरिद्द्रविलोहित नमस्ते ऽअस्तु भगवः ।
यास्ते सहस्र ँ हेतयो ऽन्यस्मिन्निव पन्तुताः ॥ खड्गे ॥
य एता वन्तश्च भूया ँ सश्चदिशो रुद्रावितस्थिरे ।

तेषा ँ सहस्रयोजनेव धन्वानि तन्मसि ॥ दिग्बन्धनम् ॥

एवं न्यासविधिं विधाय शिवो ऽहम् इति भावयेत् ।

एवमेव शिवलिंगे ऽपि न्यासविधिं कुर्वीत् ।

ततः षोडशोपचारैः शिवार्चनं कुर्यात् ।

आवाहनम्—मानो महान्तमुतमानो ऽअर्भकम्मान ऽउक्षन्तमुतमानऽ उक्षितम् ।
मानो वधीः पितरम्मोतमातरम्मानः प्रिया स्तन्वो रुद्ररीरिषः ॥

पुष्पासनम्—या ते रुद्रशिवातनूरघोरा पापकाशिनी ।
तयानस्तन्वाशन्त मयागिरिशन्ताभिचाक शीहि ॥

पाद्यम्—यामिषुङ्गिरिशन्तहस्ते बिभर्ष्यस्तवे ।
शिवाङ्गिरित्रताङ्कुरुमाहि ँ सीः पुरुषञ्जगत् ॥

अर्घ्यम्—शिवेन वचसात्वगिरिशाच्छावदामसि ।
यथानः सर्वमिज्जगदयक्ष्म ँ सुमना ऽअसत् ॥

आचमनम्—अद्ध्यवो च दधिवक्ता प्रथमो दैव्योभिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातु धान्यो धराची: परासुव ॥

स्नानम्—असौ यस्ताम्रो ऽअरुण ऽउतबभ्रुः सुमङ्गलः ।
ये चैन ँ रुद्रा ऽअभितो दिक्षुश्रिताः सहस्रशो वैषा ँ हेईमहे ॥

पयः स्नानम्—आप्या यस्व समेतुते विश्वतः सोम वृष्ण्यम् ।
भवावाजस्य सङ्गथे ॥

शुद्धस्नानम्—देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यांम्पूष्णो हस्ताभ्याम् ॥

दधिस्नानम्—दधिक्राव्णो अकारिषं०

शुद्ध स्नानम्—देवस्यत्वा सवितुः०

घृतस्नानम्—घृतवतीभुवना नामभिश्रियोर्वी पृथ्वीमधुदुघे सुपेशसा । द्यावा पृथिवी वरुणस्य धर्मणा विष्कभिते ऽअजरेभूरिरेतसा ॥

शुद्धस्नानम्—देवस्यत्वा० असौ यस्ताम्रो ऽअरुण ऽउतबभ्रुः सुमङ्गलः ।
ये चैन ँ रुद्रा ऽ अभितोदिक्षुश्रिताः सहस्रशोऽवैषा ँ हेड ईमहे ।

शर्करा स्नानम्—स्वादुः पवस्वदिव्यायजन्मन स्वादुरिन्द्रायसुहवी तुनाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमां २ ऽअदाभ्यः ।

शुद्धस्नानम्—असौयो:० देवस्यत्वा०

पुनराचमनीयम्—अद्ध्यवो च दधिवक्ता प्रथमो दव्योभिषक् ।
अहीश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातु धान्यों धराची: परासुव ॥

वस्त्रम्—ॐ सुजातो ज्योतिषा सहशर्म वरूथमासदत्स्वः ।
वासो ऽअग्ने विश्वरूप ँ संव्ययस्व विभावसो ।

कटिवस्त्रम्—नमोस्तु नीलग्रीवाय सहस्राक्षायमीढुषे ।
अथो ये ऽअस्य सत्वानो ऽहन्तेभ्यो करन्नमः ॥

यज्ञोपवीतम्—प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
याश्चते हस्त ऽइषवः पराताभगवो वप् ॥

गन्धम्—युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
विहोत्रादधे वयुना विदेक इन मही देवस्यसवितुः परिष्टुति स्वाहा ॥

अक्षत—अक्षन्नमीदन्तह्यप्रिया ऽअधूषत । अस्तोषतस्वभानवो विप्रान विष्ठयामती योजान्विन्द्रते हरी ॥

पुष्प—विज्यन्धनुः कपर्दिनो विशल्यो बाणवां २ । ऽउत ।
अनेशन्नस्याऽ इषव ऽ आभुरस्य निषङ्गधि ॥

बिल्वपत्रम्—नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः ।
श्रुताय च श्रुत सेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥ याते हेति मीढुष्टमहस्ते बभूवते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥

दीप—परिते धन्वनो हेति रस्मावृणक्तुविश्वतः ।
अथो य ऽ इषुधिस्तवारे ऽ ऽअस्मिनिधेहि तम् ॥

नैवेद्यम्—अवतत्यधनुष्ट्व ँ सहस्राक्षशते षुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना असत् ॥

आचमनम्—अद्ध्यवो च दधिवक्ता प्रथमो देव्योभिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुध न्यो धराची: परासुव ॥

मुखवासः—नमस्त ऽआयुधायानातताय धृष्णवे ।
उभाभ्यामुतते नमो बाहुभ्यान्तव धन्वने ॥

ताम्बूलम्—नमः पर्णाय च पर्णशदाय च नमऽउ द्यगुरमाणाय चाभिघ्नते च नमः ऽआखिदते प्रखिदते च नमः ऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवाना ँ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो

विक्षिप्तकेभ्यो नम ऽआनिर्हतेभ्यः ॥

दक्षिणा—हिरण्यगर्भः समवर्त्तताग्रेभूतस्य जातः पतिरेक ऽआसीत् ।
सदाधारपृथिवीन्द्यामुते मांङ्कस्मै देवाय हविषा विवेम् ॥

ध्यानम्— शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् ।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥
नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनम् ।
व्याघ्र चर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥
कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ।
ज्वलन्तं पिंगलजटा शिखामुद्योत कारिणम् ॥
अमृतेनाप्लुतं हृष्टमुमादेहार्द्धधारिणम् ।
दिव्य सिंहासनासीनं दिव्यभोगसमन्वितम् ॥
दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुव-क्षरमव्ययम् ॥
सर्वव्यापिनमीशानमेवं वै विश्वरूपिणम् ।
गौरी चतुर्भुजां चण्डीं त्रिनेत्रां मुकुटोज्वलाम् ॥
पद्मदर्पणहस्तां च वरदाभय हस्तकाम् ।
दिव्यवस्त्रपरीधानां दिव्यालङ्कारभूषिताम् ॥
प्रसन्नवदनां ध्यायेच्छिवोत्सङ्गे तु वा-त: ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥

पुष्पोदकेनतर्पणम्—ॐ भवं देवं तर्पयामि । ॐ शर्वं देवं तर्पयामि । ॐ ईशानं देवं तर्पयामि । ॐ पशुपतिदेवं तर्पयामि । ॐ रुद्रं देवं तर्पयामि । ॐ उग्र देवं तर्पयामि । ॐ भीमं देवं तर्पयामि । ॐ महान्तं देवं तर्पयामि । ॐ देव देवं तर्पयामि । ॐ ज्येष्ठाय नमः । पुनराचमनीयम् । ॐ श्रेष्ठाय नमः । मधुपर्कः । मधुपर्कं गृहाणेश सर्वदा मधुपर्कपः । मधुपर्क प्रदानेन प्रीतोभव महेश्वर । ॐ कालाय नमः गन्धः । ॐ कलविकरणाय नमः पुष्पाणि ॥ ॐ सर्वभूतदमनायनम नमः धूपः ॥ ॐ मनोन्मनाय नमः दीपम् । ॐ भवोद्भवाय नमः नैवेद्यम् ।

पुष्पाञ्जलयः—ॐ भवाय देवाय नमः । ॐ शर्वाय देवाय नमः । ॐ ईशानाय देवाय नमः । ॐ पशुपतये देवाय नमः । ॐ रुद्राय देवाय नमः । ॐ उग्राय देवाय नमः । ॐ भीमाय देवाय नमः । ॐ महते देवाय नमः ॥ ॐ अघोरेभ्यो ऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते ऽस्तु रुद्ररूपेभ्यः ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ॐ शर्वाय क्षितिमूर्तये नमः । ॐ उग्रायवायुमूर्तये नमः । ॐ भीमाया ऽऽकाशमूर्तये नमः । ॐ पशुपतये यजमानमूर्तये नमः ॥ ॐ महादेवाय सोम मूर्तये नमः । ॐ ईशानाय सूर्यमूर्तये नमः । एवं सम्पूज्य ततःसहस्रघटैः स्नपनम् ।

अथ अग्निस्थापनम्

त्रिभिःकुशैःपरि समूहनन्—ॐ यद्देवाः देवहेडनन्देवासश्चकृमावयम् । अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्व ँ हसः ॥ इतित्रिभिः कुशैः परिसमूह्य तान्कुशानैशान्यां सम्परित्यजेत् । पूर्वतः प्राक्समारभ्यक्रमेणैव तु दक्षिणे उदीच्यां च समूह्यान्ते ईशान्यां तान्परित्यजेत् ॥ हलायुधः ॥

गोमयोदकेनोपलेपनम्—ॐ मानस्तोके तनये मान ऽआयुषि मानो गोषुमानो ऽअश्वेषुरीरिषः ॥ मानो वीरान्रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे ॥ इतिगोमयोदकेनोपलिप्य ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकमेकं पावनीयं मांगल्ये सर्व कर्मणि ॥ शांडिल्यः ॥

स्रुवेण स्फ्येन वा प्रागग्रउत्तरोत्तर क्रमेण त्रिरुल्लेखनम्—ॐ त्वां वृत्रेष्विन्द्र-सत्पतिं तरस्त्वां काष्ठा सर्वतः सत्वान्नश्चित्र । वज्रहस्तधृष्णुया महस्त-वानो ऽअद्रिवः शामश्व ँ रयमिन्द्र संकिरसत्रावाजन्न जिगेयुपे ॥ इति त्रिरुल्लिरव्य
स्वर्मर्त्यश्चपाताला त्रिरुल्लिख्यो ल्लेखनात् ।
वैश्वानरः स्थितो यश्च होमे तत्र समागतः ॥ हारीतः ॥

उल्लेखनक्रमेण अनामिका अंगुष्ठाभ्यां पांशूद्धरणम्—ॐ वजुङ्गच्छ गोष्ठानं वर्षतु ते द्यौर्वधामदेव सवितः परमस्यां पृथिव्या ँ शतेन पाशैर्यो ऽस्मान्द्वेष्टि यञ्च वयं द्विष्मस्तमतो मामौक् ॥ इत्यनामिकाङ्गुष्ठाभ्यां

मुद्धृत्य ।

अंगुष्टः पुष्टिदः प्रोक्तोऽ नामिकाधनदायिनी ।

द्वाभ्यां समुद्धृतारेखा यजमानशुभावहः ॥ संवर्तः ॥

जलेनाभ्युक्षणम्—ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णो हस्ताभ्याम् ॥ तत्र तूष्णीं कांस्य पात्रस्थ वह्नि प्रत्यङ्मुखं समाधाय ।

कृतयुगे स्वर्ण पात्रं त्रेतायां रौप्यमेव च ।

द्वापरे रीति पात्रञ्च कलौ कांस्यं प्रशस्यते ॥

अग्न्याधानम्—ॐ अग्नि दूतं पुरोदधे हव्यवाहमुपब्रुवे देवां आसादयादिह ॥

अग्नि पूजा—ॐ समिधाग्निं दुवस्यत घृतैर्बोधयता तिथिम् । अस्मिन हव्या जुहोतन ॥

कुंडमेखला पूजा—ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ँ सुरे ॥ ॐ विष्णवे नमः । ॐ ब्रह्मयज्ञानं० ब्रह्मणे नमः । ॐ इमारुद्राय० रुद्राय नमः ।

समिदाधानम्—ॐ अयन्ते योनिर्ऋत्वियो यतो जातो अरोचथाः तज्जानन्नग्नऽआरोहाथानो वर्द्धया रयिम् ॥

योनिपूजा—ॐ अम्बे ऽअम्बिअ०

नाभिपूजा—नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः । जङ्घाभ्यां पद्भ्यां धर्म्मोस्मि विशिराजा प्रतिष्ठितः ॥

कण्ठ पूजा—नीलग्रीवाः शिति कण्ठा०

विश्वकर्म पूजा—ॐ विश्वकर्मन् हविषा वर्द्धनेन त्रातारमिन्द्रमकृणो रवध्यम् ।

तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥

मेखला पूजा ॐ इयंदुरुक्तं परिवाधमाणा वर्णं पवित्रं पुनतीम ऽआगात् ।

प्राणा पानाभ्यां बल मादधाना स्वसा देवि सुभगा मेखलेयम् ॥

अग्निपूजनम्—ॐ चत्वारिश्रृंगा स्त्रयो ऽअस्यपादा द्वेशीर्षे सप्तहस्तासो ऽअस्य ।

त्रिधा वद्धो वृषभो रोरवीति महोदेवो मर्त्यां २ आविवेश ॥

प्रार्थना—ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।

हिरण्यवर्णममलं विशुद्ध सर्वतोमुखम् ॥

सर्वतः पाणिपादंतत् सर्वतोऽक्षि शिरो मुखम् ।

वैश्वानरोमहानग्निः प्रणीतः सर्वकर्मसु ॥

अथ ग्रहाणामावाहनं पूजनं च

ऐशान्यां वस्त्राच्छादिते पीठे नवग्रहमण्डलं विलिख्य सूर्यादि नवग्रहान् अधि देवता प्रत्यधि देवता पञ्चलोककपालदशदिक्पाल वास्तोष्पति क्षेत्र पाल सहितानावाहयेत् । तद्यथा—

सूर्यः—ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

चन्द्रः—ॐ इमन्देवा ऽअसपत्न ँ सुवदध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै विश ऽएष वो ऽमी राजा सोमो ऽस्माकं ब्राह्मणाना ँ राजा ॥

भौमः—ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या ऽअयम् ।

अपा ँ सि जिन्वति ॥

बुध—ॐ उद्बुध्य स्वाग्ने प्रति जा गृहि त्वमिष्टा पूर्ते स ँ सृजेथा मयं च ।

अस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥

बृहस्पति—ॐ बृहस्पते ऽअति यदर्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु ।

यद्दीदयच्चवस ऽऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

शुक्रः ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमंप्रजापतिः ।

ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमन्धसऽ इन्द्र स्येन्द्रियमिदं पयो ऽमृतं मधु ॥

शनिः—ॐ शन्नो देवी रभिष्टय ऽआपो भवन्तु पीतये ।

शं यो रभि- स्रवन्तु नः ॥

राहुः ॐ कया नश्चित्र ऽआभुवदूती सदावृधः सखा । कयाशचिष्ठया वृता ॥

केतुः—ॐ केतुं कृण्वन्न केतवे पेशो मर्या ऽअपेशसे । समुषद्भिरजायथाः ॥

अथ ग्रहदक्षिण पार्श्वेऽधिदेवतास्थापनम्

त्र्यम्बकं—ॐ त्र्यम्बकं यजामहे सुगन्धि पुष्टि वर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।

उमा—ॐ श्रीश्चतेलक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ।
इष्णन्निषाण मुम्मऽइषाण सर्वलोकम्मऽइषाण ।

स्कन्द:—ॐ यदक्रन्द: प्रथमं जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महि जातं ते अर्वन् ॥

विष्णु:—ॐ विष्णोरराटमसि विष्णो: श्नप्त्रेस्थो विष्णो: स्यूरसि
विष्णोर्ध्रुवोसि । वैष्वणमसि विष्णवे त्वा ॥

ब्रह्मा—ॐ आब्रह्मन् ब्रह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्य: शूर ऽ इषव्योति व्याधी महारथो जायतां दोग्ध्रीर्धेनुर्वोढा नड्वानाशु: सप्ति: पुरन्धिर्योषा जिष्णू रथेष्ठा सभेयो युवास्ययजमानस्य वीरो जायता निकामे निकामे न: पर्जन्यो वर्षतु फलवत्योनऽओषधय: पच्यन्तां योगक्षेमो न: कल्पताम् ।

इन्द्र:—ॐ स जोषा ऽ इन्द्र सगणो मरुद्भि: सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँ रपमृधोनुदस्वाथाभयं कृणुहि विश्वतो न: ।

यम:—ॐ असि यमोऽअस्याऽऽदित्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेनसमया विपृक्तऽआहुस्ते त्रीणिदिवि बन्धनानि ।

काल:—ॐ कार्षिरसि समुद्रस्य त्वाक्षित्याऽ उन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरषधी: ॥

चित्रगुप्त—ॐ चित्रावसो स्वस्ति ते पारमशीय ।

अथ प्रत्यधिदेवतास्थपनं ग्रहाणां वाम पार्श्वे

अग्नि:—ॐ अग्निदूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँ २ आसादयादिह ॥

जलम्—ॐ आप: प्रणीत भेषजं वरू थं तन्वे मम । ज्योक् च सूर्यदृशे ॥

पृथिवी—ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनी । यच्छान: शर्मसप्रथा: ।

विष्णु:—ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम् । समूढमस्यपाँ सुरे स्वाहा ॥

इन्द्र:—ॐ इन्द्रऽआसन्नेता बृहस्पति दक्षिणा यज्ञ: पुर ऽ एतु सोम: ।
देव सेनानामभिभञ्जन्तीनां जयन्तीनां मरुतो यन्त्वग्रम् ।

इन्द्राणी—ॐ अदित्यै रास्नासीन्द्राण्याऽउष्णीष: । पूषासि घर्मायदीष्व ।

प्रजापति:—ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो ऽ अस्तु वयँ स्याम पतयो रयीणाम् ।

सर्प:—ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवी मनु ।
ये ऽ अन्तरिक्षे ये दिवि तेभ्य: सर्पेभ्यो नम: ।

ब्रह्मा—ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमत: सुरुचोवेनऽआव: ।
सबुध्न्याऽउपमाऽअस्य विष्ठा: सतश्चयोनि मसतश्च विव: ।

अथ ग्रहणामुत्तरे लोकपालानां स्थपनम्

गणपति:—ॐ गणानान्त्वा गणपतिँ हवामहे प्रियाणान्त्वा प्रियपतिँ हवामहे वसोमम । आहम जानि गर्भधमा त्वम जासि गर्भधम् ।

अम्बिका—ॐ अम्बेऽअम्बिकेऽम्बालिके नमा नयति कश्चन ।
ससस्त्यश्वक: सुभद्रिकां काम्पील वासिनीम् ।

वायु:—ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ।

नभ:—ॐ घृतं घृतपावान: पिबत वसां वसापावान: पिबतान्तरिक्षस्य हविरसि स्वाहा । दिश: प्रदिश ऽआदिशो विदिशऽउद्दिशो दिग्भ्य: स्वाहा ।

अश्विनी—ॐ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञंमिमिक्षतम् ।

अथ मण्डल बाह्ये इन्द्रादि दशदिक्पालानामावाहनम्

इन्द्र:—त्रातारमिन्द्रमवितार मिन्द्रँ हवे हवे सुहवँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्र: ।

अग्नि:—ॐ त्वं नोऽअग्ने तव देव पायुभिर्मघोनो रक्षतन्वश्चवन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषँ रक्षमाणास्तव व्रते ।

यम:—ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्माय स्वाहा घर्म्म: पित्रे ।

नैर्ऋति:—ॐ असुन्वन्तम यजमान मिच्छस्तेनस्ये त्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।

वरुण:—ॐ तत्वायामि ब्रह्मणा वन्दमा नस्तदा शास्ते यजमानो हविर्भि: ।
अहेडमानो वरुणेह बोध्युरुशँ समान आयु प्रमोषी: ।

वायु—ॐ आनो नियुद्भि: शतनीभिरध्वरँ सहस्रिणीभिरुपयाहियज्ञम् ।
वायो ऽअस्मिनन्त्सवने मादयस्व यूयं पात स्वस्तिभि: सदा न: ।

सोम:—ॐ वयँ सोम व्रते तव मनस्तनूषु विभ्रत: । प्रजावन्त: सचेमहि ।

ईशान:— ॐ तमी शानं जगतस्तस्थुषस्पति धियं जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेद सामसद्वृधे रक्षिता पायुरदब्ध: स्वस्तये ।

ब्रह्मा—ॐ अस्मे रुद्रामेहना पर्वतासो वृत्रहत्ये भरहूतो सजोष: । य: श ॅ सते स्तुवतेधायि पज्र इन्द्र ज्येष्ठाऽअस्माँ ऽअवन्तु देवा: ।

अनन्त—या ऽ इषवो यातु धानानां ये वा वनस्पतीँऽ रनु । ये वा वटेषु शेरते तेभ्य: सर्पेभ्योनम: ।। ये वामी रोचने दिवो ये वा सूर्यस्यरश्मिषु । येषामप्सु सदस्कृतं तेभ्य: सर्पेभ्यो नम: ।।

वास्तु:—ॐ वास्तोष्पते प्रति जानी ह्यस्मान्स्वावेशो ऽअनमीवो भवान: । यत्वे महे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ।।

क्षेत्रपाल:—ॐ नहि स्पशमविदन्नन्यस्माद्वैश्वा नरात्पुर ऽ एतारमग्ने: । एमेनमवृधन्न मृता ऽअमर्त्यं वैश्वानरं क्षैत्र जित्याय देवा: ।।

प्रार्थना—ॐ ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशि प्रियाणां वो ऽ हविषमूर्ज ॅ समग्रभमुपयाम गृहीतो ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येषते योनिरिन्द्राय त्वा जुष्टतमम् । सम्पृ चौ स्थ: संमा भद्रेण पृङ्क्त विपृ चौ स्थो विमा पाप्मना पृङ्क्तम् ।। मनोजूति रिति प्रतिष्ठाप्य षोडशोपचारै: संपूजयेत् । ततो ग्रहवेदीशाने कलशस्थापन विधिना रुद्र कलशं संस्थाप्य ॐ असंख्याता० इति मंत्रेण असंख्य रुद्रानावाह्य पूजयेत् । तत: केचन ग्रहाणां पार्श्वे शेषादीनामपि पूजनं कुर्वन्ति तथाहिरवे: पूर्वे ॐ शेषाय नम: । सोमस्याग्रे ॐ वासुकये नम: । भ्रधोत्तरे ॐ कर्कोटकाय नम: । वृहस्पतेरग्रे ॐ पद्माय नम: । शुक्रोत्तरे ॐ महापद्माय नम: । शनि पश्चिमे ॐ शंखपालाय नम: । राहुपुरत: ॐ कालाय नम: । केतुपुरत: ॐ कुलिशाय नम: ।

बहि: पूर्वे—ॐ अश्विनी आदि सप्त नक्षत्रेभ्यो नम: तत्रैव ॐ विष्कम्भादि सप्त योगेभ्यो नम: । ॐ बव बालव करणाभ्यां नम: ॐ सप्तद्वीपेभ्यो नम: । ॐ ऋग्वेदाय नम: । बहिर्दक्षिणे—पुष्यादि सप्त नक्षत्रेभ्यो नम: । धृत्यादि सप्तयोगेभ्यो नम: ।

पश्चिमे—ॐ कौलव तैतिलकरणाभ्यां नम: । ॐ सप्तसागरेभ्यो नम: । ॐ यजुर्वेदाय नम: । ॐ स्वात्यादि सप्त नक्षत्रेभ्यो नम: । ॐ वज्रादि सप्त योगेभ्यो नम: । ॐ गर वणिज करणाभ्यां नम: । सप्त पातालेभ्यो नम: । ॐ सामवेदाय नम: ।

उत्तरे—ॐ अभिजिदादि सप्त नक्षत्रेभ्यो नम: । ॐ साध्यादि षड्योगेभ्यो नम: । विष्टि करणाय नम: । ॐ भूरादि सप्त लोकेभ्यो नम: । ॐ अथर्व वेदाय नम: ।

वायव्याम्—ॐ ध्रुवाय नम: । ॐ सप्त ऋषिभ्यो नम: ।

यथावकाशम्—ॐ नदीभ्यो नम: । सप्तकुलाचलेभ्यो नम: । ॐ अष्टवसुभ्यो नम: । ॐ एकादशरुद्रेभ्यो नमः । ॐ द्वादशादित्येभ्यो नम: । ॐ एकोनपंचाशन्मरुद्भ्यो नम: । ॐ षोडश मातृकाभ्यो नम: । ॐ षड् ऋतुभ्यो नम: । ॐ द्वादश मासेभ्यो नम: । द्वयनाभ्यां नम: । ॐ पंचदशतिथिभ्यो नम: । ॐ षष्ठि संवत्सरेभ्यो नम: । ॐ सुपर्णेभ्यो नम: । ॐ नागेभ्यो नम : । ॐ सर्पेभ्यो नम: । ॐ यक्षेभ्यो नम: । ॐ गन्धर्वेभ्यो नम: । ॐ विद्याधरेभ्यो नम: । ॐ अप्सरोभ्यो नम: । ॐ रक्षोभ्यो नम: । ॐ मनुष्येभ्य: नम: ।

प्रार्थना—यत्कृतं पूजनं देवभक्ति श्रद्धा विवर्जितम् ।
परिगृह्णन्तु तत्सर्वं सूर्याद्या ग्रहनायका: ।।
आदित्यादि ग्रहा: सर्वे नानावर्णा: पृथग्विधा: ।
सुप्रसन्ना प्रयच्छन्तु सौभाग्यं मम सर्वदा ।।

अथ योगिनी पूजनम्

आग्नेय्यां पीठे रक्त वस्त्राच्छादिते पूर्वभागे त्रीणि त्र्यस्राणि विलिख्य तेषु कलशत्रयं विधिना संस्थाप्य तदुपरि सौवर्णी तिस्र: प्रतिमा: कृताग्न्युत्तारणा: संस्थाप्य महाकाली महालक्ष्मी महासरस्वतीरावाह्य षोडशोपचारै: संपूजयेत् । तदग्रे कोष्ठेषु वक्ष्यमाणा देवीरावाहयेत्—ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद: । स न: पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिता त्यग्नि: ।। ॐ दिव्य योगिन्यै नम: । ॐ महायोगिन्यै नम: । ॐ सिद्ध योगिन्यै नम: । ॐ गणेश्वर्यै नम: । ॐ प्रेताक्ष्यै नम: । ॐ डाकिन्यै नम: । ॐ काल्यै नम: । ॐ कालरात्र्यै नम: । ॐ निशाचर्यै नम: । ॐ झंकार्यै नम: । ॐ रौद्रवेताल्यै नम: ।

ॐ मूतल्यै नमः । ॐ भूत डंबर्य्यै नमः । ॐ उर्ध्वकेश्यै नमः । ॐ विरूपाक्ष्यै नमः । ॐ शुष्कांग्यै नमः । ॐ नरभोजिन्यै नमः । ॐ भट्टार्यै नमः । ॐ वीरभद्रायै नमः । ॐ धूम्राक्ष्यै नमः । ॐ कलह प्रियायै नमः । ॐ राक्षस्यै नमः । ॐ घोररक्ताक्ष्यै नमः । ॐ विश्वरूपायै नमः । ॐ भयंकर्यै नमः । ॐ चंडिकायै नमः । ॐ वीर कौमार्यै नमः । ॐ वाराह्यै ॐ मुंडधारिण्यै नमः । ॐ सासूर्यै नमः । ॐ रौद्र भ्रंकार भाषिण्यै नमः । ॐ त्रिपुरांतकाय नमः । ॐ भैरव ध्वंसिन्यै नमः । ॐ क्रोध दुर्मुख्यै नमः । ॐ प्रेतवाहिन्यै नमः । ॐ खट्वांग्यै नमः । ॐ दीर्घलंबोष्ठ्यै नमः । ॐ मालिन्यै नमः । ॐ मंत्रयोगिन्यै नमः । ॐ कालाग्निग्रहण्यै नमः । ॐ चक्रिण्यै नमः । ॐ कंकाल्यै नमः । ॐ भुवनेश्वर्यै नमः । ॐ कटवर्यै नमः । ॐ कटिन्यै नमः । ॐ रौद्र्यै नमः । ॐ यमदूत्यै नमः । ॐ करालिन्यै नमः । ॐ घोराक्ष्यै नमः । ॐ कामुंडयै नमः । ॐ काक दृष्ट्यै नमः । ॐ अधोमुख्यै नमः । ॐ मुंडाग्रधारिण्यै नमः । ॐ व्याघ्र्यै नमः । ॐ किकण्यै नमः । ॐ प्रेत भाषिण्यै नमः । ॐ कालरूपायै नमः । ॐ कामाख्यै नमः । ॐ उद्गिरण्यै नमः । ॐ योग पीठिकायै नमः । ॐ महालक्ष्म्यै नमः । ॐ एकवीरायै नमः । ॐ कालराज्यै नमः । ॐ पीठिकायै नमः ।

इत्यावाह्य षोडशोपचारैः संपूजयेत् ।

अथ क्षेत्रपाल पूजनम्

वायव्यां श्वेतवस्त्राच्छादिते पीठे चतुरस्रं विलिख्य सप्तसप्तदलानां सप्तकमलानि कृत्वा अथवा तिर्यङ्मार्ग्यां पार्श्वमार्ग्यां च सूत्र द्वन्द्वं समानान्तरालं दद्यात् । एवं समानि नव कोष्ठानि विद्यन्ते । मध्य कोष्ठे अष्टदलं विलिख्य कलशं संस्थाप्य पूर्णपात्रे कृताग्न्युत्तारणं सौवर्णं क्षेत्रपाल ॐ नमोस्तुसर्पेभ्य इत्यावाह्य स्थापयेत् । पूर्वादि कोष्ठेषु षट्दलानि संपाद्य उत्तरेशानयोः कोष्ठयोस्तु सप्तदलानि कुर्यात् । ॐ अजराय नमः । ॐ आपकुम्भायनमः । ॐ इन्द्रस्तुतयेनमः । ॐ ईडाचाराय नमः ॐ उक्तसंज्ञायनमः । ॐ ऊष्मादायनमः । ॐ ऋषिसूदनाय नमः । ॐ ऋमुक्ताय नमः । ॐ लृप्तकेशाय नमः । ॐ लृपकायनमः । ॐ एकदंष्ट्राय नमः । ॐ ऐरावतायनमः । ॐ ओघबन्धवे नमः । ॐ औषधेशायनमः । ॐ अंजनाय नमः । ॐ अस्त्रवाराय नमः । ॐ कंवलाय नमः । ॐ खरुखानलाय नमः । ॐ गोमुखाय नमः । ॐ घंटानादाय नमः । ॐ ङमनसे नमः । ॐ चण्डवारणाय नमः । ॐ छटाटोपायनमः । ॐ जटलायनमः । ॐ झंगीवाय नमः । ॐ ञडवराय नमः । ॐ टंकपाणये नमः । ॐ ठानबंधवे नमः । ॐ डामराय नमः । ॐ ढक्कारवायनमः । ॐ णावार्णवायनमः । ॐ तडिद्देहाय नमः । ॐ थिरायनमः । ॐ दन्तुरायनमः । ॐ धनदाय नमः । ॐनतिक्तकान्ताय नमः । ॐ प्रचण्डकायनमः । ॐ फट्कारायनमः । ॐ वीर संधाय नमः । ॐ भृंगाय नमः । ॐ मेघभासुरायनमः । ॐ युगांताय नमः । ॐ रौद्रवायनमः । ॐ लंबोष्ठायनमः । ॐ वसवाय नमः । ॐ शूकनंदाय नमः । ॐ षडालायनमः । ॐ सुनाम्ने नमः । ॐ हुंकाय नमः । इति अजरादिक्षेत्रपालानावाह्य मनोजूतिरिति प्रतिष्ठाप्य षोडशोपचारैः संपूजयेत् ।

अथ पञ्चाङ्गाधिष्ठातृदेवपूजनम्

वारदेवताः—ॐ मृत्युञ्जयाय नमः १ ॐ गौर्यै नमः २ ॐ स्कंदाय० ३ ॐ विष्णवे० ४ ॐ ब्रह्मणे० ५ ॐ इंद्राय० ६ ॐ धर्मराजाय० ७ ॐ आदित्यादि वाराधिष्ठातृ देवेभ्यो नमः ।

तिथिदेवाः—ॐ अग्नये० १ ॐ वायवे० २ ॐ इंद्राय० ३ सोमाय२ ४ ॐ अदित्यै० ५ ॐ इंद्राण्यै० ६ ॐ मरद्भ्यः० ७ ॐ बृहस्पतये० ८ ॐ अर्यम्णे० ९ ॐ धात्रे० १० ॐ इन्द्राय० ११ ॐ वरुणाय० १२ ॐ यमाय० १३ ॐ रुद्राय० १४ ॐ चन्द्राय० १५ ॐ इन्द्राग्नीभ्यां० १ ॐ सरस्वत्यै । २ । ॐ मित्राय । ३ । ॐ निर्ऋत्यै । ४ । ॐ अग्निषोमाभ्यां । ५ । ॐ सर्पेभ्यः । ६ । ॐ विष्णवे । ७ । ॐ पूष्णे । ८ । ॐ त्वष्ट्रे । ९ । ॐ इन्द्राय । १० । ॐ वरुणाय । ११ । ॐ यम्यै । १२ । ॐ द्यावापृथिवीभ्यां । १३ । ॐ विश्वेभ्यो देवेभ्यः । १४ । ॐ पितृभ्यः । । ३० । ॐ तिथि देवताभ्यो नमः ॥

नक्षत्र देवाः—ॐ दस्रनासत्याभ्यां नमः १ ॐ धर्मराजायनमः २ ॐ अग्नये नमः ३ ॐ प्रजापतये० ४ ॐ सोमाय० ५ ॐ रुद्राय० ६ ॐ अदित्यै० ७ ॐ बृहस्पतये० ८ ॐ सर्पेभ्यः० ९ ॐ पितृभ्यः० १० ॐ भगाय० ११ ॐ अर्यम्णे० १२ ॐ सवित्रे० १३ ॐ वृद्धश्रवसेऽइन्द्राय (त्वष्ट्रे) १४ ॐ वाताय० १५ ॐ इंद्राग्नीभ्यां० १६ ॐ मित्राय० १७ ॐ इंद्राय १८ ॐ निर्ऋतये० १९ ॐ अद्भ्यः० २० ॐ विश्वेभ्यो देवेभ्यः० २१ ॐ ब्रह्मणे० २२ ॐ विष्णवे० २३ ॐ अष्टवसुभ्यः० २४ ॐ वरुणाय० २५ ॐ अजैकपदे० २६ ॐ अहिर्बुध्न्याय० २७ ॐ पूष्णे० २८ ॐ अश्विन्यादि साभिजिन्नक्षत्राधिष्ठातृ देवेभ्योनमः।

योगाधिदेवाः—ॐ यमाय नमः १ ॐ विष्णवे० २ ॐ चन्द्रमसे० ३ ॐ ब्रह्मणे० ४ ॐ बृहस्पतये० ५ ॐ रक्षोभ्यः ६ ॐ इंद्राय० ७ ॐ अद्भ्यः० ८ ॐ सर्पेभ्यः० ९ ॐ जातवेदसे० १० ॐ आदित्येभ्यः० ॐ भूम्यै० १२ ॐ वायवे० १३ ॐ सोमाय० १४ ॐ वरुणाय० १५ ॐ गणेश्वराय० १५ ॐ रुद्राय० १७ ॐ वैश्रवणाय० १८ ॐ त्वष्ट्रे० १९ ॐ मित्राय० २० ॐ स्कन्दाय० २१ ॐ सावित्र्यै० २२ ॐ लक्ष्म्यै० २३ ॐ गौर्यै० २४ ॐ अश्विनी कुमाराभ्यां २५ ॐ पितृभ्यः० २६ ॐ दित्यै० २७ ॐ विष्कम्भादि सप्तविंशति योगाधिष्ठातृ देवेभ्यो नमः।

करणाधिदेवाः—ॐ इंद्राय नमः १ ॐ ब्रह्मणे० २ ॐ मित्राय० ३ ॐ अर्यम्णे० ४ ॐ पृथिव्यै० ५ ॐ श्रियै० ६ ॐ यमाय० ७ ॐ बवादिसप्तकरणेभ्यो नमः। ॐ कलये नमः० १ ॐ नंदीश्वराय० २ ॐ सर्पेभ्यः ३ ॐ वायवे० ४ ॐ शकुनादि चतुष्करणधिष्ठातृ देवेभ्यो नम।

सूर्यराश्यंश (सौरतारिका) देवाः—ॐ ब्रह्मणे नमः १ ॐ प्रजापतये० २ ॐ स्वर्गेश्वराय० ३ ॐ अस्त्राय० ४ ॐ तरुभ्यः ५ ॐ मृगाय० ६ ॐ सोमाय० ७ ॐ कालाय० ८ ॐ अग्नये० ९ ॐ आकाशाय० १० ॐ वासोभ्यः ११ ॐ सूर्याय० १२ ॐ इन्द्राय० १३ ॐ गोभ्यः १४ ॐ निर्ऋतये० १५ ॐ सावित्र्यैः १६ ॐ स्कंदाय० १७ ॐ भवाय० १८ ॐ पितृभ्यः १९ ॐ वरुणाय० २० ॐ दिग्भ्यः० २१ ॐ मरुद्भ्यः० २२ २३ ॐ सरस्वत्यै० २४ ॐ ह्रियै० २५ ॐ कुबेराय २६ ॐ पर्वतेभ्यः० २७ ॐ पृथिव्यै० २८ ॐ वेद पुरुषाय० २९ ॐ परम पुरुषाय० ३० ॐ सौर राशिगत त्रिंशदंशाधिष्ठातृ देवेभ्यो०। ॐ पञ्चाङ्गाधिष्ठातृ देवेभ्यो नमः पाद्यादिभिः संपूज्य (रत्नकोषे)

प्रार्थना—ॐ तिथिर्विष्णुस्तथा वारो नक्षत्रं चन्द्र एव च।
योगश्च करणं चैव सर्वं विष्णुमयं जगत्॥ कर्म कांड प्रदीपे॥
अंतः संकल्पे तिथिवार नक्षत्र योग करण गोत्र मंत्रादि ज्ञानाभावे सर्वत्र विष्णुः विष्णुः विष्णुः इति प्रयोगो विधेयः।

अथ ऋषि पूजनम्

मंडलस्योत्तरस्यां ध्रुवारुन्धती सहितान् सप्तर्षीन् संपूज्य दक्षिण तश्चागस्त्य महर्षि पूजनं विधेयम्।,

ध्रुवावाहनम्—ॐ जज्ञानं सप्तमातरो वेधामशासत श्रिये।
अयं ध्रुवो रयीणां चिकेतयत॥

प्रार्थना—ॐ ध्रुवराजो महा प्राज्ञः पंच वर्षो महातपः।
ऋषीणां प्रवरः श्रेष्ठः स ध्रुवः प्रीयतां मम॥

ऋषीणामावाहनम्—ॐ सप्त ऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम्। सप्तापः स्वपतो लोक मीयु स्तत्र जागृतो ऽ स्वप्नजौ सत्रसदौ च देवौ॥

प्रार्थना—ॐ कश्यपो ऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः।
जमदग्निर्वशिष्ठश्चारुन्धत्या ऽऽयुष्य वर्धकाः॥

अगस्त्यावाहनम्—ॐ अगस्त्यः खनमानः खनित्रैः प्रजा मपत्यं बलमिच्छमानः।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम॥

प्रार्थना—ॐ दक्षिणा ऽऽशापते देव नमस्ते कलशोद्भव।
विन्ध्याचल महावेगरोधकाय नमो नमः।
वाताऽऽतौ भक्षितौ येन येन पीतो महोदधिः।
लंकायां दक्षिणे द्वारे कुम्भयोने नमोऽस्तुते॥

अथ कुशण्डिका

ब्रह्मवरणम्—ॐ विष्णुर्विष्णु विष्णु कर्तव्यामुकनिमितकहोमकर्मणिकृता

कृता वेक्षण रूप ब्रह्मकर्मकर्तुंममुकगोत्रमुक शर्माणमेभि: पुष्पचंदन तांबूल वासोभि ब्रह्मत्वेन त्वामहं वृणे ।

ओं अमुक गोत्रोऽहं कर्तव्यामुककर्म निमित्तहोमकर्मण्यमुक गोत्रममुक शर्माणं ब्राह्मणमेभि: पुष्पचंदन तांबूल वासोभिर्होतृत्वेन त्वामहं वृणे ।

वृतो ऽस्मि इति प्रतिवचनम् ओं यथाविहितं कर्म कुरु करवाणि इति

ब्रह्मासनम्—हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ तदुपरि प्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्नि सन्निधावासनांतरे ।

आवाहनम्—ओं आवहयाम्यहं देवं ब्रह्माणं कमलोद्भवम् ।
कमण्डलुधरं हस्ते कुशकेतुं कुशायुधम् ।
वेदशास्त्र पुराणज्ञमागमोक्तविदं तथा ॥
यजमानस्य यज्ञस्य ब्रह्मत्वं रक्षको भव ॥

ब्रह्मो पवेशनम्—ओं ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ।
स बुध्न्या उपमा ऽअस्य विष्ठाः सतश्च योनि मसतश्च विवः ॥

ब्रह्मध्यानम्—ओं ब्रह्माणं रक्तवर्णाभं पीत वस्त्रैरलंकृतम् ।
चतुर्भुजं चतुर्वक्त्रं सस्रुवं स्रचि हस्तकम् ॥

प्रार्थना—ओं ब्रह्माणि मतय श ँ सुतासः शुष्म इति प्रवृतो मे ऽअद्रिः ।
आशासते अतिहर्यन्स्युक्थे माहरी वहतस्तानो ऽअच्छ ॥

प्रणीताग्रहणं जलेन पूरणं च—ओं आपो हिष्ठा०

ब्रह्मणो मुखावलोकनम्—ओं कया नश्चित्रऽआभुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥

ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ।
ततः परिस्तरणम् । बर्हिष श्चतुर्थभागमादाय ।

आग्नेयादीशानान्तम्—ओं अग्निमीले पुरोहित यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥

ब्रह्मणोग्निपर्यन्तम्—ओं इषेत्वोर्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽ इन्द्राय भागं प्रजावतीरनमीवा ऽअयक्ष्मा मावस्तेनऽईशतमाघश ँ सो ध्रुवा ऽअस्मिन् गोपतौस्यात बह्वीर्यजमानस्य पशून्पाहि ।

नैर्ऋत्याद्वायव्यान्तम्—ओं अग्नऽआयाहिवीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥

अग्नितः प्रणीता पर्यन्तम्—ओं शन्नो देवीरभिष्टय ऽ आपो भवन्तु पीतये शंयो रभिस्रवन्तु नः ॥

पात्रासादनम्—अग्नेरुत्तरतः पश्चिमदिशिपवित्रछदनार्थंकुशत्रयंपवित्रकरणार्थं साग्रमनन्तरगर्भित कुशपत्रद्वयं प्रोक्षणीपात्रम् आज्यस्थाली सम्मार्जनार्थं कुशत्रयम् । उपयमनार्थं वेणीरूप कुशत्रयम् समिधस्तिस्रः पालाश्यः स्रुवः स्रुक् आज्यम् षट्पंचाशदुत्तरमुष्टिशत द्व्यावच्छिन्नं तण्डुलपूर्णपात्रम् पवित्रच्छेदन कुशानां पूर्वपूर्व दिशि क्रमेणोत्तरोत्तरमासादनीयानि ततः ।

पवित्रच्छेदनम्—ओं पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ इति मन्त्रेण पवित्रच्छेदनकुशैः पवित्रेच्छित्वा प्रादेशमितपवित्रकरणम् सपवित्र करेण प्रणीतोदकं त्रिः प्रोक्षणी पात्रे निधाय अनामिकाङ्गुष्ठाभ्यां द्वाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् प्रोक्षणी पात्रस्यसव्य हस्त करणम् अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेन प्रोक्षणी प्रोक्षणं ततः प्रोक्षणी जलेन यथा सादित वस्तु सेचनम् । ततोऽग्नि प्रणीतयोर्मध्ये प्रोक्षणी पात्रं निदध्यात् । आज्य-स्थाल्यामाज्य निर्वापः ततः ।

आज्याधिश्रयणम्—ओं इषेत्वोर्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण ऽआप्यायध्वमघ्न्या ऽइन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ऽईशत माघश ँ सो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ इति मन्त्रेणाज्याधि श्रयणम् । ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिण क्रमेण पर्यग्नि करणम् । ततः

स्रुव प्रतपनम्—ओं त्रातारमिन्द्रमवितार मिन्द्र ँ हवे हवे सुहव ँ शूर मिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्तिनो मघवा धात्विन्द्र ः । इति मन्त्रेण स्रुव प्रतपनं कृत्वा संमार्जन कुशानामग्रैरन्तरतो मूले बाह्यतः

स्रुव संमार्जनम्—ओं अनिशितोऽसिसपत्नक्षिद्वाजिनन्त्वावाजे ध्यायै सम्मार्ज्मि ।
मातुःस्थाने २य विप्रनिमन्त्रणम्—ॐ भगवन् विप्र ! अमुकगोत्राया मातुरमुक देव्याः शुद्धचातुर्वार्षिक त्रिपौरुष श्राद्धे मातुः २य स्थाने भूरितर भोजनार्थं एभिः पुष्पादिभिः अमुक गोत्रममुक शर्माणं त्वामहं निमन्त्रये ।

श्राद्धनियमाः—अक्रोधनैः शौचपरैः० ।

पितामही १म विप्रनिमन्त्रणम्—ॐ भगवन् विप्र ! अमुकगोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक श्राद्धे पितामही १म स्थाने भूरि भोजनार्थम् एभिः पुष्पादिभिः अमुकगोत्रममुक शर्माणं ब्राह्मणं त्वामहं निमन्त्रये ।

श्राद्धनियमाः—अक्रोधनैः शौचपरैः० ।

पितामही २य विप्रनिमन्त्रणम्—ॐ भगवन् विप्र ! अमुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक श्राद्धे पितामही २य स्थाने भूरितर भोजनार्थम् एभिः पुष्पादिभिः अमुक गोत्रं शर्माणं त्वामहं निमन्त्रये ।

श्राद्धनियवाः—अक्रोधनैः शौचपरैः० ।

पितामही ३य विप्र निमन्त्रणम्—ॐ भगवन् विप्र ! गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक श्राद्धे पितामही ३य स्थाने भूरितम भोजनार्थम् एभिः पुष्पादिभिः अमुक गोत्रं...शर्माणं ब्राह्मणं त्वामहं निमन्त्रये ।

श्राद्धनियमाः—अक्रोधनैः शौचपरैः० ।

प्रपितामही १म विप्रनिमन्त्रणम्—ॐ भगवन् विप्र ! गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक श्राद्धे प्रपितामही १म स्थाने भूरि भोजनार्थम् एभिः दक्षिणादिभिः अमुक गोत्रं शर्माणं ब्राह्मणं त्वामहं निमन्त्रये । निमन्त्रितो ऽस्मीति विप्रो वदेत् ।

श्राद्धनियमा;—अक्रोधनैः शौचपरैः० ।

प्रपितामही २य विप्रनिमन्त्रणम्—ॐ भगवन् विप्र ! गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक श्राद्धे प्रपितामही २य स्थाने भूरितर भोजनार्थम् एभिः दक्षिणाभिः अमुकगोत्रम् कमुक शर्माणं ब्राह्मण त्वामहं निमन्त्रये ।

श्राद्धनियमाः—अक्रोधनैः शौचपरैः० ।

प्रतिमाही ३ विप्रनिमन्त्रणम्—ॐ भगवन् विप्र ! गोत्राया मातु रमुक देव्याः शुद्धचातुर्वार्षिक श्राद्धे प्रपितामही ३ यस्थाने भूरितम भोजनार्थम् एभिः दक्षिणादिभिः अमुक गोत्र अमुक शर्माणं ब्राह्मणं त्वामहं निमन्त्रये ।

श्राद्धनियमाः—अक्रोधनैः शौचपरैः० । ततः सव्यं कृत्वाऽऽचम्य

विप्रापादप्रक्षालनम्— यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठ पुष्करे ।
तत्फलं पाण्डव श्रेष्ठ ! विप्राणां पादशोधने ॥

ब्राह्मणानां परोक्षे कुशमय मोटकेषु निमन्त्रणं प्रोक्तम् ।

निमन्त्रण दक्षिणा—ॐ अद्यामुक गोत्राया मातुरमक देव्याः श्वः करिष्यमाण शुद्ध चातुर्वार्षिकत्रिपौरुषश्राद्धे त्रयोदश ब्राह्मणनिमन्त्रण सांगतार्थम् इदं प्राजापत्यं दक्षिणाद्रव्यं रजतं चन्द्र दैवतं यथानामगोत्रायामुक ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

कार्य समापनम्—ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

॥ इति ब्राह्मण निमन्त्रण विधिः ॥

अथ शुद्धचातुर्वार्षिक त्रिपौरुष श्राद्ध विधिः

अपराह्णे स्नातः शुक्लद्विवासाः शुचिराचान्तः रेखावेष्टितं श्राद्धदेशमागच्छेत् । तत्र प्राङ्मुख उपविश्य सिद्धान्न सम्भवे सिद्धमिति पाचकं पृष्टवा पवित्रे धृत्वा श्राद्धमारभेत् ।

आत्माभिषिञ्चनम्—ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतो ऽपिवा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

त्रिकुशजलैः श्राद्धवस्तु सेचनम्—ॐ पुण्डरीकाक्षः पुनातु ।
ततो भूमि सूर्य दीप धूपादि पूजान्ते सर्षप तिलकुशैः

दिग्बन्धनम्—ॐ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम ।
इदं श्राद्धं हृषीकेश ! रक्षतां सर्वतो दिशः ॥

ॐ प्राच्यै नमः, अवाच्यै नमः, प्रतीच्यै नमः, उदीच्यै नमः, अन्तरिक्षाय नमः, श्राद्ध भूम्यै नमः । इति दिक्षुतिलसर्षपविकरणादवशेषरक्षाद्रव्येण नीवी बन्धनं कार्यम् ।*

अपसव्येन नीविबन्धः—ॐ सोमस्य नीवीरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषि स्कृधि ॥ नीवीवत्तैव पितृ दैवत्यं कृत्यं कार्यम् ।

विष्णु ध्यानम्—ॐ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
प्रारम्भे कर्मणां विप्र पुण्डरीकं स्मरेद्धरिम ॥

गयागदाधरयोर्ध्यानम्—श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा च पितृन्ध्यात्वा ततः श्राद्धं समारभेत् ॥

सव्येन त्रिकुशतिलजलैः संकल्पः—ॐ तत्सदद्यामुक गोत्राया मातुरमुक देव्याः विश्वेदेवपूर्वकं सपात्रिक शुद्ध चातुर्वार्षिकंश्राद्धमहं करिष्ये ।

लक्ष्मी नारायण पूजा—शालग्रामादि प्रतिमायां षोडशोपचारैः लक्ष्मीनारायणौ सम्पूज्य श्राद्धभुवः सन्निधौ संस्थाप्य गायत्रीं त्रिर्जपेत् ।

गायत्र्यास्त्रिर्जपः—ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः । ३॥

तत उत्तराभिमुखो दक्षिणोत्तरक्रमासादित कुशत्रयात्मकासन चतुष्टयं सयवमुत्सृजेत् । सव्यं कृत्वा

विश्वेदेवेभ्यः ४ आसनदानम्—ॐ अद्येत्यादि गत्रोाया मातुरमुक देव्या विश्वे देव पूर्वक शुद्धचातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्राणां मातृ पितामही प्रपितामहीनाम् अमुकामुकदेवीनां त्रिपौरुष शुद्ध श्राद्ध सम्बन्धिनो विश्वे देवा एतानि आसनानि चतुर्धा विभज्य वो नमः ॥ इति विश्वेषां देवानां चतुर्धासनानि सयव मुत्सृजेत् ततो ऽपसव्यं कृत्वा पातितवामजानुर्दक्षिणाभिमुखो द्विगुण भुग्न कुशत्रयतिलजलान्यादाय पूर्वपश्चिमासादित मोटकरूपाणि नवासनानि तिल जल प्रोक्षितानि त्रीणित्रीण्यासनानि मातृ पिता मही प्रपितामहीभ्यः पश्चिमत आरभ्य उत्सृजेत् ।

मात्रे३आसनदानम्—ॐ अद्यामुकगोत्रे मातरमुकदेविशुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे एतानि आसनानि त्रिधाविभज्यते स्वधा ।

पितामह्यै ३ आसनदानम्—ॐ अद्यामुक गोत्राया मातुरमुकदेव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्रे पितामहि अमुकदेवि एतानि आसनानि त्रिधा विभज्य ते स्वधा ।

---

*नीविबन्ध विधिः—नीविवासोदशान्तेन स्वरक्षार्थं प्रबन्धयेत् ॥ आश्वलायनः ॥
दक्षिणे कटिदेशे तु तिलैः सहकुशत्रयम् ॥ याज्ञवल्क्यः
द्वौदर्भौ दक्षिणे हस्ते सव्ये त्रीण्यासने तथा ।
वामकुक्षौ शिखायां च सकृद्यज्ञोपवीतके ॥ हेमाद्रिः

प्रपितामह्यै आसनदानम्—ॐ अद्यामुकगोत्राया मातुरमुकदेव्याः शुद्ध चातुर्वर्षिक त्रिपौरुष श्राद्धे गोत्रे प्रपितामहि अमुकदेवि एतानि आसनानि त्रिधा विभज्यते स्वधा। ततः सव्येन

कृतांजलिः—ॐ विश्वान्देवानमहमावाहयिष्ये। इत्युक्त्वा

विश्वेदेवावाहनम्—ॐ विश्वेदेवासऽआगत श्रृणुता मऽइम ँ् हवम्।
एदं बर्हिर्निषीदत। इति विश्वान्देवानावाह्य

यवविकरणम्—ॐयवोऽसि यवयास्मद् द्वेषो यवयारातीः। इति यवान्विकीर्य।

विश्वदेवपूजनम्—ॐ विश्वेदेवाः श्रृणुते इम ँ् हवम्। येमे ऽअन्तरिक्षे यऽउपद्य विष्ठयेऽअग्निजिह्वा उतवायजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम्॥ इतिजपेत्।

पुराणपाठः—ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये यत्र योजिताः श्राद्धे सावधाना भवन्तु ते॥
इति श्लोकं पठेत्। ततो ऽपसव्यंकृत्वा दक्षिणाभिमुखः

कृताञ्जलिः—ॐ मातृरहमावाहयिष्ये। इत्युक्त्वा

मात्रादीनामावाहनम्—ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि।
उशन्नुशत ऽआवह मातृर्हविषेऽअत्तवे। इति मातृरावाह्य।

तिलविकरणम्—ॐ अपहताऽअसुरारक्षा ँ् सि वे दिषदः। इति तिलान्विकीर्य।

मात्रादिपूजनम्—ॐ आयन्तु नो मातरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तुताऽ अस्मान् इति पठेत्। ततः सव्यं कृत्वा देवार्घपात्रचतुष्टये

देवार्घपात्रेषु पवित्रक्षेपः—ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसंवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ इति पवित्रं घृत्वा

जलक्षेपः—ॐ शन्नो देवीरभिष्टय ऽआपोभवन्तु पीतये।
शंयोरभि स्रवन्तु नः॥ इति जलं निक्षिप्य

यवक्षेपः—ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः। इतियवान्प्रक्षिप्य ततोऽपसव्येन मात्रादि नवार्घपात्रेषु प्रत्येकंपवित्रजल तिलान्क्षिपेत्।

मात्राद्यर्घपात्रेषु पवित्रक्षेपः—ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः०।

जलक्षेपः—ॐ शन्नोदेवीरभिष्टय०

तिलक्षेपः—ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः प्रत्तः स्वधया पितृ (मातृ) ल्लोकान् प्रीणाहिनः स्वाहा। इतितिलान्। ततः सव्यंकृत्वा देवार्घ पात्रं वाम हस्तेकृत्वा तत्र स्थित पवित्रं देवभोजन पात्रे पूर्वाग्रंघृत्वातदुपरिकिंचिदुदकान्तरन्दत्वा।

देवार्घपात्रा भिमन्त्रणम्—ॐ यादिव्याऽआपः पयसासम्बभूर्याऽअन्तरिक्षाऽउत्पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः श ँ् स्योनाः सुहवा भवन्तु॥ इति पठित्वा यवजलकुशान्यादाय

देवेभ्योहस्तार्घदानम्—ॐ गोत्रायामातुरमुकदेव्या विश्वेदेवपूर्वक शुद्ध चातुर्वर्षिक त्रिपौरुष श्राद्धमितित्तकानां अमुकामुकदेवीनां (त्रिपौरुषश्राद्ध सम्बन्धिनः पुरुरवार्द्रसंज्ञका विश्वेदेवा एष वो हस्तार्घश्चतुर्धा विभज्य नमः। इत्यर्घंददुत्सृजेत् ततोऽपसव्यं कृत्वा मात्राद्यर्घपात्रेषु (नवस्वपितृणीमेव गन्धपुष्पे प्रक्षिप्य मात्राद्यर्घपात्र वामहस्ते कृत्वा तत्रस्थितं पवित्रं मात्रादि भोजनपात्रेषु उत्तराग्रंधृत्वा तदुपरि किञ्चिदुदकान्तरंदत्वा

मात्रर्घपात्रा भिमन्त्रणम्—ॐ यादिव्याऽआपः पयसा सम्बभूर्याऽअन्तरिक्षा उत्पार्थिवीर्या। हिरण्यवर्णा यज्ञियास्तान ऽआपः शिवाः श ँ् स्योनाः सुहवा भवन्तु। इति पठित्वा मोटकतिलजलान्यादाय

मात्रे हस्तार्घदानम्—ॐ अद्यामुकगोत्रे मातरमुकदेविशुद्ध चातुर्वर्षिक त्रिपौरुष श्राद्धे एष ते हस्तार्घस्त्रिधा विभज्यस्वधा

पितामह्यै हस्तार्घदानम्—ॐ अद्यामुकगोत्राया मातुरमुक देव्याः शुद्ध चातुर्वर्षिक त्रिपौरुषश्राद्ध निमित्तिकामुक गोत्रे पितामहि अमुक देवि एष ते हस्तार्घः त्रिधा विभज्य स्वधा।

प्रपितामह्यै हस्तार्घदानम्—ॐ अद्यामुकगोत्राया मातूरमुकदेव्याः शुद्ध चातुर्वर्षिक त्रिपौरुषश्राद्धनिमित्तकामुकगोत्रे प्रपितामहि अमुकदेवि एषते हस्तार्घः त्रिधाविभज्य स्वधा।" ततः सव्यंकृत्वा पवित्रसहितमवशिष्ट जलयुत देवार्घपात्रचतुष्टयं प्रत्येकं देवासनदक्षिण पार्श्वे

देवार्घपात्राणामुत्तानेनस्थापनम्ॐ विश्वेभ्योदेवेभ्यः स्थानमसि। इत्युत्तानमेव

धारयेत् । **अपसव्यं कृत्वा** किंचित्प्रपितामह्यर्घपात्रेस्थित पवित्रादीनि पितामह्यर्घपात्रे कृत्वा तनि सर्वाणि मात्रर्घपात्रेकृत्वा मात्रर्घपात्रं पितामह्यर्घ पात्रोपरि तदुभयं प्रतिपामह्यर्घपात्रोपरि धृत्वा मात्रासनवामपार्श्वे

मात्रा द्यर्घपात्राणांन्यूब्जी कृत्यस्थापनम्—ॐ मातृ पितामही प्रपिता महीभ्यः स्थानमसि । इति मिलितान्येवन्युब्जी कुर्यात् तथा स्थापितानि च तानि-दक्षिणादान पर्यन्तं नोद्धरेत् न चालयेत् । आवृतास्तत्रतिष्ठन्ति पितरः श्राद्ध देवताः ॥ ततः **सव्यं कृत्वा** यवकुशजलान्यादाय

देवेभ्यो गन्धादि (पदक) दानम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्या विश्वे देवपूर्वक शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धनिमित्तकममुकगोत्राणां मातृपितामही प्रपितामहीनां त्रिपौरुष श्राद्धसम्बन्धिनो पुरुरवार्द्रसंज्ञका विश्वेदेवा एतानि गन्धाक्षत धूपदीप यज्ञोपवीत ताम्बूल रौप्यमयकमण्डलु करपात्र स्वर्णमयांगुलीयककाष्ठपादुकोर्णासिन कार्पास धौतोत्तरीयानि चतुर्धा विभज्य वो नमः । इति यथा सम्भवमुत्सृजेत् । ततो ऽपसव्यंकृत्वा मोटक तिलजलन्यादाय ।

मात्रे गन्धादि (पदक) दानम्—ॐ अद्यामुक गोत्रे मातुरमुक देवि शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे एतानि गन्धाक्षत धूपदीप यज्ञोपवीतताम्बूल रौप्यमय कमण्डलु करपात्रस्वर्णमयाङ्गुलीयककाष्ठपादुकोर्णासन कार्पास धौतोत्तरीयानि त्रिधा विभज्यते स्वधा ।

पितामह्यै गन्धादि (पदक) दानम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुक गोत्रे पितामहि अमुक देवि एतानि गन्धाक्षत धूपदीप यज्ञोपवीत ताम्बूल रौप्यमय कमण्डलुकरपात्र स्वर्णमयाङ्गुलीयककाष्ठपादुकोर्णासनकार्पासधौतोत्तरीयानि त्रिधाविभज्य ते स्वधा ।

प्रपितामह्यै गन्धादि (पदक) दानम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुक गोत्रे प्रपितामहि अमुकदेवि एतानि गन्धाक्षत धूपदीप यज्ञोपवीत ताम्बूल रौप्यमय कमण्डलु करपात्र स्वर्णमयाङ्गुलीयक काष्ठपादुकोर्णा सनकार्पास धौतोत्तरीयानि त्रिधा विभज्य ते स्वधा । ततो जलेनासनानि भोजनपात्रसहितानि वेष्टयित्वा मण्डलानि-कुर्यात् ।

मण्डलकरणम्—ब्रह्मा विश्णुश्चरुद्रश्च श्रीर्हुताशन एव च ।
मण्डलानि प्रकुर्वन्ति तस्मात्कुर्वीतमण्डलम् ॥

ततः श्राद्धदेयान्नाग्रभागमादाय सघृतं तत्सव्येनैव प्राङ्मुखः पुटकादिस्थजले आहुतिद्वयंजुहुयात् ।

आहुतिद्वयम्—ॐ अग्नये कव्य वाहनाय स्वाहा । ॐ सोमाय पितृमते स्वाहा । तृतीयं तूष्णीमेव क्षिपेत् । ततो जलतिल सहितव्यञ्जनयुतमन्नम् **अपसव्येन**

भूस्वामि पितृभ्य आहुतिः—ॐ इदमन्नमेतद् भूस्वामि पितृभ्यो नमः इदि दद्यात् । हुतशेषमन्नं सव्येन देवपात्र चतुष्टये परिवेष्य अपसव्येन मात्रादि पात्रेषु च परिवेष्य पिण्डार्थं किंचिदवशेषयेत् । तत उत्कृष्टमन्नंसिद्धम् आमं वा पुरुषाहार क्षमं परिविष्य यथा सम्भवमुपकरणं जलं घृतञ्च तत्रोपनीय सव्येन देवपात्र चतुष्टये अपसव्येन च मात्रादिपात्रेषु (नवस्वपि) मध्वन्नोपरि दद्यात् ।

मधुदानम्—ॐ मधुवाता ऽऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्न्नः सन्त्वोषधीः ॥१॥ ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः । मधुद्यौरस्तु नः पिता ॥२॥ मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्यः । माध्वी र्गावो भवन्तु नः ॥३॥ ॐ मधुमधु मध्विति जपेत् ॥ ततः सव्येन उत्तानपाणिभ्यां देवपात्रं स्पृष्ट्वा

देवपात्रभिमन्त्रणम्—ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे ऽअमृते ऽअमृतं जुहोमि स्वाहा ॥ ॐ इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम् । समूढ मस्य पा ँ सुरे स्वाहा ॥२॥ ॐ कृष्ण हव्यमिदं रक्षमदीयम् ॥ इति पठित्वा

ॐ इदमन्नमित्यन्ने ॐ इमा आपः इति जले ॐ इदमाज्यम् इति घृते ॐ इदं हविरिति पुनः अन्ने दक्षिणोत्तानकरस्याङ्गुष्ठमावेश्य

यवप्रक्षेपः—ॐ यवो ऽसियवयास्मद् द्वेषो यवयारातीः । इतियवान् प्रक्षिप

संकल्पः—ॐ अद्यामुक गोत्रायामातरमुक देव्या विश्वेदेवपूर्वक शुद्धचातुर्वार्षिक त्रिपौरुषश्राद्ध निमित्तक अमुक गोत्राणां मातृ पितामहीप्रपितामहीनाम-मुकामुक देवीनां श्राद्धसम्बन्धिनो पुरुरवार्द्र संज्ञकाविश्वेदेवा एतद् वोऽन्नं सोपकरणं परिविष्टं परिवेष्यमाणं चतुर्धा विभज्य नमः ।। इतियवकुश जलंरुत्सृजेत् ।। ततो ऽपसव्यंकृत्वा दक्षिणाभिमुखः पातित वामजानुः मातृ पात्रं न्युब्जाभ्यां पाणिभ्यां स्पृष्ट्वा ।

पात्राभिमन्त्रणम्—ॐ पृथिवी ते पात्रं द्यौर पिधानं ब्राह्मणस्य मुखे अमृतेअमृतं जुहोमि स्वाहा । ॐ इदं विष्णु० । ॐ कृष्णहव्य मिदंरक्षमदीयम् । ॐ इदमन्नम् इत्यन्ने । ॐ इमा आप इति जले ॐ इदमाज्यम् इतिघृते । ॐ इदं हविरिति पुनः अन्ने ।। दक्षिण करस्य न्युब्जमङ्गुष्ठ निवेश्य अप्रदक्षिण क्रमेण

तिल विकरणम्—ॐ अपहताऽअसुरा रक्षाँ ᳚ सि वेदिषदः ।। इति तिलान्विकीर्य मोटक तिलजला न्यादाय

मातृपक्षे संकल्पः—ॐ अद्यामुकगोत्रे मातरमुकदेवि शुद्धचातुर्वार्षिक श्राद्धे भूरि भूरितर भूरि तम भोजनार्थम एतत्तेऽन्नं सोपकरणं परिविष्टं परिवेष्यमाणं त्रिधा विभज्य स्वधा ।

पितामही पक्षे संकल्पः—ॐ अद्यामुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्रे पितामहि अमुक देवि भूरि भूरितर भूरितम भोजनार्थम् एततेऽन्नं सोपकरणं परिविष्टं परिवेष्यमाणं त्रिधा विभज्यस्वधा

प्रपितामही पक्षे संकल्पः—ॐ अद्यामुक गोत्राया मातुरमुकदेव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्रे प्रपितामहि अमुक देवि भूरि भूरितर भूरितम भोजनार्थम् एततेऽन्नं सोपकरणं परिविष्टं परिवेष्यमाणं त्रिधाविभज्य स्वधा ।। यद्येकं पात्र भवति तदा पृथिवी ते पात्र मितिमन्त्रः पुनर्न-पठनीयः । ततः सव्यं कृत्वाऽऽचम्य

क्षमापणम्—अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।
तत्सर्वमच्छिद्रमस्तु हरेर्नामानु-कीर्तनात् ।।

ॐ देवताभ्यः पितृभ्यश्चेति गायत्रीं त्रिर्ज पित्वा कुशोपूपविश्य—ॐ मधु-वाता० इतितृचं पठित्वा ॐ रक्षोहणं० ॐ कृणुष्व० भूमौ तिलविकरणम्०
ॐ अपहताऽअसुरा रक्षा ᳚ सि वेदिषदः

मातृमन्त्रः—ॐ उदीरतामवर ऽउत्परास ऽउन्मध्यमाः पितरः (मातरः) सोम्यासः । असुंय्य ऽईयुर वृका ऋतज्ञास्तेनोऽवन्तु पितरो (मातरो)हवेषु ।। ततः ॐ सहस्रशीर्षा० इति पुरुष सूक्तम् ॐ आशुः शिशान० इति अप्रति रथ सूक्तं पुराणेतिहासादि पुण्य स्तोत्रादीश्च पठेत् ।। तत उच्छिष्ट सन्निधावा स्ततकुशत्रयां भुमि प्रोक्ष्यसर्वप्रकारमन्न मुद्धत्य सतिलमेकी कृत्य

बलिदानम्—ॐ अनग्निदग्धाये जीवा ये प्रदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परांगतिम् ।

इतिकुशोपरि अन्नम् उत्सृजेत् । ततः सव्यं कृत्वाऽऽचम्य हरि स्मृत्वा गायत्री मधुवाता इति तृचं मधुमधुमध्विति च जपेत् ।

पुराण पाठः— सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः शरद्वीपे हंसाः सरसिमानसे ।।
तेऽभिजाताः कुरु क्षेत्रे ब्राह्मणा वेदपारगा. ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ।।

ततो ऽपसव्यं कृत्वा पिण्ड पातनार्थं हस्तमात्र चतुरङ्गुलोच्छ्रित दक्षिणप्लव (निम्नगा) वेदिका स्थाने सव्यहस्तधृतोपरिभागेन दक्षिणहस्त-धृतमूलेन पवित्रेण रेखा करणम्

पवित्रेण रेखा करणम्—ॐ अपहताऽअसुरारक्षा ᳚ सिवेदिषद इति प्रादेशः । मत्रामुल्लिखेत् । पवित्रमेशान्यांदिशिक्षिपेत् ।

ज्वलदङ्गार भ्रामणं कुशत्रयास्तरणं च—ॐ येरूपाणि प्रतिमुञ्चमाना ऽअसुराः सन्तः स्वधया चरन्ति । परापुरो ये भरन्त्यग्निष्टाँ ल्लोकान् प्रणुदात्य-स्मात् ।। इति मन्त्रेण ज्वलदङ्गारं दक्षिणतो निधाय ऽउपमूल सकृदाच्छि-न्नदक्षिणाग्र कुशत्रयं रेखायामास्तृणुयात् । ततः सव्यं कृत्वा । ॐ देवताभ्य इति त्रिर्जपेत् । ततो ऽपसव्यं कृत्वा पुटकत्रये जलतिल गन्ध पुष्पाणि कृत्वा एकं पात्रं वाम हस्ते कृत्वा मोटकतिलजलान्यादाय

मातृ ऽवनेजनदानम्—ॐ अद्यामुक गोत्रे मातरमुक देवि शुद्धचातुर्वार्षिक

त्रिपौरुष निमित्तक श्राद्ध पिण्ड स्थाने अत्रावने निक्ष्वते स्वधा। इत्यास्तृत दर्भमूले ऽ वनेजनं दद्यात्।

पितामह्यै अवजनेदानम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष निमित्तक श्राद्ध पिण्ड स्थाने गोत्रे पितामहि अमुक देवि अत्रावने निक्ष्वने स्वधा। इत्यास्तृत सेभंमर्ग्येऽवनंदद्यात्।

प्रपितामह्यै अवनेजनदानम्—ॐ अद्यामुक गोत्राया मातुरमक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुषनिमित्तक श्राद्ध पिण्डस्थाने गोत्रे प्रपितामहि अमुक देवि अत्रावनेनिक्ष्व ते स्वधा। इत्यास्तृतदर्भाग्रे ऽवनेजनं दद्यात्। ततः सव्यञ्जन तिलजलमध्वाज्यहुत शेषान्नेन त्रीन् पिण्डान् निर्माय मधुघृताभ्याम‍भिघार्य दद्यात्।

प्रथमं मोटक तिलजक पिण्ड मादाय—ॐअद्यामुकगोत्रे मातरमुकदेवि शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे एष ते पिण्डः स्वधा। इति प्रथमावनेजनस्थाने पिण्डं दद्यात्।

द्वितीयं मोटकतिलजलपिण्डमादाय—ॐ अद्यामुक गोत्रस्यमातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुकगोत्रे पितामहि अमुक देवि एष ते पिण्डः स्वधा। इति द्वितीया वनेजनेस्थाने पिण्डं दद्यात्।

तृतीयं मोटकतिलजलपिण्ड मादाय—ॐ अद्यामुकगोत्रे मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्रे प्रपितामहि अमुक देवि एष ते पिण्डः स्वधा। इति तृतीया वनजने स्थाने पिण्डं दद्यात्। पिण्डदानं च सव्योपगृहीत दक्षिण हस्तेनकार्यम्। ततः प्रपितामहीतऽऊर्ध्वं तिसृणां लेपभागभुजीनांतृप्तिमुद्दिश्य—ॐ लेप भागभुजस्तृप्यन्तु। इति पठित्वा मात्रादिक पिण्डाधारकुशमूले करं प्रोक्ष्य सव्यं कृत्वा त्रिराचम्यहरिं स्मृत्वा अपसव्यं कृत्वा दक्षिणा मुखः—ॐ अत्र मातरो मादयध्वं यथा भागमावृषायध्वम्। इति पठित्वा वामावर्तेनोदङ् मुखीभूय प्रीतमनाः श्वासं नियम्य तेनैव यथा परावर्तमानः मातुर्भस्विरमूर्तीर्ध्यायन्—ॐ अमीमदन्त मातरो यथा भागमावृषायिषत। इति जपेत्। पूर्ववदवनेजनावशिष्टजलयुतमवनेजन पात्रमादाय

मात्रे प्रत्य वनेजनदानम्—ॐ अद्यामुक गोत्रे मातरमुकदेवि शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे अत्र प्रत्यवनेनिक्ष्व ते स्वधा। इति प्रथमपिण्डोपरि प्रत्यवने जनं दद्यात्।

पितामह्यै प्रत्यवनेजनम्—ॐ अद्यामुक गोत्राया मातुरमुकदेव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुक गोत्रे पितामहि अमुक देवि अत्र प्रत्यवने निक्ष्व ते स्वधा॥ इति द्वितीय पिण्डोपरि प्रत्यवनेजनम

प्रपितामह्यै प्रत्यवनेजनम्—ॐ अद्यामुकगोत्रायां मातुरमुकदेव्याःशुद्धचातुर्वार्षिकत्रिपौरुषश्राद्धे ऽमुकगोत्रप्रपितामहि अमुकदेवि अत्र प्रत्यवनेनिक्ष्व ते स्वधा। तृतीयपिण्डोपरि। ततोनीवीं विस्रंस्य सव्येनाचम्य अपसव्यं कृत्वा वामेन

पणिनानीय दक्षिणकरे सूत्रं धृत्वा—ॐ नमो वो मातरो रसाय नमो वो मातरोशोषाय नमो वो मातरोजीवाय नमो वोमातरो स्वधायै नमो वोमातरो घोराय नमो वा मातरो मन्यवे नमो वो मातरो मातरो नमो वो गृहान्नो मातरो दत्तसतो वो मातरो देष्म। इति पठित्वा एतद् वो मातरो वासः इत्युक्त्का पिण्डेषु सूत्राणि धृत्वा

मात्रे सूत्रदानम्—ॐ अद्यामुक गोत्रे मातरमुक देवि शुद्ध चातुर्वार्षिक श्राद्धे पिण्डे एतत्ते वासः स्वधा। इति सूत्रमुत्सृजेत्।

पितामह्यै सूत्रदानम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्रे प्रपितामहि अमुकदेवि पिण्डे एतत्ते वासः स्वधा। इति सूत्र मुत्सृजेत्।

प्रपितामह्यै सूत्रदानम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्याः शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्रे प्रपितामहि अमुक देवि पिण्डेएतत्ते वासः स्वधा। ततो गन्धपुष्प धूपदीप ताम्बूलानि प्रत्येकं पिण्डेषु दद्यात्।

अन्नपात्रेषु जलम्—ॐ आपां मध्ये स्थिता देवाः सर्वमप्सुप्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु ते॥ ॐ शिवा आपः सन्तु इति जलम्

पुष्पाणि—ॐ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे।
लक्ष्मीर्वसति गोष्ठेषु सौमनस्यंसदास्तु मे॥

ॐ सौमनस्यमस्तु इति पुष्पम्

अक्षता:—ॐ अक्षतं चास्तुमे पुण्यं शान्ति: पुष्टिर्धृतिश्च मे ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ॐ अक्षतं चारिष्टं चास्तु इत्यक्षतान् अन्न पात्रेषु क्षिपेत् ।

यवा:—ॐ यवो ऽसि यवयास्मद्० इति यवान् पात्रेषु क्षिपेत् ।

अपसव्यं कृत्वा ततो मोटक तिलजलान्यादाय

मात्रे ऽक्षयोदकम्—ॐ अद्यामुक गोत्राया मातुरमुक देव्या: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे धूपदीपताम्बूलं दत्तैतदन्नपानादिकमक्षय्यमस्तु इति मात्रे अक्षयोदकमुत्सृजेत्

पितामह्यै अक्षयोदकम्—ॐ अद्यामुक गोत्राया मातुरमुकदेव्या: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुक गोत्राया पितामह्या अमुक देव्या: दत्तैतदन्नपानादिकमक्षय्यमस्तु । इति पितामह्यै अक्षयोदकम्

प्रपितामह्यै अक्षयोदकम् ॐ अद्यामुक गोत्राया मातुरमुक देव्या: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे गोत्राया: प्रपितामह्या दत्तैतदन्नपानादिकमक्षय्यमस्तु । इति प्रपितामह्यै० अक्षयोदकं दद्यात् ।

पिण्डोपरि पूर्वाग्र जलधारा—तत: सव्यं कृत्वा दक्षिणां दिशं पश्यन् सुमना: पिण्डोपरि ॐ अघोरा मातर: सन्तु । इति पठन् पूर्वाग्रां जल धारां पिण्डोपरि दद्यात् । तत: कृताञ्जलि: प्राङ्मुख: आशिष: प्रार्थयेत् ।

आशिषोग्रहणम्—ॐ गोत्रन्नो वर्द्धतां दातारो नो ऽभिवर्द्धन्तां वेदा: सन्ततिरेवच । श्रद्धा च नो माव्यगमद् बहुदेयञ्चनो ऽस्तु ॥ अन्नञ्च नो बहु भवेद तिथीं श्चलभेमहि । याचितारश्च न: सन्तु मा च याचिष्म कचन एता: सत्या आशिष: सन्तु ॥ ततो ऽपसव्यं कृत्वा पिण्डोपरि सपवित्र कुशानास्तीर्य

पिण्डोपरि दक्षिणाग्र जलधारा—ॐ ऊर्जं वहन्तीरमृतं घृतं पय: कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् ॥ इति मन्त्रेण पवित्र कुशोपरि दक्षिणाग्रां जलधारां दद्यात् । तत: स्वस्वस्थान स्थितानेव पिण्डान्नम्रो भूयाघ्रायोत्थापयेत् तत: पिण्डाधार कुशानुल्मकं च वह्नौ क्षिपेत् तत: सव्येन देवार्घ पात्र चतुष्टयं सञ्चाल्य अपसव्येन च मात्राद्यर्घपात्राण्युत्तानीकृत्य सव्येन कुशत्रय यवजलं देवदक्षिणां दद्यात् ।

विश्वे देव दक्षिणा—ॐ अद्यामुक गोत्राया मातुर मुकदेव्या विश्वे देवपूर्वक त्रिपौरुष शुद्ध श्राद्धे ऽमुक गोत्राणां मातृ पितामही प्रपितामहीनां अमुकामुकदेवीनां श्राद्ध सम्बन्धिनां विश्वेषां देवानां कृतैतच्छ्राद्ध प्रतिष्ठार्थं इदं हिरण्यमग्निदैवतं यथानाम गोत्रेभ्यो ब्राह्मणेभ्यो विभज्यदातुमहमुत्सृजे । ततो ऽपसव्येन मोटक तिलजलै: मात्रादि श्राद्धदक्षिणां दद्यात् ।

मातृ दक्षिणा—ॐ अद्यामुक गोत्राया मातुरमुक देव्या: कृतैतच्छ्राद्ध चातुर्वार्षिक त्रिपौरुष श्राद्ध प्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्यदक्षिणां दातु महमुत्सृजे ।

पितामही दक्षिणा—ॐद्यामुक गोत्राया मातुरमुकदेव्या: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुक गोत्राया पितामह्या अमुकदेव्या: कृतैतच्छ्राद्ध प्रतिष्ठार्थ इदं राजतं चन्द्रदैवतं यथानामगोत्रेभ्यो विभज्य दक्षिणा दातुमहमुत्सृजे ।

प्रपितामही दक्षिणा—ॐ अद्यामुक गोत्राया मातुरमुक देव्या: शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्धे ऽमुक गोत्राया: प्रपितामह्या अमुक देव्या: कृतैतच्छ्राद्ध प्रतिष्ठार्थ इदं राजतं चन्द्र दैवतं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे । एवं क्रमशो मातु: पितामह्या प्रपितामह्या वा स्थाने ब्राह्मणकरे दक्षिणां दद्यात् । हिरण्यरजता संपत्तौ यथा संभवम् अन्यदपि फल मूलादिकं दक्षिणां दद्यात् ।

***सर्वाऽऽहारसंकल्प:**—ॐ अद्यामुक गोत्राया, मातुरमुक देव्या शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्ध प्रतिष्ठार्थं पुरुषत्रयाहार क्षमं सिद्धान्नं सदक्षिणाकं सोपकरणं मात्रादिकत्रय्या क्षय्य प्रीत्यर्थं त्रिभ्यो ब्रह्मणेभ्यो विभज्य दातुमहमुत्सृजे ।

मात्रादि विसर्जनम्—ॐ वाजेवाजे वत वाजिनो धनेषुविप्रा ऽअमृता ऽऋतज्ञा: । अस्यमध्व: पिबतमादयध्वं तृप्तायातपथिभिर्देवयानै: । इति मात्रादि विसर्जनम् ।

---

*दक्षिणा: सर्वभोगांश्च, प्रतिपिण्डं प्रदापयेत् ।
भक्ष्याण्यपूपानिक्षूंश्च व्यंजनान्यशनानि च ॥
[illegible] भक्ष्यं भोज्य फलादिकम् ।
अनिवेद्य न भोक्तव्यं पिण्डमूले कथञ्चन ॥ हारीत: ॥

सव्येन देवविसर्जनम्—ॐ विश्वे देवाः प्रीयन्ताम्। इति देव विसर्जनम्।
ततः सव्येन देवताभ्यः इति त्रिर्जपेत्। ततो ऽपसव्येन रक्षा दीपं पाणिना निर्वाप्य सव्यं कृत्वा हस्तौ प्रक्षाल्याऽऽचम्य

क्षमापणम्—ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
श्राद्धीय वस्तूनि ब्राह्मणाय प्रतिपादयेत्॥ तदलाभे जले वा क्षिपेत्।
ततो बलिवैश्वदेवादि कर्म कुर्यात्।

सव्येन—देवा मनुष्याः पशवो वयांसि सिद्धा सयक्षोरग दैत्य संघाः।
प्रेताः पिशाचास्तरवः समस्ता येचान्नमिच्छन्ति मया प्रदत्तम्॥
पिपीलिकाः कीट पतङ्गकाद्या बुभुक्षिताः कर्म निबन्धबद्धाः।
प्रयान्तु ते तृप्तिमिदंमयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु॥
येषां न माता न पिता न बन्धुर्न चान्नसिद्धिर्न तथान्नमस्ति।
तत्तृप्तयेन्नं भुविदत्त मेतत् ते चान्न तृप्ता मुदिता भवन्तु॥
वैश्वबलिर्नमः।

क्षेत्रपाल बलिः—यो ऽस्मिन्निवसते क्षेत्रे क्षेत्रपालः सकिङ्करः।
तस्मै एनां प्रदास्यामि बलिं पानीय संयुताम्॥ क्षेत्रपालबलिर्नमः।

भूत बलि—शुनां च पतितानां च श्वपचां पाप रोगिणाम्।
वायसानां कृमीणां च शनकैर्निक्षिपेद् भवि॥
रौरवादि निषण्णानां प्रेतद्वार निवासिनाम्।
अर्थिनां याचमानानामक्षय्यमुप तिष्ठताम्॥ भूतेभ्योबलिर्नमः।

गोभ्यो बलिः—सौरभेय्यः स्वर्गहिताः पवित्राः पापनाशनाः।
प्रीतागृह्णन्तु मेग्रासं गावस्त्रैलोक्य मातरः॥ गोभ्यो ऽन्नं नमः।

श्वभ्यो बलि—द्वौ श्वानौ श्याव श्यवलो वैवस्वत कुलेद्भवौ।
ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ॥
श्वभ्यो ऽन्नं नमः।

काकबलिः—ऐद्रवारुण वायव्या याम्या नैर्ऋतिकाश्च ये।
वायसा प्रतिगृह्णन्तु इमं पिण्डं मयोद्धृतम्॥ वायसेभ्योऽन्नं नमः।

१४ धर्मराज बलिः—यमाय धर्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्व प्राण हराय च॥
औदुम्बराय नीलाय दध्नाय परमेष्ठिने।
वृकोदराय भीमाय चित्रगुप्ताय वै नमः॥
पाश हस्त कृतांताय प्रेताधि पतये नमः। धर्मराजायबलिर्नमः।

सांकल्पिक शय्यादानम्—ॐ तत्सदद्य अमुक गोत्राया मातुरमुक देव्याः कृतैतद् विश्वेदेव पूर्वक शुद्ध चातुर्वार्षिक त्रिपौरुष श्राद्ध प्रतिष्ठार्थं तदङ्गत्वेन कृतैतच्छय्यादानादि सागता सिद्ध्यर्थं हिण्यमग्नि दैवतं यथानाम गोत्रायामुक ब्राह्मणाय तुभ्यमहं सम्प्रददे।

प्रार्थना—आयुः प्रजाधनं विद्यां स्वर्गं मोक्षं सुखानि च।
प्रयच्छन्तु तथा राज्यं नृणां प्रीताः पितामहाः॥
यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
सूर्यायार्घ्यं दत्वा आसन वन्दनम्॥

अथ शय्यादानम्

अङ्गन्यासः—ॐ वाङ् म आसन् नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्र कर्णयोः।
अपलिताः केशा ऽअशोणा दन्ता बहु बाह्वो र्बलम्॥
ऊर्वोरोजो जंघयोर्जवः पादयोः प्रतिष्ठा।
अरिष्टानिमे ऽअङ्गानि सर्वात्मानिभृष्टः॥

अथ सोपकरण शय्यादान प्रतिज्ञा—तत्सदद्येत्यादि अमुक गोत्राया मातुरमुक-देव्याः विश्वेदेव पूर्वक चातर्वार्षिक त्रिपौरुष शुद्ध श्राद्धे अमुक गोत्रायाः मातुरमुक देव्याः सकलदुरितक्षय पूर्वक षष्टि वर्ष सहस्रा वछिन्न स्वर्गलोक सहितन्तदुत्तरं श्री विष्णुलोकप्राप्ति कामो विश्वेदेवपूर्वक चातुर्वार्षिकत्रिपौरुष शुद्ध श्राद्धसागतासिद्ध्यर्थंसोपकरणशय्यादानमहंकरिष्ये।

ततः शय्यामास्तीर्य विप्रवरणम्—ॐ तत्सदद्यामुक गोत्राया अमुकदेव्या मातुश्चातुर्वार्षिक विश्वदेव पूर्वक त्रिपौरुष शुद्ध श्राद्ध कर्मणि एभिः पुष्पचन्दनताम्बूलवासोभिः अमुक गोत्रम् अमुक शर्माणं भूदेवं शय्यादान प्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मीति प्रतिवचनं गृहीत्वा विप्रं

सम्पूज्य ततः शय्योपरि लक्ष्मीनारायण प्रतिमां विधिवत् संपूज्य ॐ शान्ताकारमिति ध्यात्वा सांगशय्यायै नमः ॐ प्रामाण्यै देव्यै नमः इति शय्यां सम्प्रोक्ष्य गन्धादिना च समभ्यर्च्य ।

प्रार्थना:—ॐ यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्यामवाप्यशून्यास्तु भवेज्जन्मनि जन्मनि ॥
यथा न शून्यं शयनं केशवस्यं शिवस्य च ।
शय्या मवाप्यशून्यास्तु भवेज्जन्मनि जन्मनि ।

शय्यादान संकल्पः—ॐ अद्यामुक देव्या मातुश्चातुर्वार्षिक विश्वेदेवपूर्वक त्रिपौरुष शुद्ध श्राद्धाङ्गी भूतामिमां शय्यां तूलिकोपधानोर्णक्षौमकार्पासादि सौभाग्योपकरणालङ्कृतां छत्रचामरव्यजनपादुकोपानहाद्यन्वितां नानाविध भक्ष्यभोज्य लेह्य चोष्यपेयोपेत पक्वान्नाद्याधिकारणकां गोधूमव्रीहि यवमाषकुलित्थमसूरमुद्गचणकाद्यामान्नमूलफलशाकाद्युपस्कृतां रीतिमय कांस्यमय लोहमयपात्राद्यैः पुरस्कृतां निद्राकलशादि भाण्डेक्षुदण्डाद्यु पवितांप्रजापति दैवत्यां खट्वाङ्गिरो दैवत्यां समर्चित लक्ष्मीनारायण प्रतिमोपेतां सोपस्करां श्रुतिस्मृति पुराणोक्त मातुरक्षयस्वर्गोप भोगादि फलावाप्तयेऽमुकगोत्राया मुकशर्मणे भूदेवायतुभ्यंसम्प्रददेस्वस्तीति ब्राह्मणो वदेत् । ततः शय्यादान प्रतिष्ठान्ते विप्रं शय्यामारोप्य प्रदक्षिणी कृत्य च ॐ यथा न कृष्णशयनमित्यादिना शय्यां सम्प्रार्थ्य गोदानं कुर्यात् ।

अथगोदान प्रयोगः विप्रवरणम्—ॐ अद्यामुक गोत्राया अमुकदेव्या मातुश्चातुर्वार्षिक विश्वेदेव पुर्वक त्रिपौरुष शुद्ध श्राद्धे एभिः पुष्पचन्दन वासोभिः अमुक गोत्रममुक शर्माणं भूदेवं गोदान प्रतिगृहीतृत्वेन त्वामहं वृणे । एवं विप्रं संपूज्य ततो यथाशक्ति वस्त्रालङ्कारादिभिः सवत्सांधेनुमलङ्कृत्यगोशृंगमूलादिपुच्छाग्रान्ताङ्गेषु देवत: पूजनीया: । अङ्गपूजा शृङ्गमूले ब्रह्मविष्णुभ्यां नमः ब्रह्मविष्णू पूजयामि एवं सर्वत्र शृङ्गाग्रे सर्वतीर्थेभ्यो नमः । शिरोमध्ये शिवाय नमः ललाटे देव्यै, मुखे राहवे, नासिकायां षण्मुखाय, नासापुटयोः कम्बलाश्वतरनागाभ्यां, कर्णयोः अश्विभ्याम्, दन्तेषु वायवे, जिह्वायां वरुणाय, हुंकारे सरस्वत्यै, गण्डयोः पक्षमासाभ्याम्, चक्षुषोः शशिभास्कराभ्याम्, ओष्ठयोः सन्ध्याद्वयाय, ग्रीवायामिन्द्राय: कुक्षिदेशे रक्षोभ्यः, उरसि साध्येभ्यः, पादेषु धर्माय, जङ्घासु अर्यम्णे, खुरमध्ये गन्धर्वेभ्यः, खुराग्रेपन्नगेभ्यः, खुरपश्चिमाङ्गे अप्सरोभ्यः, पृष्ठे एकादशरुद्रेभ्यः, सर्वसन्धिषु वसुभ्यः, श्रोणीतटे, पितृभ्यः, लांगूले सोमाय, गुह्ये आदित्यरश्मिभ्यः, गोमूत्रेगङ्गायै, गोमये यमुनायै, क्षीरे सरस्वत्यै, दध्निनर्मदायै, घृते अग्नये, रोमसु अष्टाविंशतिदेवकोटिभ्यः, रोमकूपेषु बालखिल्येभ्यः, उत्तरे पृथिव्यै, पयोधरेषु चतुः समद्रेभ्यः पुच्छाग्रे केतवे नमः केतुं पूजयामि एता देवता अंगेषु सम्पूज्य सव्यंकृत्वा देवतीर्थेन—

गोपुच्छंगृहीत्वातुर्पणम्—ब्रह्माविष्णु महेशाश्चवेदाश्छन्दांसिवत्सरा: । देवा: यज्ञास्तथानागागन्धर्वाप्सरसांगणा:क्रूरा:सर्पा:सुपर्णाश्चतरवोजम्भकादयः । विद्याधराजलधरास्तथैवाकाशगामिनः निराधाराश्चयेजीवापापेधर्मेरताश्चये । तेसर्वेतृप्तिमायान्तु गोपुच्छोदकतर्पणात्

निवती (कण्ठीकृत्य) कायतीर्थेन—सनकश्च सनन्दश्च सनच्चैव सनातनः ।
कपिलश्चासुरी चैव वोढ: पंचशिखस्तथा ।।
ते सर्वेतृप्तिमायान्तु गो पुच्छोदक तर्पणात् ।

सव्यं कृत्वा देवतीर्थेन—मरीच्यत्र्यङ्गिरा चैव पुलस्त्य पुलह: क्रतुः ।
वशिष्ठप्रचेताभृगुर्जावालिनारदादयः । तेसर्वेतृप्तिमायांन्तुगोपुच्छोदकतर्पणात्

अपसव्यं कृत्वा पितृतीर्थेन—कव्यवाडनल: सोमोयमश्चार्यम सञ्ज्ञका: अग्निष्वात्तस्तथा सौम्यो हविष्माश्चैव उष्मपा: । सुकाली बर्हिषच्चैवं आज्यपा: पितरश्चये ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ।
वसुरूप पितापूज्य: रुद्ररूप: पितामह: । आदित्यरूप: प्रपितामहस्तेभ्य: स्वधानम: गायत्रीरूपिणीमातासावित्री च पितामही । सरस्वतीमयी साक्षात्तृप्यतांप्रपितामही

त्रिकं मातामहाद्यं च मातामह्यादिकं त्रिकम् ।
ते सर्वे तृप्ति मायान्तु गो पुच्छोदक तर्पणात् ॥
आचार्या मातुला: श्याला: पितृव्या: श्वशुरादय: ।

ते सर्वेतृप्तिमायान्तु गोपुच्छोदक तर्पणात् ॥
आब्रह्मस्तम्बपर्यन्तं देवर्षि पितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृ माता महादयः ।
अतीत कुल कोटीनां सप्तद्वीप निवासिनाम् ।
आब्रह्म भुवनाल्लोकादिदमस्तु तिलोदकम् ।
ये बान्धवाऽबान्धवा ये ये ऽन्यजन्मनिबान्धवाः ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥ यमायधर्मराजाय०
वैयाघ्रपदगोत्राय सांकृतिप्रवराय च ।
अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥

ततो गोदान संकल्पः—ॐ अद्यामुक गोत्राया अमुक देव्या मातुश्चातुर्वार्षिक विश्वेदेवपूर्वक त्रिपौरुष शुद्ध श्राद्धे स्वमातुरक्षय वैकुण्ठधामनिवासकामः इमां प्रत्यक्षां सवत्सां गां सुपर्णशृङ्गीं रौप्यखुरां ताम्र पृष्ठीं घण्टा ग्रैवेयकां मुक्ता लाङ्गूलां कांस्योपदोहनी सितवसनद्वयोपेतां सर्वाभरण भूषितां सोपस्करां रुद्र दैवत्यां अमुक गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे न मम । इति तिलपात्रंघृताक्तां गोपुच्छं कृत्वा विप्रहस्तेऽग्नितीर्थे सतिलकुशोदकं दद्यात् ।

मन्त्रः—मन्त्रसाधन भूताया विश्वाघौघविनाशिनी । विश्वरूप धरोदेवः प्रीयतामनयागवा । ततोदाता दान प्रतिष्ठा सिद्धयर्थं सुवर्णं दक्षिणां दद्यात् ।

गो प्रार्थना:—नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एवं च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः पूजितासि वसिष्ठेन विश्वामित्रेण धीमता । सुरभी हर मे पापं यन्मयादुष्कृतं कृतम् । गावो ममाग्रतः सन्तु गावोमे सन्तु-पृष्ठतः । गावो मे हृदये सन्तुगवांमध्येवसाम्यहम् । धेनु दत्वा प्रदक्षिणी कृत्य किञ्चिदनुव्रजेत् । ततः पिण्डानादाय श्राद्धदक्षिणां दत्वा विसर्जनान्ते भूतबलिं च प्रदाय सूर्यायार्घ्यं समर्प्य प्रमादादिति कर्मसमापनम् ॥

शुभमस्तुतराम्

त्रयोदश पदकात्मक श्राद्धवेदिका

पूर्व

श्राद्ध सामग्री

उत्तर

यजमान आसन

पिण्डवेदिका

विश्वेदेव २

लक्ष्मीनारायण

माता ३ पितामही ३ प्रपितामही ३

दक्षिण

पश्चिम

अथ महा मृत्युञ्जय जप विधिः

अद्येत्यादि निज (यजमानस्य) शरीरेऽमुकग्रहदोषजनितारिष्ट निरसन पूर्वक दीर्घायुरारोग्य सिद्ध्यर्थं महामृत्युञ्जय देव प्रसादलाभार्थं च महा. मृत्युञ्जय जपमहं करिष्ये। अस्य महामृत्युञ्जय मन्त्रस्य वसिष्ठ ऋषि र्निचृदनुष्टुप्छन्दो मृत्युञ्जयेश्वरोदेवता हौं बीजम्। जूं शक्तिः। सः कीलकम्। महामृत्युञ्जयेश्वर प्रीत्यर्थं जपे विनियोगः। ॐ वसिष्ठ ऋषये नमः शिरसि। अनुष्टप्छन्दसे नमों मुखे। महामृत्युञ्जयेश्वर देवतायैनमो हृदि। हौ बीजाय नमो गुह्ये। जूं शक्तये नमः पादयोः। सः कीलकाय नमः सर्वाङ्गेषु। करन्यासः ॐ त्र्यम्बकं अङ्गुष्ठाभ्यां नमः। ॐ यजामहे तर्जनीभ्यां नमः। ॐ सुगन्धि पुष्टिवर्धनम् मध्यमाभ्यां नमः। ॐ उर्वारुक मिव बन्धनात् अनामिकाभ्यां नमः ॐ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः। ॐ मामृतात् करतलकर पृष्ठाभ्यां नमः। एवं हृदयादिन्दन्यास—ॐ त्र्यम्बकं शिरसि ॐ यजामहे भ्रुवोः ॐ सुगन्धिनेत्रयोः। ॐ पुष्टिवर्धनम् मुखे। ॐ उर्वारुकं गण्डयोः ॐ इव हृदये। ॐ बन्धनात् जठरे। ॐ मृत्योः उपस्थे। ॐ मुक्षीय उर्वोः। ॐ मा जान्वो। ॐ अमृतात् पादयोः। वर्णन्यास. ॐ "त्रि" ध्रुववसवे नमः शिरसि "यम्" अध्वराय मुखे। ब सोमाय दक्षिण कर्णे। 'कम्' अद्भ्यो वामकर्णे। "य" अनिलाय शिखामूले। "जा" अनलाय दक्षिण बाहुमूले। "म" प्रत्यूषाय दक्षिण-बाहौ। "हे" प्रभासाय दक्षिण मणि बन्धे। "सु" वीरभद्ररुद्राय हस्ता-ङ्गुलिमूले। "गम्" शम्भवे हस्ताङ्गुल्यग्रे। "धिम्" गिरीशाय वाम बाहुमूले। "पु" अजैकपदे वाम हस्ते। "ष्टि" अहिर्बुध्न्याय वाममणि-बन्धे। "व" पिनाकिने वामहस्ताङ्गुलिमूले। "र्ध" भवानीश्वराय वाम हस्ताङ्गुल्यग्रे। "नम्" कपालिने दक्षिणोरुमूले। "उ" दिक्पतये दक्षिण जानौ "र्वा" स्थाणवेदक्षगुल्फे। "रु" भर्गाय दक्षपादङ्गुलिमूले। "क" धात्रे अदित्याय वामपादङ्गुल्यग्रे। "मि" अर्यम्णे वामोरुमूले। "व" मित्राय वाम जानौ "बं" वरुणाय वाम गुल्फे। 'ध' अंशवे वामाङ्गुलि मूले। 'नात्' वामाङ्गुल्यग्रे 'मृ' विवस्वते आदित्याय दक्षिणपार्श्वे। 'त्यो': इन्द्राय वाम पार्श्वे 'मु' पूष्णे पृष्ठे। 'क्षी' पर्जन्याय नाभौ। 'य' त्वष्ट्रे गुह्ये। "मा" विष्णवे भुजयोः। "मृ" प्रजापतये नमः कण्ठे। "तात्" वषट् काराय हृदये।

ध्यानम्—हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम्।
अङ्कन्यस्तकरद्वयामृतघटं कैलास संस्थं शिव
स्वच्छाम्भोजगतं नवेन्दु मुकुटं देवं त्रिनेत्रं भजे।
चन्द्रोद्भासित मूर्धजं सुरपतिं पीयूषपात्रंवह—
द्धस्ताब्जेन दधत्सु दिव्यममलं हास्यास्यपंकेरुहम्।
सूर्येन्द्वग्नि विलोचनं करतलैः पाशाक्षसूत्रांकुशा-
म्भोजं बिभ्रतमक्षयं पशुपतिं मृत्युञ्जयं संस्मरे॥

मानसपूजा—ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि। ॐ हं आकाशात्मकं पुष्पं०। ॐ यं वाय्वात्मकं धूपं०। ॐ रं तैजसात्मकं दीपं०। ॐ वं अमृतात्मकं नैवेद्यं। ॐ सं सर्वात्मकं मन्त्र पुष्पाञ्जलिं समर्पयामि।

मन्त्रोद्धार—ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॐ स्वर्भुव-र्भूरोम् जूं सः हौम् ॐ॥ उत्तरन्यासान्ते

गुह्यातिगुह्य गोप्तात्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥
मृत्युञ्जय महारुद्र त्राहि माम् शरणागतम्।
जन्म मृत्युजरारोगैः पीडितं कर्मबन्धनैः।

अनेन महामृत्युञ्जय जप कर्मणा श्री महामृत्युञ्जयेश्वरः प्रीयतां नमम। जप सांगतार्थं यथाकामं द्रव्येण जपदृशांश होमतर्पण मार्जन ब्राह्मण भोजनादीनि यथाविधि विदध्यात्।

मृत्युञ्जयविद्याफलश्रुतिः—आदौ प्रासादबीजं तदनुमृतिहरं तारकं व्याहृतीश्च
प्रोच्चार्य त्र्यम्बकं यो जपतिमृतिहरं भूय एवं तथाघम्।

कृत्वान्यासं षडङ्गं स्ववदनत ऋचं मण्डलान्तः प्रविष्टं
ध्यात्वा योगीशरुद्रं सजयति मरणं शुक्र विद्याप्रसादात् ।

विवाहमुहूर्तविमर्श

विवाह विहित मासों के विषय में धर्म शास्त्र एवं ज्योतिष शास्त्र में मतभेद भरे दो चार श्लोक सिन्धुकार ने प्रस्तुत किये हैं—

आपस्तम्ब:—

"सर्व ऋतवो विवाहस्य शैशिरौ मासौ परिहार्य्योत्तमं च नैदाघम् ।

अत्र माघ फाल्गुनाषाढवर्जं नवमासा मुख्य काल: । इति सुदर्शन भाष्ये डविलायां ब्रह्मविद्यातीर्थैश्चोक्तम ।

बौधायन सूत्रे ऽपि "सर्वे मासा विवाहस्य शुचितपस्तपस्य वर्जम्" इत्येके ॥ इन दोनों श्लोकों में आषाढ़, माघ फाल्गुन, मासों के अतिरिक्त ९ मासों में आपस्तम्ब एवं बौधायन विवाह करना उत्तम मानते है । एवं कालादर्श ग्रन्थकार तो "निशि चेत्सर्वेषु द्वादशस्वपि मासेषूद्वहेद्इति कालादर्श: । रात्रि में यदि विवाह करना चाहें तो बारह मासों में ही विवाह कर सकते हैं । ऐसी धर्म शास्त्र की आज्ञा है । वहीं ज्योतिष में गृहीत, माघ, फाल्गुन के विषय में निर्णय सिन्धुकार निम्नादमुत निर्णय देते हुए दृष्टिगोचर होते है" ये तु ज्योतिषे माघादिविषयस्ते गृह्यसूत्राणां द्विजपरकत्वेन प्राबल्याच्छूद्रादिपर: अर्थात् ज्योतिष में जो माघादि को विधेय माना है गृह्य सूत्रों के प्रधान रूप से द्विज परक होने के कारण शूद्रादि के लिए ही विहित है न कि त्रैवर्ण्य के लिये अत: धर्म शास्त्र वर्जित माघ, फाल्गुन आषाढ़ का ग्रहण एवं धर्म शास्त्रोक्त चैत्र पौष का त्याग ज्योतिष का पक्ष है वही गृह्य सूत्रों में कहीं भी गुरु शुक्र अस्त व सिंहस्थ गुरु के निषेध का प्रमाण नहीं मिलता तो भी ज्योतिष के वाक्यों की हम अवहेलना नहीं करते किन्तु जब धार्मिक सज्जन अपने धर्म में प्रमाण मिलते हुए भी धर्म सूत्रोक्त मार्ग से वंचित होकर दूसरे धर्मों का द्वार झांकते हैं वे बेचारे ये नहीं जानते कि हमारे धर्म शास्त्रों में कितनी उदारता है वे बेचारे अपढ़ महात्माओं के पास या मतान्तरित प्रचारकों के पंजुल में फंस कर लग्नहीन नक्षत्र शुद्धि रहित दशदोष युक्त समय में विवाह करके सारा जीवन उद्विग्नता में यापन करते है । अत: हम न तो ज्योतिष को ही आंच आये, ना ही धर्म शास्त्र का विरोध हो न ही हमारे धर्मशास्त्रों पर आस्था रखने वाले सज्जनों को निराश होना पड़े । इसी विषय में यदि दोनों का विरोध हो तो उस में—

यस्मिन्काले विरोधोऽस्ति ज्योतिषोक्तागमोक्तयो: ।
ज्योतिषोक्तं परित्यज्य स्मृति चोदितमाचरेत् ।।

—१।१४८ बौधायन स्मृति मुक्ताफल

अत: हर प्रकार से सनातन धर्म के दो ही अनिवार्य संचालक चक्र है धर्म शास्त्र और ज्योतिष यहां कहीं दोनों का विरोधाभास हो वहां ग्राह्यता में धर्म शास्त्र को ही प्राथमिकता दी जाती है । गुरु शुक्र के मौढ्यादि सिंहस्थ गुरु व नीचस्थ गुरु में विवाहादि को हम महता नहीं देते तो भी धर्म संकट ग्रस्त जनता के लिए ज्योतिष के आधार पर बृहद्दैवज्ञरंजनोक्ति:—

आवश्यकेषु कार्येषु राज्ञां तत्कर्म कारिणाम् ।
विवाहादीनि कुर्वीत मौढ्येऽपि गुरु शुक्रयो: ।
शान्तिं कुर्यात्तयोस्तद्वच्छुक्र देवेन्द्र मन्त्रिणो: ।।
होमैर्दानैर्जपैर्वापि तयोरुक्तैश्च मन्त्रकै: ।।

अथवा आचार्य लल्लभट्टानुसार गुरु शुक्र यदि दोनों अस्त हो तो दोष समझे अन्यथा दोष कारक नहीं :—

यद्येकस्यापिमूढत्वे शुभकर्म न दोषकृत् ।
द्वयोर्मूढत्वमेवोक्तं दोषदं गुरुशुक्रयो: ।।

इन धर्म शास्त्रों को आधार रख कर अशुद्ध (अधम) विवाह मुहूर्तों में दशदोष प्रदर्शन पूर्वक विवाह मुहूर्त लगा दिए हैं । इस से यदि किसी भी महानुभाव को लाभ पहुंचे तो हमारा प्रयत्न सफल होगा । प्रामाणिकता के लिए द्रष्टव्य निर्णय सिन्धु मास निर्णय ३परिच्छेद

पाश्चात्य दृष्टया मुहूर्त्त विमर्श:

चन्द्रमा भूमण्डल के सन्निकटवर्ती है, अत: इसका भूवासी जीवों पर अत्यधिक प्रभाव रहा करता है । अत: चन्द्रमा का जिस ग्रह से दृग्योग बने,

उसी ग्रह के नाम पर वह दिन कहा जाता है। पाश्चात्य दृष्टि दो प्रकार की है शुभ एवं अशुभ। शुभ दृष्टि चन्द्र का किसी भी ग्रह से अन्तर यदि ६०°/१२०° का हो तो शुभ एवं ४५°/९०°/१८०° का हो तो अशुभ। एक ही राशि या एक ही अंश पर होना भी एक प्रकार की दृष्टि है जिसे योग, युति, समकलयुति इत्यादि नाम से पुकारा जाता हैं। जब चन्द्रमा से एक ग्रह १२०° के अन्तर पर एवं दूसरा ९०° के अन्तर पर हो तो अत्यन्त शुभ दृष्टि मानी जाती है जिसे तालमेल कहा जाता है। उच्च या स्वराशि में चन्द्र हो या बहुत ग्रहों से तालमेल हो तो उसे चन्द्र दिन ही कहा जाता है। अब चन्द्रमा जिस ग्रह से शुभ दृग्योग में हो उसी ग्रह के नाम पर वह दि। माना जाता है। उसके अनुसार निम्न कार्य उस दिन किए जाएं तो अत्यन्त सफलता मिलेगी।

सूर्यदिन :—स्वाभीष्ट सिद्धि, शुभावस्थान्वेषण, औषध सेवन, शरीरारोग्य, राजदर्शन, यात्रादि कार्यों का मुहूर्त्त शुभ जानना।

चन्द्रदिन :—आध्यात्मिक कृत्य, अनुसंधान, निर्भीकितोपयोगी कृत्य, किसी देवता के अनुष्ठानारम्भ में मुहूर्त्त शुभ होता है।

भौमदिन :—अग्नि, युद्ध, बिजली, शस्त्र, उग्र, अभिचार, इञ्जीनियरी, शल्यविद्या, कला, धातुद्रवी करण, भस्मनिर्माणादि कृत्यारम्भ के लिये शुभ है।

बुधदिन :—विद्यारम्भ, यात्रा, लिपि व्यवहार, बहीखाता, लेखाजोखा, गणित मुद्रण, सम्पादन, कानून, अध्ययनाध्यापन, चित्रकारीत्यादि कृत्यारम्भ में श्रेष्ठ है।

गुरुदिन :—अध्ययनाध्यापन, आत्मोद्धार, शास्त्रचर्चा, कोष, विपणि, क्रय, विक्रय द्रव्यादान लेखन, मुनीमी, यज्ञानुष्ठानादि आरम्भ करने के लिये प्रशस्त हैं।

शुक्रदिन :—विवाह, मित्रसमागम, दासदासीकृत्य, स्त्रीसमागम, भूषण, वस्त्र, निर्माण, गर्भाधान, सभा प्रवेश, राजसेवा, गीतवाद्याद्युत्सवारम्भार्थ श्रेष्ठ है।

शनिदिन :—कृषि, खनि, धातु, शिलान्यास, वास्तु, कूप तडागादिखनन, बीजवाप, हलप्रवहण, क्षेत्र व्यवहार, मल्लयुद्ध, मशीनी काम, चार्ज का लेन देन, विद्यारम्भादि कृत्य करना शुभ है।

सूचना :—पाश्चात्य लोग इन्हीं चान्द्र मुहूर्त्तों के अनुसार कार्यारम्भ सफल मानते हैं। यदि इनके साथ भारतीय मुहूर्त्त अपना लें तो सोने पर सुहागे की तरह कार्य में पूर्ण सफलता मिल सकती है।

।। समयशुद्धौ विचारणीय विषयाः ।।

संवत् २०४२ में शुक्र दो बार अस्त होगा प्रथम वक्रास्त पुनः मार्गास्त निम्नप्रकार से जानें।

शुक्रवक्रास्त—संवत् २०४२ चैत्र प्र० २० तदनु २ अप्रैल १९८५ को शुक्र पश्चिम में अस्त होगा। एवं चैत्र प्र० २४ तदनु ६ अप्रैल १९८५ ई० को पूर्व में उदय होगा।

शुक्रमार्गास्त—संवत् २०४२ पौष प्र० ४ तदनु २५ दिसम्बर १९८५ ई० को शुक्र पूर्व में अस्त होकर फाल्गुन प्र० १ तदनु १२ फरवरी १७८६ ई० को पश्चिम में उदय होगा।

गुरुप्रवास (अस्त)—संवत् २०४२ माघ प्र० २६ तदनु ८ फरवरी १९८६ ई०। गुरु अस्त होकर फाल्गुन प्र० ३० तदनु १३ मार्च १९८६ ई० को उदय होगा।

अधिमासदोष:—सौर श्रावण प्र० ३ से श्रा.प्र. ३१ तक अधिमास (मलमास) हैं।

ग्रहणशूलदोष:—सं. २०४२ वैसाख प्र० १९ तदनु १ मई १९८५ ई० से वै० प्र० २८ तदनु १० मई तक ग्रहणशूल होने से विवाहादि मुहूर्त्तों का अभाव होगा पुनः द्वितीय चन्द्रग्रहण कार्तिक प्र० ८ तदनु २५ अक्तूबर १९८५ ई० से १८ कार्तिक तदनु ३ नवम्बर १९८५ ई० का समय ग्रहण शूल होने से सभी शुभकार्यों के लिए वर्जित है।

पितृपक्ष:—स. २०४२ आश्विन प्र० १४ तदनु २९ सितम्बर १९८५ से आश्वि. प्र० २९ तदनु अक्तूबर १४ सन १९८५ तक पितृपक्ष (श्राद्ध दिन सभी शुभ कामों के लिए वर्जित है।

पंचभीष्म—संवत् २०४२ कार्तिक शुक्ल एकादशी मार्ग प्र० ८ तदनु २४ नवम्बर १९८५ से कार्तिक शुक्ल पूर्णिमा तदनु २७ नवम्बर १९८५ तक पंच भीष्म व्रत होने से शुभ कामों में वर्जित है। ❀

❀ अन्य मुहूर्त्त तालिकाएँ प्रक्रमणिका से संलग्न पृष्ठों पर देखें।

पञ्चाङ्ग सम्पादन में प्रोत्साहनार्थ द्रव्यात्मक सहायता देने में अग्रगण्य विभूतियें :-

वैष्णव विरक्ताग्रगण्य, सर्वत्रपूज्य सिद्धस्वरूप
महन्त श्री १०८ श्री बलभद्रदासजी महाराज
श्रीरघुनाथ मन्दिर पुरानी मण्डी, जम्मू ११०१/-रु०

दशनामी अखाडा में लब्ध प्रतिष्ठ परमहंस
स्वामी श्री १०८ श्री लोकनाथगिरिजी महाराज
महन्त श्री रणवीरेश्वर मन्दिर, जम्मू ११०१/-रु०

इन दिव्य महाविभूतियों की आशीर्वाद हमेशा मेरे साथ रही है एवं आगे भी रहेगी अतः इन्हें मैं कोटिशः धन्यवाद देता हूँ।

इनके अतिरिक्त सहानुभूतिपूर्ण सहायतार्थ कटिबद्ध महानुभाव ये हैं :-

महन्त श्री बजरङ्गदासजी शास्त्री ज्योतिषाचार्य बुर्जमन्दिर ५००/- रु०

वैष्णव कुलभूषण श्री यशपालजी भटोली महन्तां ७००/- रु०

श्री रामप्रकाशजी शर्मा ओवरसीयर जानकीपुर, जम्मू ११०१/- रु०

ज्यो. श्री शिवप्रकाश रैणा शिक्षा शास्त्री अखनूर २००/- रु०

आचार्य श्री पीताम्बरजी ५००/- रु०

गोस्वामी श्रीमुनशीराम शर्मा M.C. आफिसर गीताभवनसमीपवर्ती, जम्मू ३००/- रु०

श्री चिरञ्जीलाल मेंगीजी २००/- रु०

इनका मैं सर्वथा धन्यवादी हूँ।

❀ सूचना ❀

श्री वैष्णव विजय पञ्चाङ्ग प्रेमी सज्जनों को सूचित किया जाता है कि इस पञ्चाङ्ग का सम्पादन दो भागों में विभक्त हो गया है। एक छायाचित्र की सहायता से नवीन ढङ्ग में अङ्कावतार एवं दूसरा साधारण ढङ्ग में। अङ्कावतार में १ से ६३ तक पृष्ठ संख्या एवं दूसरे में १ से १२८ तक पृष्ठ संख्या अंकित है। साधारण भाग के ६४ एवं ६५ पृष्ठ के मध्य में अङ्कावतार को समञ्जित किया गया है।

अतः साधारण भाग के आगे का शेष भाग अंकावतार के पश्चात् पढ़ा जाय। उसी प्रकार विषय सूची भी अंकित की गयी है।

—(विषयानुक्रमणिका शेष)

जयाम्बे ! मा ! जयाम्बे ! मा ! जपन्तस्त्वां जना यान्ति !
गुहास्था आरतिं मातः ! स्तुवन्तो यायिनो भान्ति !! जयाम्बे ! मा !

उदीच्यां जम्बुतस्तीर्थं द्विगर्तेष्वीक्ष्यतेऽरण्ये !
किरीटे भारतस्यास्मिंस्त्रिकूटे चित्रकूटेऽन्ये !! जयाम्बे ! मा !

त्वदीया भूर्यतोवन्या सदाऽऽपो ज्योतिषा पूता !
स्वनन्ती बालङ्गान्या भुवस्ते मेखली भूता !! जयाम्बे ! मा !

चरण्या पादुका त्वाऽऽद्याकुमारी हस्तिमस्तान्तः !
स सन्धिच्छत्तु सोपानैः सुमार्गो भैरवाऽऽस्यान्तः !! जयाम्बे ! मा

अवागात्पिडिका दृश्या प्रसिद्धाकन्दरान्तस्ते !
स्वयं त्रैयम्बकी भूता निसर्गान्मन्दिरान्तस्ते !! जयाम्बे ! मा !

महाकाली महालक्ष्मी महावागीश्वरी ख्याता !
प्रतीता श्रीधरप्रख्यैः सुपूज्यार्यैरथो ध्याता !! जयाम्बे ! मा !

समस्तै वैष्णवैलोके स्मृता त्वं वैष्णवी नाम्ना !
पवित्रा कीर्त्यते कीर्तिस्त्वदीया पुण्य सद्धाम्नः !! जयाम्बे ! मा !

चरण्या सूक्ष्मगङ्गाम्बे ! त्वदङ्घ्रि मूलजा गुण्या !
जनानां पावनं मन्ये स्वरूप बालस्वर्धुन्या !! जयाम्बे ! मा !

भवाब्धौ मज्जतां नृणां समुद्धर्त्री तरी रूपा !
त्वमेवैका जगन्मातः ! समेषामाश्रयी भूता !! जयाम्बे ! मा !

यरत्स्या गो गजैः सिद्धैर्यतिश्चद् वैष्णवच्छन्दः !
'बिहारी' प्रस्तुत मातः ! तवार्थे गज्जलं बन्धः !! जयाम्बे ! मा !